सुश्रुतसंहिता।

चिकित्सितस्थानम्।

रामपुरबोयालिया-प्रवासि

श्रीहाराणचन्द्रचक्रवर्त्तिकविराज-

विरचित-सुश्रुतार्थसन्दीपनभाष्य-समेतम्

भूतपूर्व्व-राजकीय संस्कृतविद्यालयाध्यापक-पूज्यपाद-

सर्व्वतन्त्रस्वतन्त्र-तर्कालङ्कारपदाङ्कित-महामहोपाध्याय-

स्वर्गीय-चन्द्रकान्तभट्टाचार्य्य-

प्रमुखैः संशोधितम्।

कलिकाताराजधान्याम्

घोषेस्लेनीय १६।१ संख्यकभवनस्थ-

सत्ययन्त्रे

श्रीशिवव्रतचट्टोपाध्यायेन मुद्रितम्।

श्रीलक्ष्मीगिरीशचन्द्रवसाकेन कलिकाताराजधानीतः प्रकाशितम्।

शकाब्दाः १८३५।

मूल्यम्—सार्द्धमुद्रार्थप्रेषणव्ययश्च-आणकत्रयम्।

चिकित्सितस्थानस्य सूचीपत्रम् ।

चिकित्सितस्थानस्य शुद्धपत्रम् ।

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः	पङ्क्त्यङ्कः
उपेक्षित	उपेक्षितो	७	१८
देषोपशमं	दोषोपशमं	८	३
समाहृती	समाहृतौ	१०	४
उन्मागिणः	उन्मार्गिणः	१३	१५
शिराव्यधः	शिराव्यध	१३	२०
निर्व्वापण	निर्व्वापणं	१४	१०
रोमकूप	रोमकूपा	१५	११
न मुखान्	नणमुखान्	१६	१
मिस्त्रकात्त	मिस्त्रकोक्त	१६	१५
गर्भत्वाट्रोपणाय	गर्भत्वाद्रोपणाय	१८	२०
स्थगामायु	स्थगोमायु	२०	१६
निशेषं	निःशेषं	२१	१८
दूरूढ़त्वात्	दूरूढ़त्वात्	२१	२१
कषाणां	कषायाणां	२२	१७
प्रपुनाड़	प्रपुन्नाड़	२३	२१
निमित्तत्वेनानुपदेशात्	निमित्तत्वेनोपदेशात्	२५	२१
ग्रहणीणेव	ग्रहणीनेव	२८	२१
रिग्रहीतुम्	परिग्रहीतुम्	२८	२२
शीलमत्स्ये -	शीलमस्ये-	२८	२२
वैद्यातुरौषध-	वैद्यातुरौषध-	२९	१४

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः	पङ्क्त्यङ्कः
आसीच्चधनालं	आसीच्चनालं	३१	८
कतोग्रन्थ ;	कृतोग्रन्थः	३१	१२
सप्रतिपत्ते:	सप्रतिपत्तेः	४१	१८
अयोगुस्थं	अयोगुडकस्थं	३४	१८
प्रतिकार	प्रतीकार	५२	१८
सन्ध	सन्धे	६०	१५
,,	,,	,,	,,
हेतुत्वेनां	हेतुत्वेना-	६५	८
गुणमापपादयितुम्	गुणमापादयितुम्	६५	११
रूपत्वा-	रूपत्वा-	६५	१७
संस्करात्	संस्कारात्	७३	५
स्विन्न	स्विन्नं	७७	१५
नोमक्रमेत	नोपक्रमेत	८२	४
धमनो:	धमनीः	८५	१४
प्राप्त	प्रात	९०	८
अथातो	अथातो	९२	२
त्येनावतां	त्ये तावता	९३	१८
चारोपयोगि	चारोपयोगि	९४	१०
शाकै:	शाकैः	९६	६
दोपन	दीपन	,,	८
तकड़ा	भकड़ा	१०६	१८
रूपेषू	रूपेषु	१०९	४
परिहरे	परिहरे	१२५	१
मृत	मृतः	१२७	१८

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः	पङ्क्त्यङ्कः
दभीक्ष्ण	दभीक्ष्ण	१३०	६
श्विलापाई	श्विलापई	१३२	११
शोभाञ्जवादि	शोभाञ्जनादि	,,	१४
कल्के	कल्कैः	१३६	१५
सौमूनाः	सौमना	१३७	१७
स्रात्र	स्वत्र	१४५	१८
गुड़ची	गुड़ूची	१५५	८
विशेष	विशेषे	१५९	१७
कपत्व	कपत्व	१६४	१७
यूषौ	यूषौ	१६७	३
निल्य	नित्य	१६९	३
मुषकादिसु	मुष्ककादिसु	,,	१९
उत्कर्षेणेति	उत्कर्षणेति	१७८	१९
नाद्गुली	नाड्गुली	१८०	८
शाल्मजि	शाल्मलि	,,	१३
वर्त्तमान	वर्त्तमानं	,,	१९
'र्ध्याख्यात	व्याख्यात	१८१	१७
एथा	अथा	१८२	३
"तदर्हम"	"तदर्हम्"	१८६	१५
जीवनीय	जीवनीय	१८८	१७
अनुपश्येयम्	अनुसन्धेयम्	१८९	१८
शिग्रु	शिग्रू	१९१	१२
प्रत्यणीक	प्रत्यनीक	,,	१४
सासिवास	सारिवासु	१९५	३

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः	पङ्क्त्यङ्कः
हरिन्द्रा	हरिद्रा	१९५	१६
गुरोधाद्स्व:	गुरोधादस्व:	१९६	१४
स्तणभेद:	स्तृणभेद:	,,	,,
कुटल	कुटज	१९८	१२
भस्य	मस्य	२००	५
अङ्कोट	अङ्कोठ	,,	९
शोफक्रियाया:	शोफक्रिया:	२०४	९
प्रपुण्डरीक	प्रपौण्डरीक	२२१	१९
,,	,,	,,	,,
कच्छरिति	कच्छूरिति	२२९	२२
अथातं	अथात	२३६	१९
रसक्रियाकाककाम	रसक्रिया	२३७	३
विद्रधिश्चापि	विद्रधिवच्चापि	२३८	१२
ब्रवीमि	ब्रवीमि	,,	१६
कारल	कवल	२४६	७
स्वर्णानि	चूर्णानि	२५१	६
देवदारुशुण्ठी	देवदारुशुण्ठी	२५२	१४
मधुको	मधूको	२५४	२
क्षीर	क्षीर	२५६	७
*दाग्लवं	दाग्लरं	२६६	२०
मालेयेन	मालेयेण	,,	२१
ग्रामीणसंवात	ग्रामीणं	२६७	१२
चक्षानं	चाक्षानं	,,	२१
आरण्य	आरोग्य	२६८	२

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः	पङ्क्त्यङ्कः
वर्पासु	वर्षासु	२६८	५
प्रावृम्	प्रावृट्	,,	१७
स्वस्था	स्वस्था	२६९	१४
मर्हितहारादिना	महिताहारादिना	,,	१७
अत्वेति	अन्वेति	२७०	१६
रजस्वालां	रजस्वला	२७१	१
प्रसवती	प्रासवती	,,	,,
ऽसागता	ऽनागता	२७२	८
नाय्या	नार्य्या	,,	१०
चिक्रित्सित	चिकित्सित	,,	१५
स्तथोत्पात	स्तथोत्पात	२७३	४
स्रावयति	स्रारयति	,,	१९
जड़ोभूत	जड़ीभूत	२७४	१७
जम्बा	जम्बू	२७५	२
जम्बर्ज्जुन	जम्बर्ज्जुन	२७६	१४
वीजोद्गम्	वीजोद्भवम्	,,	२१
नोरज	नीरज	२७७	१९
कुर्य्यादित्	कुर्य्यादेतत्	२७८	२
टोका	टीका	,,	१२
फठकारी	फट्कारी	,,	१३
हुरीतकी	हरीतकी	,,	१५
प्राञ्जनम्	प्राञ्जनम्	,,	१६
चीन	चीण	२७९	१
चीनवलीयं	चीणवलीयं	,,	१६

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः	पङ्क्त्यङ्कः
स्यानृर्वा	स्यान्नृर्वा	२८०	१०
प्रवच्यामत:	प्रवक्ष्याम्यतः	,,	१६
सर्व्वोपघात	सर्व्वोपघात	२८५	१८
मन्त्राणि	मन्त्राणि	२८७	१६
बचाया:	वचाया:	२९३	१७
मन्तरोत्तव	मन्तरोत्तं	२९७	१७
कवच्च	कवच्चः	३००	२०
विवते	वितते	३०१	१५
षर्थे	षर्थे	,,	१८
ओषधीनां	ओषधीनां	३०२	३
धावयेत्	धारयेत्	,,	५
मनेकधा	मनेकधा	,,	७
समधिगच्छति	समधिगच्छति	,,	८
ध्यवसेयम्	ध्यवसेयम्	,,	१८
वष	वर्षं	,,	१९
विज्ञेयौ	विज्ञेया	३०४	११
रसायण	रसायन	,,	१९
असित्य	आदित्य	३०५	११
तिव्रत:	दिव्रतः	३०५	१४
जतो	जतो	,,	१७
श्वकापोतो	श्वेतकापोतौ	३०६	६
कद्वरे	कन्दरे	३०८	७
सूर्य्यवर्णा	सूर्य्यवर्णा	३१२	१
सुवर्ण	सुवर्णं	३१४	१५
कोष्टायु:	कोष्ठायाः	३१५	२०

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः	पङ्क्त्यङ्कः
घृतस्य	घृतस्य	३१६	२
उपस्पृष्य	उपस्पृश्य	३१६	३
लड्डाह	लेड्डाह	३१८	२
दोगेषु	दोषेषु	३१६	०७
अभिरस्थाय	अभिमस्थाय	३२१	२०
उपलम्ब	उपलब्धे	३२३	२०
३५	३६	३२६	१७
क्रमनीयात्	क्रमणीयात्	,,	,,
तावद्दा	तावद्	३३४	२१
तीच्णान	तीक्ष्णम्	३३६	१६
दोष	दोषैः	३४०	१३
चतुचिंमा	चतुस्त्रिंशी	३४२	८
वहिष्कर्तु	वहिः कर्त्तु	३४५	१६
प्रपीड़णा	प्रपीड़ना	३५०	२१
अष्ठीलावा	अष्ठीलाद्या	३८३	१८
मूत्राघाता:	मूत्राघाता:	,,	
धामइति	"धाम" इति	३८४	२०
माधुतैले	मधुतैले	३८६	५
मधुतैलिक	माधुतैलिक	,,	८
यस्मादाभि	यस्मादाभि	३८८	३
मनपुंसकेन	मनपुंसकेन	३६३	६
ह्युत्तरोत्तरं	ह्युत्तरोत्तर	,,	१०
पानाभ्यञ्जन	पानाभ्यञ्जन	३६६	१३
रंसकन	रुंसकेन	४००	२१
समन्तरं	मनन्तरं	४०२	१६
उच्छिङ्कतो	उच्छिङ्कतो	४०४	२२

सुश्रुतसंहिता ।

चिकित्सित—स्थानम् ।

प्रथमोऽध्यायः ।

अथातो द्विव्रणीयं चिकित्सितं व्याख्यास्यामः ॥ १ ॥

द्वौ व्रणौ भवतः—शारीर आगन्तुकश्चेति । तयोः शारीरः पवन-पित्त-कफ-शोणित-सन्निपात-निमित्तः। आगन्तुरपि पुरुष पशु-पक्षि-व्याल-सरीसृप-प्रपतन-पीड़न-प्रहाराग्नि-क्षार--विष-तीक्ष्णौषध--शकल--कपाल-शृङ्ग-चक्रेषु-परशु-शक्ति-कुन्ताद्यायु-

---

इदमत्रामनन्ति "आयुर्व्वेदप्रयोजनं व्याध्युपसृष्टानां व्याधिपरिमोक्षः, स्वस्थस्य परिरक्षणञ्च" इति कर्म्मणोश्च तयोरनुष्ठाने यत्पूर्व्ववेद्यमर्थजातं नियमेनापेक्षते तत्तु निरदिक्षं निखिलेन शारीरान्तेषु स्थानत्रितयेषु, इदानीन्त्ववसरोऽयमुद्दिष्टभूतौ तावर्थावनुसन्धातुमित्यभिसन्धाय प्रक्रान्तं चिकित्सित-स्थानमारिप्समानो भगवान् तन्त्रस्यास्य शल्याङ्गप्राधान्यात् प्रथमन्तावदुद्दिष्टं द्विव्रणीयचिकित्सितमेवाधिकरोति अथातइत्यादिना । द्वौ व्रणावधिकृत्य कृतो ग्रन्थो द्विव्रणीयः, चिकित्सितशब्दस्तु व्युत्पादितः प्रागेव ॥ १ ॥

आमूलं प्रकृतमर्थमनुसरति द्वाविति । व्याला हिंस्राः पशवः, सरीसृपाः सर्पाः, शकलं काष्ठादीनां खण्डम्, कपालं घटादीनामवयवः । किन्तु सत्नयो-

धाभिघात-निमित्तः। तत्र तुल्ये व्रणसामान्ये द्विकारणोत्थान-प्रयोजन-सामर्थ्याद्विव्रणीय इत्युच्यते ॥ २ ॥

सर्व्वस्मिन्नेवागन्तुव्रणे तत्कालमेव क्षतोष्मणः प्रसृतस्योपशमार्थं पित्तवच्छीतक्रियावधारणविधिविशेषः, सन्धानार्थञ्च मधुघृतप्रयोगइत्येतद्विकारणोत्थानप्रयोजनम्। उत्तरकालन्तु

व्रणत्वे तुल्येऽपि द्विव्रणीय इत्युच्यत ? आह तत्रेति। तत्र व्रणयोर्व्रणसामान्ये व्रणत्वे तुल्येऽपि द्विविधाभ्यां कारणाभ्यामुत्पत्तिरेवनिमित्तमस्य चिकित्सितस्य तच्चौपयौगिकत्वात् द्विकारणोत्थानप्रयोजनसामर्थ्यात्। किन्नाम तत् चिकित्सितं यदपेक्षते द्विकारणोत्थानमित्याह सर्व्वस्मिन्निति। अवधारणार्थोऽयमेवशब्दः, तत् कालं समाहमेवेत्यर्थः। क्रियाणामासां सद्योव्रणचिकित्सिते सामाह्निकत्वेनैव विवक्षितत्वात्। प्रसृतस्य वायुनावामप्रसारस्य क्षतोष्मणः संसिद्धप्रभूतपित्तशोणितागमनिमित्तस्य क्षतान्तर्गतस्य सन्तापविशेषस्य शीतक्रियैव कर्त्तव्येति निश्चितोविधिः शीतक्रियावधारणविधिः सन्धानार्थं संयोजनार्थम्, आदिपर्य्यायोऽयमितिशब्दः सद्योव्रणचिकित्सिते वक्ष्यमाणान् क्रियाविशेषान् लक्षयतीत्यनुसन्धेयम् "इति हेतुप्रकरणप्रकर्षादिसमाप्तिषु" —इत्यमरः। द्विकारणोत्थानप्रयोजनं द्विविधकारणोत्पत्तिनिमित्तकं चिकित्सितमित्यर्थ.। यदि हि व्रणसामान्येनोपदेशमकरिष्यत् तच्चागन्तावेवंविधिमुपदेष्टुं विदितवेदितव्योऽपि कश्चित् भिषक् सहसा नाशक्ष्यदित्ययमाशयः। अथागन्तुव्रण इति सिद्धे सर्व्वस्मिन्निति सर्व्वशब्दो व्रणयोग्यतायामप्यस्य विधेरौपयौगिकत्वमाख्यातुमिति गम्यते तथाच सन्तापवत्यनवाप्तव्रणभावेऽभिहतप्रदेशेऽपि शीतक्रियोपयोगव्यवहारो नानुपपन्नः। स्यादेतदुत्तरकालन्तु किमिव प्रतीकारो भवत्यारोग्यायेत्याह उत्तरेति। उत्तरकालं समाहात् परमिति स्वतन्त्रसिद्धान्तः। हस्तं वर्त्तमानञ्च दोषोद्रेकविशेषं

दोषोपप्लवविशेषाच्छारीरवत् प्रतीकारः ॥ ३ ॥

दोषोपप्लवविशेषः पुनः समासतः पञ्चदशप्रकारः प्रसरणसामर्थ्याद्यथोक्तो व्रणप्रश्नाधिकारे। शुद्धत्वात् षोड़शप्रकार इत्येके ॥ ४ ॥

तस्य लक्षणं द्विविधं—सामान्यं वैशेषिकञ्च। तत्र सामान्यं रुक्। व्रण गात्रविचूर्णने व्रणयतीति व्रणः। विशेषलक्षणं पुनर्वातादिलिङ्गविशेषः ॥ ५ ॥

विमृश्येति दोषोपप्लवविशेषान्। अत्र वृत्तमित्युपादानात् शुद्धत्वमापन्नेऽप्यागन्त्वादिसम्भवे व्रणे प्रतिचिकीर्षितव्ये तत्तद्भूतदोषोपप्लवविशेषविमर्शापेक्षा सूचिता भवतीत्यध्यवसेयम्। दोषास्त्वत्र शस्त्याङ्गाभिमता शोणितचतुर्थां वातादय एवेति प्रत्येतव्यं वक्ष्यति हि 'पञ्चदश प्रकारः" इत्यादि ॥ ॥ २—३ ॥

न तारतम्यमात्राद्दोषोपप्लवविशेषाणामपरिसंख्येयत्वेन तन्मूलानां व्रणानामप्यपरिसंख्येयत्वात् सुदुर्लभं भवति प्रतीकारसामर्थ्यं पञ्चदशविधेष्वितरेषामन्तर्भावादित्याशयेनाह दोषेति। समासतः संक्षेपतो यथास्थूलं परिसङ्ख्यानादिति यावत्। प्रसरणसामर्थ्यात् प्रव्यक्तलिङ्गतया प्रसारित्वेनानुभवादित्यर्थः। एतेनार्थोक्तिं भवति तन्मूलत्वाद् यथास्थूलं व्रणविशेषोऽपि पञ्चदशप्रकार इति। शुद्धत्वात् तत्तद्विकारकारिशक्त्या विनाकृतत्वेन शुद्धतया विजृम्भितत्वादित्यर्थः। षोड़शप्रकारो दोषोपप्लवविशेष इत्यनुषज्यते। एके इत्यस्वरससूचनाय, सति हि दोषोपप्लवविशेषे तन्मूलस्य वेदनादेरवश्यम्भावित्वेन हेतोरस्यस्वरूपासिद्धत्वात्। तस्येत्यादि। तस्येति व्रणसम्बन्धव्यवमर्षकम्। रुगिति रुक्शब्देनेह त्वगाद्यवदरणमात्रमभिप्रेयते न त्वन्यदित्याविष्कर्तुं व्रणशब्दं निर्व्यक्ति व्रणेति। गात्रविचूर्णनं त्वगाद्यवदरणमित्यनर्थान्तरम्। ॥४—५ ॥

तत्र श्यावारुणाभस्तनुः शीतपिच्छिलाल्पस्रावी रूक्षश्चटचटायनशीलः स्फुरणायामतोदभेदवेदनाबहुलो निर्म्मांसश्चेति वातात् ॥ ६ ॥

क्षिप्रजः पीतनीलाभः किंशुकोदकाभोष्णस्रावी दाहपाकरागविकारी पीतपिड़काजुष्टश्चेति पित्तात् ॥ ७ ॥

प्रततचण्डकण्डूबहुलः स्थूलो घनः स्तब्धशिरास्नायुजालावततः कठिनः पाण्डवभासो मन्दवेदनः शुक्लशीतसान्द्रपिच्छिलास्रावीगुरुश्चेति कफात् ॥ ८ ॥

प्रवालदलनिचयप्रकाशः कृष्णस्फोटपिड़काजालोपचितस्तुरङ्गस्थानगन्धः सवेदनो धूमायनशीलो रक्तस्रावी पित्तलिङ्गश्चेति रक्तात् ॥ ९ ॥

तोददाहधूमायनप्रायः पीतारुणाभासस्तद्वर्णस्रावीचेति वातपित्ताभ्याम् ॥ १० ॥

कण्डूयनशीलः सनिस्तोदो दारुणो मुहुर्म्मुहुः शीतपिच्छिलस्रावी चेति वातश्लेष्मभ्याम् ॥ ११ ॥

गुरुः सदाह उष्णः पीतः पाण्डुस्रावीचेति पित्तश्लेष्मभ्याम् ॥ १२ ॥

रूक्षस्तनुस्तोदबहुलः सुप्त इव च रक्तारुणाभस्तद्वर्णस्रावी चेति वातशोणिताभ्याम् ॥ १३ ॥

उक्तमर्थं पुनः स्फोरयन्नाह तत्रेति । तत्र पञ्चदशप्रकारेषु मध्ये वाताद्व्रण इतियोजना । चट्चटायनं चड़्चड़ायनम्, स्फुरणमभ्यन्तरे ईषत् कम्पनमिव, आयामो दीर्घीकरणार्थमाकर्षणमिव वेदनाविशेषः । तोदभेदौतु सूच्यारा-

घृतमण्डाभो मीनधावनतोयगन्धिर्मृदुर्विसर्पी कृष्णास्रावी चेति पित्तशोणिताभ्याम् ॥ १४ ॥

रक्तो गुरुः पिच्छिलः कण्डूप्रायः स्थिरः सरक्तपाण्डुस्रावी-चेति श्लेष्मशोणिताभ्याम् ॥ १५ ॥

स्फुरणतोददाहधूमायनप्रायः पीततनुरक्तस्रावी चेति वात पित्तशोणितेभ्यः ॥१६ ॥

कण्डूस्फुरणचुमचुमायनप्रायः पाण्डुघनरक्तास्रावी चेति वातश्लेष्मशोणितेभ्यः ॥ १७ ॥

दाहपाकरागकण्डूप्रायः पाण्डुघनरक्तास्रावी चेति श्लेष्म-पित्तशोणितेभ्यः ॥ १८ ॥

त्रिविधवर्णवेदनास्रावविशेषोपेतः पवनपित्तकफेभ्यः ॥ १९ ॥

निर्द्दहन-निर्म्मथन-स्फुरण-तोद-दाह-पाक-राग-कण्डू-स्वापबहुलो नानावर्णवेदनास्रावविशेषोपेतः पवनपित्तकफशो-णितेभ्यः । ॥ २० ॥

जिह्वातलाभो मृदुः स्निग्धः श्लक्ष्णो विगतवेदनः सुव्यव-

विद्रवद्वेदनाविशेषौ । निर्म्मांसो हीनमांसः, किंशुकं पलाशपुष्पम् प्रवालेत्यादौ निवशब्दः प्रव्यक्तरक्तवर्णत्वमाविष्करोतीति गम्यते । "सामान्यं हृद्विकारण-मिति हि न्यायः । जालः समूह इति पर्य्यायौ । दारुणः कठिन त्वेन भयङ्करः सूक्ष्मः स्मर्शानभिज्ञः धूमायनमौष्ण्याद्धूमोद्गिरणौवभासः, चुम-चुमायनं सर्षपकल्कलिप्तवद्वेदनाविशेषः, निर्मथनन्तु विलोडनवद्वेदना विशेषः, स्वापः सुप्तिः ।'६—२०'॥ नन्वायुर्व्वेदे कैर्लिङ्गैः शुद्धं व्रणमुपदिशन्त्या-चार्य्याः यं प्रतीकर्त्तुं भूतदोषोपद्रवविशेषविमर्शापेक्षा कर्त्तव्येत्युपदिष्टमित्याह

स्थितो निरास्रावश्चेति शुद्धो व्रण इति ॥ २१ ॥

तस्य व्रणस्य षष्टिरुपक्रमा भवन्ति । तद्यथा—अपतर्पणमालेपः परिषेकोऽभ्यङ्गः स्वेदो विम्लापनमुपनाहः पाचनं विस्रावणं स्नेहो वमनं विरेचनं छेदनं भेदनं दारणं लेखनमेषणमाहरणं व्यधनं सीवनं सन्धानं पीड़नं शोणितास्थापनं निर्व्वापणमुत्कारिका कषायो वर्त्तिः कल्कः सर्पिस्तैलं रसक्रियावचुर्णनं व्रणधूपनमुत्सादनमवसादनं मृदुकर्म्म दारुणकर्म्म क्षारकर्म्माग्निकर्म्म कृष्णकर्म्म पाण्डुकर्म्म प्रतिसारणं रोमसञ्जननं लोमापहरणं वस्तिकर्म्मोत्तरवस्तिकर्म्म बन्धः पत्रदानं क्रिमिघ्नं वृंहणं विषघ्नं शिरोविरेचनं नस्यं कवलधारणं धूमो मधु सर्पिर्यन्त्रमाहारो रक्षाविधानम् ॥ २२ ॥

जिह्वेति । श्लक्ष्णोऽकर्कशः सुस्थिरस्थिरः समतलत्वेन सुसंहतः, अतिरोहितार्थमन्यत् ॥ २१ ॥

तस्येत्यादि । परिषेको यथास्वौषधसिद्धोष्णजलाद्यवसेचनम्, विम्लापनमत्र अङ्गुष्ठादिनावमर्द्दनम्, निर्व्वापणम् दाहप्रशमनम्, उत्कारिका पाकेन घनीभूतः कल्कः, रसक्रियातु घनीभूतः क्वाथः अवचूर्णनं चूर्णाकीर्णनम्, उत्सादनमुन्नमनं मांसाभिवर्द्धनमित्येतत् नचार्थोऽयमनुपपन्नः, उत्सन्नेत्यादावुत्पूर्व्वस्य सीदते स्तदर्थे प्रयोगदर्शनात्। अवसादनं दुष्टानां मांसादीनां विलयनम्, मृदुकर्म्म दारुणानां मृदूकरणम्, दारुणकर्म्म च तद्विपर्य्यासः कृष्णकर्म्म शुक्लानां कृष्णीकरणम्, पाण्डुकर्म्म च तद्विपर्य्यासः, वस्तुतस्तूभयञ्चैतत् सवर्णकरणमित्यवगन्तव्यम्। प्रतिसारणं घर्षणम्, बन्धो बन्धनम्, मधुसर्पिषो द्विरुपादानं संस्कृतासंस्कृतयोरुभयोरेव परिग्रहार्थम् ॥ २२ ॥

तेषु कषायो वर्त्तिः कल्कः सर्पिस्तैलं रसक्रिया वचूर्णनमिति शोधनरोपणानि। तेष्वष्टौ शस्त्रकृत्याः। शोणितास्थापनं क्षारोऽग्निर्यन्त्रमाहारो रक्षाविधानं बन्धविधानञ्चोक्तानि। स्नेह-स्वेद-वमन-विरेचन--वस्त्युत्तरवस्ति--शिरोविरेचन-नस्य-धूम-कवलधारणान्यन्यत्र वक्ष्यामः यदन्यदवशिष्टमुपक्रमजातं तदिह वक्ष्यते॥ २३॥

षड्विधः प्रागुपदिष्टः शोफस्तस्यैकादशोपक्रमा भवन्त्यपतर्पणादयो विरेचनान्ताः। ते च विशेषेण शोथप्रतीकारा वर्त्तन्ते, व्रणभावमापन्नस्य च न विरुध्यन्ते। शेषास्तु प्रायेण व्रणप्रतीकारहेतव एव। अपतर्पणस्त्वाद्य उपक्रमः, एष सर्व्वशोफानां सामान्यः प्रधानतमश्च॥ २४॥

तेष्वित्यादि। अष्टौ छेदनाद्या इत्यर्थः। उक्तानीति "नपुंसकमनपुंसकेन" इति नपुंसकं शिष्यते। उक्तानि सू १४। ११। १२। ७। १९। ५। १८ अं इतिशेषः। अन्यत्रेति चिं ३१।३२।३३।३८।३७।४० अं इत्युन्नेयम्। उपेक्षित हि शोफः शारीरसमाख्याय व्रणाय सम्पद्यत इत्यतः क्रमागतं शारीरं नाम व्रणं प्रति प्रतीकारक्रममुपदिदिक्षुः प्रथमन्तावच्छोफमेवाश्रित्याभिधत्ते षड्-त्यादिना। प्रागित्यामपक्वैषणीय इत्येव। अपतर्पणादय इत्यतद्गुणसंविज्ञानो बहुव्रीहिरित्युपपन्नं भवत्येकादशेति। ननावदेतावता "व्रणस्य षष्टिरुपक्रमा भवन्ति" इति प्रागुक्तं विप्रतिषिद्धं भवतीत्याह त इति। व्रणभावमापन्नस्य शोफस्येत्यर्थः। अत्र व्रणस्येति वक्तव्ये व्रणभावमापन्नस्येति वचनं शोफव्रणयोः प्रकृति-विकृतिभावेनानन्यत्वं पुरस्कृत्य व्याजेनानयोः प्रतीकारसाम्यमुपदेष्टुमिति गम्यते। एवञ्च "न विरुध्यन्ते" इति सामान्येनोक्तेऽपि स्वस्वप्रकृतिभूतशोफ-समुत्थितास्तत्तत्प्रतीकारास्ताद्दशव्रणेषूपयुज्यन्त इत्येव फलितम्, तथाचान-

दोषोच्छ्रायोपशान्त्यर्थं दोषानस्य देहिनः ।
अवेक्ष्य दोषं प्राणाञ्च कार्य्यं स्यादपतर्पणम् ॥
ऊर्द्ध्वमारुततृष्णाक्षुन्मुखशोषश्रमान्वितैः ।
न कार्य्यं गर्भिणीवृद्ध-बालदुर्ब्बलभीरुभिः ॥ २५ ॥
शोफेषूत्थितमात्रेषु व्रणेषूग्ररुजेषु च ।
यथास्वैरौषधैर्लेपं प्रत्येकन्त्वैव कारयेत् ॥ २६ ॥
यथाप्रज्वलिते वेश्मन्यम्भसा परिषेचनम् ।
क्षिप्रंप्रशमयत्यग्निमेवमालेपनं रुजः ॥ २७ ॥
प्रह्लादने शोधने च शोफस्य हरणे तथा ।
उत्सादने रोपणे च लेपः स्यात् तदर्थकृत् ॥ २८ ॥

वातशोफे तु वेदनोपशमार्थं सर्पिस्तैलधान्याम्लमांसरसवातहरौषधनिःक्वाथैरशीतैः परिषेकान् कुर्व्वीत ॥२९ ॥

पित्तरक्ताभिघातविषनिमित्तेषु क्षीरघृतमधुशर्करोदकेक्षुरसमधुरौषधक्षीरवृक्षनिःक्वाथैरनुष्णैः परिषेकान् कुर्व्वीत ॥३०॥

श्लेष्मशोफे तु तैलमूत्रक्षारोदकसुराशुक्तकफघ्नौषधनिःक्वाथैरशीतैः परिषेकान् कुर्व्वीत ॥३१ ॥

न्तरं यत्र यत्र शोफव्रणयोरुभयोरुपदेशयोग्ये कथ्यते एकतरमात्रमुपदिश्यते तत्र तत्रान्यतरस्याऽप्यर्थाक्षेपादौपदानिको बोधोऽनुष्ठितव्यं नियम्यत इत्यनुसन्धेयम् । शेषास्त्विति । व्रणप्रतीकारहेतवो व्रणप्रतीकारार्थाः । न पुनः शोफप्रतीकारार्था इत्येव कारार्थः । अत्र प्रायेणेत्यपतर्पणनिर्व्वापणयोर्व्यवच्छेदार्थम्, ते हि शोफेष्वप्युपयुज्येते, वक्ष्यति हि "अपतर्पणमाद्य उपक्रमः" इति तथान्यत्रोक्तञ्च "प्रदेहो बहु सर्पिर्भिः शोफनिर्व्वापणः परम्," इति । किन्तु खल्वपतर्पणं शोफेषु नोपयुज्यत इत्याह । अपतर्पणमिति । आद्य इत्यादयतरः प्राग-

यथाम्बुभिः सिच्यमानः शान्तिमग्निर्नियच्छति।
दोषाग्निरेवं सहसा परिषेकेण शाम्यति॥ ३२॥

अभ्यङ्गस्तु दोषमालोक्योपयुक्तो दोषोपशमं मृदुताञ्च करोति।
॥ ३३॥

स्वेदविम्लापनादीनां क्रियाणां प्राक् स उच्यते।
पश्चात् कर्म्मसु चादिष्टः स च विस्रावणादिषु॥ ३४॥
रुजावतां दारुणानां कठिनानां तथैव च।
शोफानां स्वेदनं कार्य्यं ये चाप्येवंविधा व्रणाः॥ ३५॥
स्थिराणां रुजतां मन्दं कार्य्यं विम्लापनं भवेत्।
अभ्यज्य स्वेदयित्वा तु वेणुना वा शनैः शनैः।
विमर्द्दयेद्भिषक् प्राज्ञस्तलेनाङ्गुष्ठकेन वा॥ ३६॥

चलेनोपदिष्टादालेपादपि पूर्व्वं प्रयुज्यत्वात्। सामान्योदोषविशेषानपेक्षः आलेपादयस्तु दोषविशेषमपेक्षन्तइत्याकूतम्। प्रधानतमश्चेति केषाञ्चिदेव शोफजानामित्युन्नेयम्। यथाक्रममेतानि व्यवस्थापयति दोषेत्यादिना। दोषं दोषवत्तं, कार्य्यं शोफव्रणयोरुभयोरेवेति शेषः। ऊर्द्धमारुतीनाम "यथा भुङ्क्ते तथाऽभुङ्क्ते यस्योद्गारो भृशं भवेत्। तस्योर्द्धवातं तं विद्यादुदानव्यानसम्भवम्" इत्युक्तलक्षणो वातविकारः। उत्थितमात्रेष्वचिरोत्थितेषु यथास्वैर्यथादोषं समुदितैर्मिश्रकोक्तैर्वक्ष्यमाणैश्च द्विपञ्चमूल्यादिभिः, प्रत्येकं यथायोगमेकैकेनच तैलौषधेनेत्यर्थः। लेपमालेपम्। प्रह्लादनं वेदनोपशमनेन शान्त्यवस्थापनम् शोफस्य हरणं विलयनम्, रोपणं मांससञ्जननम्। २३—३२॥

सोऽभ्यङ्गः कदोपयुज्यते? आह स्वेदेति। स्वेद॰क्रियाणामिति शेषिकी षष्ठी, कर्म्मसु चेति षष्ठ्यर्थे सप्तमी, स्वेदादिभ्यः प्राक् विस्रावणादिभ्यश्च पश्चा-

शोफयोरुपनाहन्तु कुर्य्यादामविदग्धयोः ।
अविदग्धः शमं याति विदग्धः पाकमेति च ॥ ३७ ॥
निवर्त्तते न यः शोफो विरेकान्तैरुपक्रमैः ।
तस्य सम्पाचनं कुर्य्यात् समाहृतौषधानि तु ।
दधि-तक्र-सुरा-शुक्त-धान्याम्लैर्योजितानि तु ।
स्निग्धानि लवणीकृत्य पचेदुत्कारिकां शुभाम् ॥
सैरण्डपत्रया शोफं नाहयेदुष्णया तया ॥ ३८ ॥
हितं सम्भोजनञ्चापि पाकार्याभिमुखो यदि ॥ ३९ ॥
वेदनोपशमार्थाय तथा पाकशमाय च ।
अचिरोत्पतिते शोफे कुर्य्याच्छोणितमोक्षणम् ॥ ४० ॥
सशोफे कठिने श्यामे सरक्ते वेदनावति ।
संरब्धे विषमे वापि व्रणे विस्रावणं हितम् ॥

दित्यर्थः । दारुणानां स्थिरत्वादिगुणयोगात् भयङ्कराणाम्, एवंविधा वात-कफोल्वणत्वेन स्वेदार्हाः । विस्रावनप्रकारमाह अभ्यज्येति । उपनाहः स्वेदाध्याये वक्ष्यमाणः । निवर्त्ततइत्यादि । औषधानि मिश्रकोक्तानि पाचनानि समाहृत्य यथालाभं संगृह्य स्निग्धानि घृताप्लुतानि लवणीकृत्येति लवणेन संसृष्टानि लवणानि "लवणाल्लुक्" इति पा० सू० ४।४।२४ ठकोलुक् लवणेन संसृज्येत्यर्थः सैरण्डपत्रया एरण्डपत्रोपरिविन्यस्तया तयोत्कारिकया नाहयेदाहत्य बध्नीयादित्यर्थः । अशोष्णयेति विशेषणमात्युपक्तत्वादेवेति गम्यते अतो दोषबलमभिसमीक्ष्य यामाद्यामार्द्धादपनीय पुनर्नाहनं कार्य्यमित्याहुः । अतोष्णानुषङ्गात् पाकानुकूलत्वाच्च सम्भोजनमप्युष्णमेव देयमित्युन्नेयम् । ३३—३९ ।

वेदनेत्यादि । शोणितमोक्षणं जलौकोभिरित्येव । श्यामे हरिद्वर्णे, वेदनाव

सविषे च विशेषेण जलौकोभि: पदैस्तथा ।
वेदनायाः प्रशान्त्यर्थं पाकस्याप्राप्तये तथा ॥ ४१ ॥
सोपद्रवाणां रूक्षाणां कृशानां व्रणशोषिणाम् ।
यथास्वमौषधैः सिद्धं स्नेहपानं विधीयते ॥ ४२ ॥
उत्सन्नमांसे शोफे तु कफजुष्टे विशेषतः ।
संक्लिष्टश्यामरुधिरे व्रणे च च्छर्दनं हितम् ॥ ४३ ॥
वातपित्तप्रदुष्टेषु दीर्घकालानुबन्धिषु ।
विरेचनं प्रशंसन्ति व्रणेषु व्रणकोविदाः ॥ ४४ ॥
अपाकेषु तु शोफेषु कठिनेषु स्थिरेषु च ।
स्नायुकोथादिषु तथा छेदनं प्राप्तमुच्यते ॥ ४५ ॥
अन्तःपूयेष्ववक्त्रेषु तथैवोत्सङ्गवत्स्वपि ।
गतिमत्सु च रोगेषु भेदनं प्राप्तमुच्यते ॥ ४६ ॥
बालवृद्धासहक्षीणभीरूणां योषितामपि ।
मर्म्मोपरि च जातेषु रोगेषूक्तञ्च दारणम् ॥

तीतिमूत्रिवत्तुप् बहुवेदनइत्यर्थः । संरब्धे दाहरागसङ्कुले, विषमे नतोन्नते विस्रावणं प्राग्वच्छोणितावसेचनम् । सविषे विषजुष्टे, पदैः प्रच्छानैः । अत्यर्थमसा शोणितनिर्हरणमन्तरेण कथमपि विषजुष्टे पाकागतिर्वेदना वा निरुध्येते तदिदमुच्यते विशेषेणेति । पुनरिह परार्हनोद्देश्याऽभिधानं व्यवहितान्वयपरिहारार्थम् सोपद्रवाणां वातोपद्रवयुक्तानां । उत्सन्नेत्यादि । अत्र चकारेण-उत्सन्नमांसे तथा कफजुष्टइति व्रणइत्यनेनाऽप्यन्वीयते । दुष्टत्वेन ष्विवर्णं रुधिरमत्रेति संक्लिष्टश्यामरुधिरम् । अपाकाः पाकशून्याः ग्रन्थिमांसादयः । प्राप्तं युक्तमितिपर्य्यायौ अवक्त्रेष्विति "सरूपाणाम्-" इत्येकशेषः । वक्तारहितेष्वीषद्रोष

सुपक्वे पिण्डिते शोफे पीड़नैरवपीड़िते ।
पाकोद्वृत्तेषु दोषेषु तत्तु कार्य्यं विजानता ॥
सुपिष्टैर्दारणद्रव्यैर्युक्तैः क्षारेण वा पुनः ॥ ४७ ॥
कठिनस्थूलवृत्तौष्ठान् दीर्य्यमाणान् पुनः पुनः ।
कठिनोत्सन्नमांसांश्च लेखनेनाचरेद् भिषक् ॥
समं लिखेत् सुलिखितं लिखेन्निरवशेषतः ।
वर्त्मनानुप्रमाणेन समं क्रस्त्रेण निर्लिखेत् ॥
क्षौमं प्लोतं पिचुं फेनं यावशूकं ससैन्धवम् ।
कर्कशानि च पत्राणि लेखनार्थे प्रदापयेत् ॥ ४८ ॥

चेत्यर्थः । उत्सङ्गः क्रोड़ः पृथगङ्गरइतियावत् गतिर्नाड़ी । असहा निसर्गत एवासहिष्णवः । दारणीयावस्थामाह सुपक्वइति । पिण्डिते संहतपूयत्वेन पिण्डाकारत्वमापन्ने, पीड़नैर्मिश्रकोक्तैः पीड़नीयौषधैः, अवपीड़िते समन्तात् प्रपीड़िते पाकोद्वृत्तेषु पाकमतिक्रान्तेष्वतितरां परिपक्वेष्वितियावत । तद्दारणमित्यर्थः । युक्तैर्नात्यर्थं दाहादिकरत्वेन मात्रावत्त्वेनच समुचितैरित्यर्थः क्षारेणवेति प्रागुक्तानां दारणीयौषधानामलाभे प्रतिहतत्वेवेति बोध्यम् । दारणं हि दाहादिकरत्वेनास्पृहणीयमपि व्यापत्तिभयादुपदिश्यत इतिगम्यते, तेनानाशङ्कितायां-व्यापदि भेदनमेवाऽभिनन्दन्ति कुशलाः । ४० – ४७ ॥

कठिनेत्यादि । ओष्ठसाम्यादोष्ठः प्रान्तभागः, लेखनेन दुष्टमांसापनयनार्थं रेखाकारिशस्त्रानुशस्त्रोपयोगेनाचरेत् प्रतिकुर्य्यादित्यर्थः । लेख्यावस्थाविशेषं प्रति पुनर्लेखनप्रकारं विशिनष्टि सममित्यादिना । समं यथायोगं नात्युत्तानशिथिलमित्येतत् । "सर्वेसाधुसमानेषु समम्" इति मेदिनी, लिखेत् कठिनस्थूलवृत्तोष्ठानिति सम्बन्धः । अनुप्रमाणेन विदीर्णभागप्रमाणयोग्येन वर्त्मना शस्त्र-

नाडीव्रणान् शल्यगर्भानुन्मार्गयुत्सङ्गिनः शनैः
करीरवालाङ्गुलिभिरेषण्या वैषयेद्भिषक् ॥ ४९ ॥
नेत्रवर्त्मगुदाभ्यासे-नाड्योऽवक्राः सशोणिताः।
चुच्चुपोदकजैः श्लक्ष्णैः करीरैरेषयेत् तु ताः ॥ ५० ॥
संवृतासंवृतास्वेषु व्रणेषु मतिमान् भिषक्।
यथोक्तमाहरेच्छल्यं प्राप्तोद्धरणलक्षणम् ॥ ५१ ॥
रोगे व्यधनसाध्ये तु यथोद्देशं प्रमाणतः।
शस्त्रं निदध्याद्दोषञ्च स्रावयेत् कीर्त्तितं यथा ॥ ५२ ॥

पदेन निरवशेषतो मनागप्यपरिहार्य्य सुलिखितं विरलत्वादिदोषविरहितं लिखेत् पुनःपुनर्दीर्य्यमाणानिति शेषः। समं सर्व्वशः शस्त्रेण निर्लिखेल्लिखित्वोद्धरेत् कठिनोत्सन्नमांसाञ्चेति योजना। अत्र विशेष्यभूतानां व्रणानां लेखनमभिष्टमिति विशेषणीभूतास्ते ते प्रदेशा एव क्रियया ऽन्वेया विशेष्ये बाधे विशेषणस्यैव मुख्यान्वयित्वेनाभ्युपगमात्। क्षौमतमत्र शणजमेव वस्त्रं, फेनं समुद्रफेनम्। अथानुक्तमपि तुत्थकं शस्तमुपन्याचार्य्याः। नाडीत्यादि। शल्यं कैवल्कादि उन्मार्गिण ऊर्द्ध्वास्यान्, उत्सङ्गिनोऽन्तःकोटरान्, करीरो मरुजो द्रुमभेदस्तस्य नालमत्र ग्राह्यम्। वालाश्चात्र शल्लकीशूकरादीनां रोमाणि, अभ्यासः समीपः, अवक्राः सूक्ष्मास्याः चुच्चुपो विजिज्ञासितव्यः, उदकजाः कशेरुनालादयः। संवृतेत्यादि। शल्यापनयनीयोक्तं विधिमनतिक्रम्येति यथोक्तम्। प्राप्तोद्धरणलक्षणमिति क्रियाविशेषणम् अवाप्तनिःशल्यलिङ्गमित्यर्थः। रोग इत्यादि। व्यधनसाध्येऽविपाकादाविव्यर्थः। अत्र सिराव्यधविधावुद्दिष्टं विधिं स्मारयति यथोद्देशमिति। कीर्त्तितं शोणितवर्णनीये सिराव्यधविधौ चेत्यूह्यम्। दोषं दुष्टशोणितम् ४८—५२ ॥

अपाकोपद्रुता ये च मांसस्था विवृताश्च ये ।
यथोक्तं सीवनं तेषु कार्य्यं सन्धानमेव च ॥ ५३ ॥
पूयगर्भानणुद्वारान् व्रणान् मर्म्मगतानपि ।
यथोक्तैः पीड़नद्रव्यैः समन्तात् परिपीड़येत् ॥
शुष्यमाणमुपेक्षेत प्रदेहं पीड़नं प्रति ।
न चाभिमुखमालिम्पेत् तथा दोषः प्रसिच्यते ॥ ५४ ॥
तैस्तैर्निमित्तैर्बहुधा शोणिते प्रस्रुतेऽशम् ।
कार्य्यं यथोक्तं वैद्येन शोणितास्थापनं भवेत् ॥ ५५ ॥
दाहपाकज्वरवतां व्रणानां पित्तकोपतः ।
रक्तेन चाभिभूतानां कार्य्यं निर्व्वापणं भवेत् ॥
यथोक्तैः शीतलद्रव्यैः क्षीरपिष्टैर्घृतप्लुतैः ॥
दिह्यादबहलाल्लेपान् सुशीतांश्चावचारयेत् ॥ ५६ ॥

अपाकेत्यादि । अपाकिनोऽपि स्युता नितरां पच्यन्ते तदिदमुच्यते अपाकेति । न पाकेनोपद्रुता अपाकोपद्रुताः संशुद्धाः सद्योव्रणाश्चेति निष्कर्षः । अत्र यथोक्तमिति सू० २५ अ० उक्तस्य विधेरनुसरणार्थम् । सीवनं सन्धानञ्चैव कार्य्यं नत्वन्यदिति तात्पर्य्यम् । अनयोः सन्धानन्तु प्रियङ्ग्वादि गणाद्युक्तेनैव कार्य्यम्, "व्रणं कषायः सन्धत्ते" इति स्मरणात् । अत्राविशेषेऽपि महति व्रणे सीवनम् अल्पीयसि च सन्धानमित्यध्यवसेयम् । पूयेत्यादि यथोक्तैरित्रकोक्तैः समन्तात् सर्व्वतः । पीड़नं प्रति शुष्यमाणं प्रदेहं उपेक्षेत उद्धरेदित्यर्थः । तैरित्यादि । तैस्तैः शिराच्छेदादिभिरित्यर्थः । अत्र शोणितवर्णनीयोक्तं विधिमवगाहयितुमिदमुच्यते यथोक्तमिति । दाहेत्यादि । अत्र केवलं व्रणानामित्युक्तेऽपि "शेषास्तु प्रायेण व्रण प्रतीकारहेतवएव" इतिमागुक्तार्थमनुसन्धाय

व्रणेषु क्षीणमांसेषु तनुस्रावित्वपाकिषु ।
तोदकाठिन्यपारुष्य-शूलवेपथुमत्सु च ॥
वातघ्नवर्गेऽम्लगणे काकोल्यादिगणे तथा ।
स्नैहिकेषु च वीजेषु पचेदुत्कारिकां शुभाम् ॥
तेषाञ्च स्वेदनं कार्य्यं ——————— ॥५७॥
———————————स्थिराणां वेदनावताम् ।
दुर्गन्धानां क्लेदवतां पिच्छिलानां विशेषतः ।
कषायैः शोधनं कार्य्यं शोधनैः प्रागुदीरितैः ॥ ५८ ॥

शोफा नाह्वेत्युक्तेयम् । उक्तमर्थं पुनः प्रपञ्चेनावगमयतियथोक्तैरित्यादिना । यथोक्तैः सू॰ ३५ । ३८ । ४० अध्यायोक्तैर्दूर्व्वादिभिः पित्तसंशमन वर्गैर्मधुर-वर्गैश्चेत्यर्थः । बहलोहि रोमकूपानेकान्तेन पिधायोष्माणं निरुणद्धि तदिदमुच्यते ऽबहलानिति । अबहलान् तनून्, सुशीतान् क्षारक्षुरसशतधौतघृतादींश्चे-त्यर्थः । व्रणेष्वित्यादि । क्षीणेत्यादिनोक्तलक्षणेषु व्रणेषु दृश्यमानेषु पचेदिति-सम्बन्धः । वेपथुशब्दस्येह स्फुरणएव तात्पर्य्यमितिगम्यते वातव्रणलिङ्गत्वात् । वातघ्नवर्गोभद्रदार्व्वादिर्वातसंशमनोवर्गः, अम्लवर्गो दाड़िमादिरम्लवर्गः, गणा-स्त्वेते सू॰ ३९ । ४२ । ३८ अध्यायोपदिष्टाः । स्नैहिकानि वीजानि तिला-तसीप्रभृतीनि । तेषां व्रणानां स्वेदनं कार्य्यमिति "पुलटीश" इतिप्रसिद्ध-स्याकारेण वस्त्रान्तर्विन्यस्तया तयोत्कारिकयेति शेषः । अत्र स्वेदनं कार्य्य-मित्युपदेशाद्यामाद्यामाद्वाद्वा दोषवलमभिसमीक्ष्यापवर्त्तयन्ति कुशलाः । कषायविषयं दर्शयति स्थिराणामित्यादिना । स्थिराणां सान्तर्दोषत्वेन दृढ़ा-नाम् । प्रागुदीरितैर्निम्बकोक्तैः शोधनैः शङ्खिनीप्रभृतिभिः शोधनीयैः । ५७ । ५८ ॥

अन्तःशल्यानमुखान् गम्भीरान् मांससंश्रितान् ।
शोधनद्रव्ययुक्ताभिर्वर्त्तिभिस्तान् यथाक्रमम् ॥
पूतिमांसप्रतिच्छन्नान् महादोषांश्च शोधयेत् ।
कल्कीकृतैर्यथालाभं वर्त्तिद्रव्यैः पुरोदितैः ॥
पित्तप्रदुष्टान् गम्भीरान् दाहपाकप्रपीड़ितान् ।
कार्पासीफलमिश्रेण जयेच्छोधनसर्पिषा ॥
उत्सन्नमांसानस्निग्धानल्पास्रावान् व्रणांस्तथा ।
सर्षपस्नेहयुक्तेन धीमांस्तैलेन शोधयेत् ॥
तैलेनाशुध्यमानानां शोधनीयां रसक्रियाम् ।
व्रणानां स्थिरमांसानां कुर्य्याद् द्रव्यैरुदीरितैः ॥
कषाये विधिवत् तेषां कृते व्यामिश्रयेत् पुनः ।
सुराष्ट्रजां सकासीसां दद्याच्चापि मनःशिलाम् ॥

अन्तरित्यादि । अन्तःशल्यादयो व्रणा इह स्वल्पपूतिमांसाः स्वल्पदोषाश्च वेदितव्याः, अनन्तरं तत्प्रतियोगिनां कल्कोपयोगात् । शोधनद्रव्याणि मिश्रकाख्यसंशोधनवर्त्त्युपदिष्टानि । पूतीत्यादि । अत्र चकारात् पूतीत्यादिनोक्तलक्षणांस्तु तानन्तःशल्यादींश्चतुरो व्रणानित्यर्थः । पुरोदितैः मिश्रकोक्तैः । पित्तेत्यादि । शोधनसर्पिषेति मिश्रकोक्तैः कासीसकटुरोहिण्यादिभिरर्कादिभिर्वा सिद्धेन सर्पिषेत्यर्थः । अत्र कार्पासीफलमिश्रेणेति विशेषणं कार्पासतूलकेन सहास्योपयोगार्थम् । उत्सन्नेत्यादि । उत्सन्नमांसानुन्नतदुष्टमांसान् सर्षपस्नेहयुक्तेन समभितसर्षपतैलान्वितेन तैलेन तिलतैलेनेति, मिश्रकोक्तकासीसादि सिद्धेन मयूरकादिसिद्धेन वेत्यूह्यं भवति, शोधयेदिति शोधनकर्मण्योपयोगिकत्वात् । तैलेनेत्यादि । स्थिरमांसानां दृढदुष्टमांसानाम् । उदीरितैः मिश्रकोक्तैः सालसारादिप्रभृतिभिः । उक्तमर्थं पुनः स्फोरयति कषाय इति ।

हरितालञ्च मतिमांस्ततस्तामवचारयेत् ।
मातुलुङ्गरसोपेतां सक्षौद्रामतिमर्द्दिताम् ॥
व्रणेषु दत्त्वा तां तिष्ठेत् त्रींस्त्रींश्च दिवसान् परम् ॥ ५९ ॥
गम्भीरान् मेदसा जुष्टान् दुर्गन्धांश्चूर्णशोधनैः ॥
उपाचरेद्भिषक् प्राज्ञः शुद्ध्या शोधनवर्त्तिजैः ॥ ६० ॥
शुद्धलक्षणयुक्तानां कषायं रोपणं हितम् ।
तच्च कार्य्यं यथोद्दिष्टैर्द्रव्यैर्वैद्येन जानता ॥ ६१ ॥
अवेदनानां शुद्धानां गम्भीराणां तथैव च ।
हिता रोपणवर्त्त्यङ्गकृता रोपणवर्त्तयः ॥ ६२ ॥
अपेतपूतिमांसानां मांसस्थानामरोहताम् ।
कल्कः संरोहणः कार्य्यस्तिलजो मधुकान्वितः ॥

विधिवदिति घनीभूतत्वेनेत्येव " पक्वः क्वाथः पुनः पाकाद् घनीभूतो रसक्रिया " इति हि भिषजामाभाणकः । अत्र सुराष्ट्रजादीनि समुदितानि क्वाथात् षोड़शांशानि क्षौद्रमातुलुङ्गरसौ चार्द्रत्वसम्पादकावेव ग्राह्यौ । अत्र सुराष्ट्रजा नाम " फटकारी " इत्याख्यायते । अत्र त्रींस्त्रींश्चेति वीप्सानिर्देशाद्दासंशुद्धेस्त्र्यहात्त्र्यहान्मोचनं कार्य्यमित्यवाप्तं भवति । क्रमागतावचूर्णनविषयं दर्शयति गम्भीरानित्यादिना । शोधनवर्त्तिजैर्निम्बकोशातकीगन्धादिशोधनवर्त्तिकृतैः शोधनानि चूर्णानि चूर्णशोधनानि तैस्तथोक्तैरवचूर्णितैरिति शेषः । ५९ । ६० ॥

पूर्व्वमत्र कषायादीन्यवचूर्णनान्तानि सप्त शोधनरोपणानीति निर्दिष्टं तत्र च शोधनानि तान्युपदिष्टान्युपदेक्ष्यन्ते चेतराणीत्याह शुद्धेत्यादि । कषायं क्वाथः । यथोद्दिष्टैर्निम्बकाक्षीवटादिलगात्मकैर्द्रव्यैरित्यर्थः ।

स माधुर्य्यात् तथौष्ण्याच्च स्नेहाच्चानिलनाशनः ।
कषायभावान्माधुर्य्यात् तिक्तत्वाच्चापि पित्तहृत् ।
औष्ण्यात् कषायभावाच्च तिक्तत्वाच्च कफे हितः ॥
शोधयेद्रोपयेच्चापि युक्तः शोधनरोपणैः ।
निम्बपत्रमधुभ्यान्तु युक्तः संशोधनः स्मृतः ॥
पूर्व्वाभ्यां सर्पिषा चापि युक्तः संरोपणो भवेत् ॥ ६३ ॥
तिलवद्यवकल्कन्तु केचिदाहुर्मनीषिणः ॥ ६४ ॥
शमयेदविदग्धञ्च विदग्धमपि पाचयेत् ।
पक्वं भिनत्ति भिन्नञ्च शोधयेद्रोपयेत् तथा ॥ ६५ ॥
पित्तरक्तविषागन्तून् गभीरानपि च व्रणान् ।
रोपयेद्रोपणीयेन क्षीरसिद्धेन सर्पिषा ॥ ६६ ॥
कफवाताभिभूतानां व्रणानां मतिमान् भिषक् ।
कारयेद्रोपणं तैलं भेषजैस्तैर्यथोदितैः ॥ ६७ ॥
अवन्ध्यानां चलस्थानां शुद्धानाञ्च प्रदुष्यताम् ।

नेह काथापरपर्य्यायस्य कषायशब्दस्य क्लीवत्वमनुपपन्नं "घृतशीतं कषायं वा रोपणार्थेषु शस्यते" इत्यादिप्रयोगदर्शनात् । अवेदनानामित्यादि । अत्र शुद्धलक्षणत्वेनैवावेदनत्वे लब्धे पुनरवेदनानामिति विशेषणमेकान्ततो वेदनारहितत्वमाख्यातुम्, रोपणवर्त्त्यङ्गानि मिश्रकोक्तसोमाद्यतादीनि । अपेतेत्यादि । अपेतपूतिमांसानां निर्गतपूतिमांसानाम् । पूर्व्वाभ्यां निम्बपत्रमधुभ्याम् । रोपणीयेन निम्बकोलत्वक्पर्ण्यादिरोपणीयौषधगर्भत्वाद्रोपणाय हितेनेत्यर्थः । ६१ । ६६ ॥

हरिद्रायुतां कुर्य्याद्रोपणार्थां रसक्रियाम् ॥ ६८ ॥
समानां स्थिरमांसानां त्वक्स्थानां रोपणं भिषक् ।
चूर्णं विदध्यान्मतिमान् प्राक्स्थानोक्तो विधिर्यथा ॥ ६९ ॥
शोधनो रोपणश्चैव विधिर्योऽयं प्रकीर्त्तितः ।
सर्व्वव्रणानां सामान्येनोक्तो दोषाविशेषतः ॥
एष आगमसिद्धत्वात् तथैव फलदर्शनात् ।
मन्त्रवत् संप्रयोक्तव्यो न मीमांस्यः कथञ्चन ॥
स्वबुद्ध्या चापि विभजेत् कषायादिषु सप्तसु ।
भेषजानि यथायोगं यान्युक्तानि पुरा मया ॥ ७० ॥
आद्ये द्वे पञ्चमूल्यौ तु गणो यश्चानिलापहः ।
स वातदुष्टे दातव्यः कषायादिषु सप्तसु ॥ ७१ ॥
न्यग्रोधादिर्गणो यस्तु काकोल्यादिश्च यः स्मृतः ।
तौ पित्तदुष्टे दातव्यौ कषायादिषु सप्तसु ॥ ७२ ॥
आरग्वधादिस्तु गणो यश्चोषाः परिकीर्त्तितः ।

कल्केत्यादि। यथोदितैर्मिश्रकोक्तकालानुसार्य्यादिभिरित्यर्थः। अवन्ध्यानामि-त्यादि। अवन्ध्यानां वक्ष्यमाणवर्णानां पित्तजादीनाम्, चलस्थानां चल-सन्धिजानां, प्रदुष्यतां शुक्लवर्णमपाकृत्य दुष्टिमापद्यमानानाञ्चेत्यर्थः। रोपणायां "त्वक्तु न्यग्रोधवर्गस्येत्यादिना मिश्रकोक्तामित्याकूतम्। समाना-मित्यादि। प्राक्स्थानोक्तः "कङ्कुकात्रिफला" इत्यादिना मिश्रकोक्तो विधि र्यथा तथा चूर्णं विदध्यादिति तात्पर्य्यम्। कथञ्चन केनाप्यं-शेन न मीमांस्यः कथमेवमित्येवं नविचार्य्यः प्रभावस्याचिन्त्यत्वादिति सन्दर्भः स्वबुद्ध्येत्यादि। अत्र सर्व्वेषामेव बुद्धिपरिकल्पत्वे सत्यपि कषा-

तौ देयौ कफदुष्टे तु———————— ॥ ७३ ॥
— — — ——— संसृष्टे संयुता गणाः ॥ ७४ ॥
वातात्मकानुग्ररुजान् स्रावावानपि च व्रणान् ।
सर्व्वौमयवंसर्पिर्भिर्धूपनाङ्गैश्च धूपयेत् ॥ ७५ ॥
परिशुष्काल्पमांसानां गम्भीराणां तथैव च ।
कुर्य्यादुत्सादनीयानि सर्पींष्यालेपनानि च ॥
मांसाशिनाञ्च मांसानि भक्षयेद्विधिवन्नरः ।
विशुद्धमनसस्तस्य मांसं मांसेन वर्द्धते ॥ ७६ ॥
उत्सन्नमृदुमांसानां व्रणानामवसादनम् ।
कुर्य्याद्द्रव्यैर्यथोद्दिष्टैः सुपिष्टैर्मधुना सह ॥ ७७ ॥
कठिनानाममांसानां दुष्टानां मातरिश्वना ।

यादिनामुपदेशः शोधनरोपणत्वेन प्राधान्यात् सन्निहितत्वाद्देत्युन्नेयम् उक्तमर्थं स्पष्टेनावगमयति कल्क इत्यादिना । ६७ । ७४ ॥

वातेत्यादि । धूपनाङ्गैर्मिश्रकोक्तैः श्रीवेष्टकादिभिः । परीत्यादि । उत्सादनीयानि मिश्रकोक्तापामार्गाद्युत्सादनौषधसिद्धत्वात् मांसाऽभिवृद्धौ सम-र्थाय हितानीत्यर्थः । मांसाशिनां गृध्रगोमायुप्रभृतीनाम् । विधिमर्ह-तीति विधिवत् विधिश्चान्नपानाध्यायोपदिष्टः शोषप्रतिषेधे विवक्षित-स्तथा " सिंहानृक्षांस्तरक्षूंश्च व्याघ्रानेवं विधांस्तथा । मांसादान् मृगश-ब्देन दद्यान्मांसाऽभिवृद्धये " इत्यादिचरकोक्तोजुगुप्सितत्वेनानवगमकश्च सत्वणीयः । तथाच विशुद्धमनसः सुसंस्कृतत्वादिना जुगुप्सितत्वेनान-वबुद्धतया च प्रहृष्टमनस इत्यर्थः । उत्सन्नेत्यादि यथोद्दिष्टैः मिश्रकोक्तैः कासी-ससैन्धवादिभिः । कठिनानामित्यादि । कठिनानामल्पमांसानां मातरि-

मृद्वी क्रिया विधातव्या शोणितञ्चापि मोक्षयेत्।
वातघ्नौषधसंयुक्तान् स्नेहान् सेकांश्च कारयेत्॥
धवप्रियङ्ग्वशोकानां रोहिण्याश्च त्वचस्तथा॥ ७८॥
व्रणेषु मृदुमांसेषु दारुणीकरणं हितम्॥
त्रिफलाधातकीपुष्प-रोध्रसर्ज्जरसान् समान्॥
कृत्वा सूक्ष्माणि चूर्णानि व्रणं तैरवचूर्णयेत्॥ ७९॥
उत्सन्नमांसान् कठिनान् कण्डूयुक्तांश्चिरोत्थितान्।
तथैव खलु दुःशोधाञ्छोधयेत् क्षारकर्म्मणा॥ ८०॥
स्रवतोऽश्मभवान् मूत्रं ये चान्ये रक्तवाहिनः।
निःशेषच्छिन्नसर्व्वांश्च साधयेदग्निकर्म्मणा॥ ८१॥
दूरूढ़त्वात् तु शुक्लानां कृष्णकर्म्म हितं भवेत्।

स्वना वायुना, मृद्वीक्रिया वातोपशमनेन मृदूकरणार्थं मृदुसंशोधनीक्रिया स्नेहाद्युपयोगपुरःसरस्त्वकाद्युपयोग इतियावत्। शोणितञ्चाऽपि मोक्षयेज्जलौकादिभिरित्येव। वातघ्नौषधानि भद्रदार्व्वादीनि, सिच्यन्ते एभिरिति सेकाः कषायास्तेऽपि वातघ्नौषधसंसिद्धा एवेति चकारेणावगमयति। रोहिण्यत्र हरीतकी। व्रणेष्विति विधिरयं समतलमृदुमांसविषयइत्यवगन्तव्यम् प्राक्गम्भीराणामुत्सन्नमृदुमांसानाञ्चोत्साद्यत्वेनावसाद्यत्वेन चोपदेशात्। तत्प्रकारमाह त्रिफलेति। स्रवत इत्यादि। मूत्रं स्रवतः स्रावयतोऽश्मभवान् अश्मर्य्याहरणार्थं कृतानित्यर्थः। निःशेषं छिन्नाः सन्धानभूमयो येषांते निःशेषच्छिन्नसन्धय:। "छिन्नाश्च सन्धयोयेषां" इति तन्त्रान्तरञ्च। ७९। ८१॥ दूरूढ़त्वादिति। दूरूढ़त्वात् विकृत्या रूढ़त्वात् शुक्लानां शुक्लवर्णमापन्नाना-

भल्लातकान् वासयेत् तु क्षीरे प्राङ्मूत्रभावितान् ॥
ततो द्विधा च्छेदयित्वा लौहे कुम्भे निधापयेत् ॥
कुम्भेऽन्यस्मिन् निखाते तु तं कुम्भमथ योजयेत् ॥
मुखं मुखेन सन्धाय गोमयैर्दाहयेत् ततः ॥
यः स्नेहस्रवते तस्माद्ग्राहयेत् तं शनैर्भिषक् ॥
ग्राम्यानूपशफान् दग्ध्वा सूक्ष्मचूर्णानि कारयेत् ।
तैलेनानेन संसृष्टं शक्तमालेपयेद्व्रणम् ॥ ८२ ॥
भल्लातकविधानेन सारस्नेहांस्तु कारयेत् ।
ये च केचित् फलस्नेहा विधानं तेषु कीर्त्तितम् ॥ ८३ ॥
दूरूढत्वात् तु कृष्णानां पाण्डुकर्म्म हितं भवेत् ।
सप्तरात्रं स्थितं क्षीरे च्छागले रोहिणीफलम् ।
तेनैव पिष्टं सुश्लक्ष्णं सवर्णकरणं हितम् ॥ ८४ ॥

मित्यर्थः । कृष्णकर्म्म कृष्णीकरणं तत्प्रकारमाह भल्लातकानिति । भल्लातकान् भल्लातकफलानि पुंस्त्वमविवक्षितं भूरिप्रयोगदर्शनात् । मूत्रभावितान् सप्तरात्रं रात्रौ गोमूत्रवासितान् दिवा चातपे शुष्कानित्यर्थः । आम्नायते हि "दिवा दिवातपे शुष्कम्, रात्रौ रात्रौ निवासयेत्" इत्युपक्रम्य "सप्ताहं भावना विधिः" इति । क्षीरे वासयेदित्यामृदुत्वादेव, लौहे कुम्भ इति केशगुच्छप्रलम्बितावधिच्छिद्र इत्येव, यथानन्तरं निखाते खनित्वा स्थापिते कुम्भ इत्यविशेषेणोक्तेऽपि स्नेहभाविते मृण्मय इत्युक्तेयं निःसृतभल्लातकस्नेहशोषदृष्टिभयादित्याहुः । तं निहितभल्लातकं लौहकुम्भं योजयेत्-स्थापयेत् ततो मुखेन अधोमुखेन मुखं तल्लौहकुम्भमुखं सन्धाय दाहयेत् कृष्णमृत्तिकाभिरवलिप्येति चरकसंवादादूह्यम् । ग्राहयेत् ग्रहीतुं निधापयेदित्यर्थः । ग्राम्यानूपशफान् छागमहिषादीनां खुरानित्यर्थः ।

नवं कपालिकाचूर्णं वैदुलं सर्ज्जनाम च ॥
कासीसं मधुकञ्चैव क्षौद्रयुक्तं प्रलेपयेत् ॥ ८५ ॥
कपित्थमुद्धृते मांसे मूत्रेणाजेन पूरयेत् ।
कासीसं रोचनां तुत्थं हरितालं मनःशिलाम् ॥
वेणुनिर्लेखनञ्चापि 'प्रपुन्नाड़रसाञ्जनम्'।
अधस्तादर्ज्जुनस्यैतन्मासं भूमौ निधापयेत् ।
मासादूर्द्धं ततस्तेन कृष्णमालेपयेद्व्रणम् ॥ ८६ ॥
कुक्कुटाण्डकपालानि कतकं मधुकं समम् ।
तथा समुद्रमण्डूकीमणिचूर्णञ्च दापयेत् ॥
गुटिका मूत्रपिष्टास्ता व्रणानां प्रतिसारणम् ॥ ८७ ॥
हस्तिदन्तमसीं कृत्वा मुख्यञ्चैव रसाञ्जनम् ।

पुंस्त्वमार्षम् । शुक्लं शुक्लत्वेन "चिरंरूढ़" मित्यर्थः । विधिमिमं सारस्नेह-फलस्नेहयोरप्यतिदिशति भल्लातकेत्यादिना कीर्त्तितमित्यन्तेन । सारो देव-दार्व्वादिः । कारयेत् तत्तद्ग्धशफयोगेन कृष्णीकरणार्थमितिसन्दर्भः । ये केचित् फलस्नेहा विभीतकादिस्नेहा आयुर्व्वेदे उपदिश्यन्ते तेषु च कीर्त्तितं भल्लातकोपदिष्टं विधानं विधिं कारयेदिति पूर्व्वेणान्वयः । रूढ़-त्वादिति । कृष्णानां कृष्णवर्णमापन्नानामित्यर्थः । पाण्डुकर्म्मप्रकारमाह नवेति । रोहिणी गाम्भारी । कपालिका मृण्मयभाण्डखण्डम् । वैदुलं वेतस चूर्णम्, सर्ज्जनाम ,सालनिर्य्यासः । कपित्थमित्यादि । मांससदृशत्वान्मांसे चर्म्मावयवे उद्धृते कपित्थं कपित्थकपालमित्येतत् ,रोचना गोरोचना , वेणुनि र्लेखनं छिन्नीत्वोद्धृता वंशत्वक् , प्रपुन्नाड़ चक्रमर्द्दबीजम् अर्ज्जुनस्य स्वनामप्रसिद्धस्य वृक्षस्य । ८१ ॥ ८६ ॥

रोमाण्येतेन जायन्ते लेपात् पाणितलेष्वपि ॥ ८८ ॥
चतुष्पदानां त्वग्रोम-खुरशृङ्गास्थिभस्मना ।
तैलाक्ता चूर्णिता भूमिर्भवेद्रोमवती पुनः ॥ ८९ ॥
कासीसं नक्तमालस्य पल्लवांश्चैव संहरेत् ।
कपित्थरसपिष्टानि रोमसञ्जननं परम् ॥ ९० ॥
रोमाकीर्णो व्रणो यस्तु न सम्यगुपरोहति ।
क्षुरकर्त्तरिसन्दंशैस्तस्य रोमाणि निर्हरेत् ॥ ९१ ॥
शङ्खचूर्णस्य भागौ द्वौ हरितालस्य भागिकम् ।
शुक्तेन सह पिष्टानि लोमशातनमुत्तमम् ॥ ९२ ॥
तैलं भल्लातकस्याथ स्नुहीक्षीरं तथैव च ।
प्रदद्यादेकशो मतिमान् रोमशातनमुत्तमम् ॥ ९३ ॥
कदलीदीर्घवृन्ताभ्यां भस्मालं लवणं शमी ।
बीजं शीतोदपिष्टं वा रोमशातनमाचरेत् ॥ ९४ ॥
आगारगोधिकापुच्छं रम्भालं बीजमैङ्गुदम् ।
दग्ध्वा तद्भस्मतैलाम्बु सूर्य्यपक्वं कचान्तकृत् ॥ ९५ ॥

कुक्कुटेत्यादि । कतकंनाम "निर्म्मली" इत्याख्यायते । समुद्रमण्डूकी शुक्तिः, मणयः स्फटिकादयः । प्रतिसारणमिदं सवर्णतामापन्नानां पुनः कृष्णता सम्पादनार्थमित्यन्वेयम् । हस्तीत्यादि । चतुष्पदमिति विशेषणं दार्व्वीरसाञ्जनप्रतिषेधार्थम्, पाणितलेष्वपीति स्तुतिरेवालेपस्य पाणितलेष्वप्यनेन रोमाणि जायन्ते किमुतान्यत्रेत्याकूतम् । नक्तमालः करञ्जः रोमेत्यादि । कर्त्तरीनाम "केची" इतिविज्ञायते, सन्दंशस्योपयोगस्तु नासा रोमापहरणादौ द्रष्टव्यः । दीर्घवृन्तः श्योनाकः, भालं हरि-

वातदुष्टो व्रणो यस्तु रूक्षश्चात्यर्थवेदनः ।
अधःकायं विशेषेण तत्र वस्तिर्विधीयते ॥ ९६ ॥
मूत्राघाते मूत्रदोषे शुक्रदोषेऽश्मरीव्रणे ।
तथैवार्त्तवदोषे च वस्तिरप्युत्तरो हितः ॥ ९७ ॥
यस्मात्कुष्यति बन्धेन व्रणो याति च मार्द्दवम् ।
रोहत्यपि च निःशङ्कस्तस्माद्बन्धो विधीयते ॥ ९८ ॥
स्थिराणामल्पमांसानां रौक्ष्यादनुपरोहताम् ।
पत्रदानं भवेत् कार्य्यं यथादोषं यथर्त्तु च ॥
एरण्डभूर्ज्जपूतीक-हरिद्राणान्तु वातजे ।
पत्रमाश्ववलं यच्च काश्मरीपत्रमेव च ॥
पत्राणि क्षीरवृक्षाणामौदकानि तथैव च ।
दूषिते रक्तपित्ताभ्यां व्रणे दद्याद्विचक्षणः ॥
पाठामूर्व्वागुडूचीनां काकमाचीहरिद्रयोः ।
पत्रञ्च शुक्रनाशाय योजयेत् कफजे व्रणे ॥ ९९ ॥

तासां, गर्भोबीजमिति षष्ठीसमासः । आगारगोधिका गृहगोधिका "टिकटिकी" इत्याख्यायते । रम्भा कदलीतरुः । अत्र समघृते तैलाम्बुनी तावदेव प्रक्षेप्ये यावता सर्व्वमेतदार्द्रीं भवति ॥ ८७—९६ ॥

मूत्रेत्यादि । अत्र व्रणेतरेषां मूत्राघातादीनामुपदेशः प्रासङ्गिकः । यस्मादित्यादि । विधीयते पूर्व्वोक्तेन विधिनेति शेषः । स्थिराणामित्यादि । पत्रं यथर्त्तु चेति मतान्तराऽभिप्रायेणोक्तमिति निश्चीयते अनन्तरं पत्रदानं प्रति ऋतूनां निमित्तत्वेनानुपदेशात् । भूर्ज्जशब्देनेह भूर्ज्जपत्रत्वगेवाऽभिप्रेयते पत्रसाम्यान्मृदुत्वादिगुणयोगाच्च, वक्ष्यति हि "मृदु च पत्रं गुणवदुच्यते"

अकर्कशमविक्लिन्नमजीर्णं सुकुमारकम् ।
अजन्तुजग्धं मृदु च पत्रं गुणवदुच्यते ॥ १०० ॥
स्नेहमौषधसारञ्च पट्टवस्त्रान्तरीकृतम् ।
न दूषयति यत् पत्रं लेपस्योपरि दापयेत् ॥ १०१ ॥
शैत्योष्णजननार्थाय स्नेहसंग्रहणाय च ।
दद्यादौषधेषु दातव्यं पत्रं वेदोन जानता ॥ १०२ ॥
मक्षिका व्रणजातस्य निक्षिपन्ति यदा क्रिमीन् ।
श्वयथुर्भक्षिते तैस्तु जायते भृशदारुणः ॥
तीव्रा रुजो विचित्राश्च रक्तास्रावश्च जायते ।
सुरसादिर्हितस्तत्र धावने पूरणे तथा ॥
सप्तपर्ण-करञ्जार्क-निम्ब-राजादनत्वचः ।
हिता गोमूत्रपिष्टाश्च सेकः क्षारोदकेन वा ॥
प्रच्छाद्य मांसपेश्या च क्रिमीनपहरेद्व्रणात् ।

इति । अश्ववला उपोदिका तस्या इदमाश्ववलम् । शुकनासा श्योनाकः । व्रण इत्यौषधान्तर विरहित एव । तानि पुन र्विशिनष्टि अकर्कश मित्यादिना । अविक्लिन्नमकुथितं सुकुमारमतिकोमलं गुणवत् प्रकृष्टगुणमित्यर्थः प्रशंसायां वतुप् । अत्रानुक्तान्यपि कपीतनदारकपमसकदम्बपत्राणि दोषविशेषमनपेक्ष्योपयुञ्जन्ति कुशलाः । स्नेहादीन्युपयुज्याऽपि तदुपरि 'कदलीपत्रादीनि प्रयुञ्जन्ति स्नेहमित्यादिना । औषधसारं कल्कादिरसं दूषयति बहिर्निःसार्यापचिनोतीत्यर्थः । लेपस्य प्रयुक्तस्य स्नेहादेरित्यर्थः ॥ ९७—१०२ ॥

मक्षिका इत्यादि । सुरसादिः सू० ३८ अ० द्रष्टव्यः । राजादनः पियालः । क्षारोदकेन संस्रुत्व: परिस्रुतेन पलाशादिक्षारजलेन, एवमुक्तेऽपि

विंशतिं क्रिमिजातींस्तु वक्ष्याम्युपरि भागशः॥ १०३ ॥
दीर्घकालातुराणान्तु कृशानां व्रणशोषिणाम्।
बृंहणीयो विधिः सर्व्वः कार्य्योऽग्निं परिरक्षता॥ १०४ ॥
विषजुष्टस्य विज्ञानं विषनिश्चयमेव च।
चिकित्सितञ्च वक्ष्यामि कल्पे तु प्रतिभागशः॥ १०५ ॥
कण्डूमन्तः सशोफाश्च ये च जत्रूपरि व्रणाः।
शिरोविरेचनं तेषु विदध्यात् कुशलो भिषक्॥ १०६ ॥
रुजावन्तोऽनिलाविष्टा रूक्षा ये चोर्द्ध्वजत्रुजाः।
व्रणेषु तेषु कर्त्तव्यं नस्यं वैद्येन जानता॥ १०७ ॥
दोषप्रच्यवनार्थाय रुजादाहक्षयाय च।
जिह्वादन्तसमुत्थस्य हरणार्थं मलस्य च॥
शोधनो रोपणश्चैव व्रणस्य मुखजस्य वै।
उष्णो वा यदि वा शीतः कवलग्रह इष्यते॥ १०८ ॥
ऊर्द्ध्वजत्रुगतान् रोगान् व्रणांश्च कफवातजान्।
शोफस्रावरुजायुक्तान् धूमपानैरुपाचरेत्॥ १०९ ॥
क्षतोष्मणो निग्रहार्थं सन्धानार्थं तथैव च।
सद्योव्रणेष्वायतेषु क्षौद्रसर्पिर्विधीयते॥ ११० ॥

वयन्तु "तारपिन" इति समाख्यातेन तैलविशेषेणैव क्रिमीनपहरामः। उपरि "उ० ५४" अध्याये इत्यर्थः॥ ९७—१०३॥

दीर्घेत्यादि। दीर्घकालातुराणां सुचिरं ज्वरादिभिः प्रपीड़ितानां तथा कृशानां निसर्गतएव क्षीणानां व्रणिनां व्रणशोषिणाञ्चेति तुकारेण समुच्चीयते। बृंहणीयो विधिर्मांसरसाद्युपयोगः। कण्ड्वित्यादि, इहोपदिष्टानि

अवगाढास्त्वणुमुखा ये व्रणाः शल्यपीड़िताः।
निवृत्तशल्योद्धरणा यन्त्रं तेषु विधीयते ॥ १११ ॥
लघुमात्रो लघुश्चैव स्निग्ध उष्णोऽग्निदीपनः।
सर्व्वव्रणेभ्यो देयस्तु सदाहारो विजानता ॥ ११२ ॥
निशाचरेभ्यो रक्ष्यस्तु नित्यमेव क्षतातुरः।
रक्षाविधानैरुद्दिष्टैर्यमैः सनियमैस्तथा ॥ ११३ ॥
षण्मूलोऽष्टपरिग्राही पञ्चलक्षणलक्षितः।
षष्ट्युपक्रमनिर्द्दिष्टश्चतुर्भिः साध्यते व्रणः ॥ ११४ ॥

शिरोविरेचनादीनि चत्वारि "चि० ४० अ०" समीक्ष्य कार्य्याणि। अर्बुदत्वादौ व्रणा अप्यूर्द्ध्वजत्रुगता एव। रोगानिति रोगसामान्यस्येहोपदेशः शिरश्शिरश्चयित्रश्चेत्यदोषः। क्षतेत्यादि। सर्पिरिदमसंस्कृतमेव संस्कृतस्य प्रागुपयोगात्। अवेत्यादि। अवगाढ़ा अत्यर्थं गम्भीराः, उद्धार्य्यतेऽनेनेत्युद्धरणम्, विरतं हस्ताभ्यामुद्धरणं शल्योद्धरणरयत्नजातं यत्रेति निवृत्तशल्योद्धरणाः ॥ १०४—११२ ॥

निशेत्यादि। उद्दिष्टैः सू० ५ अ० संक्षेपेणोपदिष्टैः। यमैरहिंसादिभिः, नियमैर्यथायोगं शौचादिभिः, स्मरन्ति हि—"अहिंसासत्यवचनं ब्रह्मचर्य्यमकल्कता। अस्तेयमिति पञ्चैव यमाख्यानि व्रतानि च" ॥ तथा—"शौचं तुष्टिश्च सन्तोषस्तपश्चेन्द्रियनिग्रहः"। इत्युपक्रम्य "नियमाः स्मृताः" इति। व्याससमासाभ्यामुपदिष्टोऽप्यर्थः प्रभवत्यलं प्रत्ययायेत्याह षड़िति। वातपित्तकफशोणितसन्निपाताऽभिघाता, मूलमस्येति षण्मूलः। अत्र सन्निपातग्रहणेनैव संसृष्टानामपि परिग्रहः क्रियते संयुक्तत्वसामान्यात्। अष्टौ "सू० २२ अ०" उक्तानि त्वगादीनि परिग्रहीतुम् शीलमस्येत्यष्टपरिग्राही, आग-

योऽल्पौषधकृतो योगो वहुधन्वभयान्मया ।
द्रव्याणां तत्समानानां तत्रावापो न दुष्यति ॥ ११५ ॥
प्रसङ्गाभिहितो यो वा वहुदुर्लभभेषजः ।
यथोपपत्ति तत्रापि कार्य्यमेवं चिकित्सितम् ॥ ११६ ॥
गणोक्तमपि यद्द्रव्यं भवेद्याधावयौगिकम् ।
तदुद्धरेद्यौगिकन्तु प्रक्षिपेदप्यकीर्त्तितम् ॥ ११७ ॥
उपद्रवास्तु द्विविधा व्रणस्य व्रणितस्य च ।
तत्र गन्धादयः पञ्च व्रणस्योपद्रवाः स्मृताः ॥ ११८ ॥
ज्वरातीसारौ मूर्च्छा च हिक्काच्छर्द्दिररोचकः ।
श्वासकासाविपाकाश्च तृष्णा च व्रणितस्य च ॥ ११९ ॥
व्रणक्रियास्वेवमाशु व्यासेनोक्तास्वपि क्रियाम् ।
भूयोऽप्युपरि वक्ष्यामि सद्योव्रणचिकित्सिते ॥ १२० ॥

न्तुर्हि जातोत्तरमणुनाकालेन दोषलिङ्गानि दर्शयति तदिदमुच्यते षष्टेति, षष्ट्युपक्रमा निर्द्दिष्टा यस्येति षष्ट्युपक्रमनिर्द्दिष्टः । चतुर्भिर्वैद्यातुरौषधपरिचारकैरित्यर्थः । य इति । तत्समानानां तत्र साधूनां तत्र तत्रौपयौगिकानामितियावत् । "समानाः सत्-समैकेषु:" इत्यमरः । आवापः प्रक्षेपः, प्रसङ्गेत्यादि । उपपत्तिर्युक्तिरित्यनर्थान्तरम्, एवं तत्समानानां भेषजानामुपयोगेन चिकित्सितं कार्य्यमिति सन्दर्भः । न खल्वेतावतैव भेषजविवेकः पर्य्याप्तमित्यर्थान्तरमवतारयति गणोक्तमिति । अपिशब्दादगणोक्तमपीत्यर्थः । एतेन प्रतिपुरुषं तां तामवस्थां भेषजशक्तिञ्चाऽभिसमीक्ष्य यथायोगमूहापोहौ कार्य्याविति सूचितं भवतीत्यनुसन्धेयम् । उपेत्यादि । गन्धादयः "सु०

इति सुश्रुतसंहितायां चिकित्सितस्थाने
द्विव्रणीयचिकित्सितं नाम
प्रथमोऽध्यायः ॥ १ ॥

२८" अध्यायोपदिष्टा गन्धवर्णादयः। व्रणेत्यादि। सद्यः पर्य्यायोऽयमाशुशब्दः समयान्तरमेवार्थापयतीति नेयम् तथाधस्तनेऽध्याये उपदेक्ष्यमाणायाः क्रियायाः सप्ताहविषयत्वेन विवक्षितत्वात् न तावद्व्याख्यानमिदमगतिकानां गतिरित्यश्रद्धेयम् "शा० ६ अ०" सद्यः शब्दस्य सप्ताहपरत्वेन स्वयमेव परिग्रहात्, तथा चाशु साप्ताहिकीं क्रियामिति निष्कर्षः। परिशिष्टं निगदव्याख्यातम् ॥ ११३—१२०

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपनसुश्रुतभाष्ये
चिकित्सितस्थाने द्विव्रणीयचिकित्सितं नाम प्रथमोऽध्याय.।

द्वितीयोऽध्यायः।

अथातः सद्योव्रणचिकित्सितं व्याख्यास्यामः ॥ १ ॥

धन्वन्तरिर्धर्मभृतां वरिष्ठो वाग्विशारदः।

विश्वामित्रात्मजमृषिं शिष्यं सुश्रुतमन्वशात् ॥ २ ॥

नानाधारामुखैः शस्त्रैर्नानास्थाननिपातितैः।

नानारूपा व्रणा ये स्युस्तेषां वक्ष्यामि लक्षणम् ॥ ३ ॥

द्विव्रणीये हि व्रणयोर्व्रणत्वे तुल्येऽपि, द्विकारणसमुत्थानोपदेशप्रयोजनं दिदर्शयिषुर्निदर्शनत्वेन किञ्चिदन्वशासीद्यच्चालं कमप्यातुरमेकान्तेनोत्थापयितुम्, तदिदानीं तत्रैव व्याचिख्यासितत्वेनाभ्युपगतामाशुक्रियां सामान्यतो विशेषतश्चोपदिशन्निह प्रक्रमागतं सद्योव्रणचिकित्सितमधिकरोति अथात इत्यादिना, सद्योव्रणानां सामान्यं विशिष्टञ्च चिकित्सितं सद्योव्रणचिकित्सितम्, तदधिकृत्य कृतो ग्रन्थः, सद्योव्रणचिकित्सितः ॥ १ ॥

धन्वन्तरिरिति। अन्वशादनुशिष्टवान्। न तावद्यथाकथञ्चित् सद्यः सम्भूता व्रणा इह सद्योव्रणा उच्यन्ते किन्तर्हि सहसा निपतितैर्निपातितैर्वा तैस्तैः शस्त्रानुशस्त्रादिभिः सञ्जाता व्रणा इत्येव व्याजेनोपदिशन्नाह नानेति। न खल्वनन्तरं घृष्टपिच्चितयोरुपदेशेऽपि नानाधारामुखैरित्यनुपपन्नम् बाहुल्येन व्यपदेशात्, एतेनैव निपातितैः शस्त्रैश्चेत्यपि व्याख्यातप्रायम्। तथाच नानाधारामुखैरधारामुखैश्च निपातितैर्निपतितैश्च शस्त्रैः अप्रतिपन्नैः शस्त्रानुशस्त्रादिभिर्ये व्रणाः स्युः सहसेति सन्दर्भोऽनन्तरमागन्तूनां वैद्यनिमित्तजे-

आयताश्चतुरस्राश्च त्र्यस्रा मण्डलिनस्तथा ।
अर्द्धचन्द्रप्रतीकाशा विशालाः कुटिलास्तथा ॥
शरावनिम्नमध्याश्च यवमध्यास्तथापरे ।
एवम्प्रकाराकृतयो भवन्त्यागन्तवो व्रणाः ॥
दोषजा वा स्वयं भिन्ना न तु वैद्यनिमित्तजाः ॥ ४ ॥
भिषग्व्रणाकृतिज्ञो हि न मोहमधिगच्छति ।
भृशं दुर्दर्शरूपेषु व्रणेषु विक्रुतेष्वपि ॥ ५ ॥
अनेकाकृतिरागन्तुः स भिषग्भिः पुरातनैः ।
समासतो लक्षणतः षड्विधः परिकीर्त्तितः ॥
छिन्नं भिन्नं तथा विद्धं क्षतं पिच्चितमेव च ।
घृष्टमाहुस्तथा षष्ठं तेषां वक्ष्यामि लक्षणम् ॥ ६ ॥
तिरश्चीन ऋजुर्वापि यो व्रणश्चायतो भवेत् ।

तत्त्वेनाभ्युपगमात्, अतएवाह "सद्योव्रणा ये सहसा सम्भवन्त्यभिघातत:" इति। नह्यज्ञा स्वरूपतो लक्षणतश्च रोगतत्त्वमजानन् भिषजां सहस्रमपि सम्भूय प्रभवति कञ्चिदप्यातुरमारोग्येणोपयोजयितुमित्याह आयता इति। अत्राकृतेरपरिसङ्ख्येयत्वादाह एवमिति। वैद्या हि विमृश्योक्तेन वक्ष्यमाणेनच विधिना व्रणान् कुर्व्वन्ति न पुनः सहसेति युक्तमुक्तं नतुवैद्येति। नह्येष दोषभेषज बलमभिसमीक्ष्य कर्त्तव्ये प्रतीकारे कृतमकिञ्चित्करेण व्रणाकृत्युपदेशेनेति वाच्यमित्याह भिषगिति। हि यस्मादेवमाकारेष्वपि व्रणेषु व्रणाकृतिज्ञो भिषक् न मोहमुपैति तस्माद्व्रणाकृतिरवश्यमुपदेष्टव्येति भावः ॥ २—५ ॥

न पुनराकृतीनामपरिसङ्ख्येयत्वेऽप्यदुष्करं भवति तदभिधानमित्याह

गात्रस्य पातनञ्चापि छिन्नमित्युपदिश्यते ॥ ७ ॥

कुन्तशक्त्यृष्टिखड्गाग्र-विषाणादिभिराशयः।
हतः किञ्चित् स्रवेत् तद्धि भिन्नलक्षणमुच्यते ॥ ८ ॥

स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च।
हृदुण्डुकः फुस्फुसश्च कोष्ठ इत्यभिधीयते ॥ ९ ॥

तस्मिन् भिन्ने रक्तपूर्णे ज्वरो दाहश्च जायते।
मूत्रमार्गगुदास्येभ्यो रक्तं घ्राणाच्च गच्छति ॥

मूर्च्छाश्वासतृड़ाध्मानमभक्तच्छन्द एव च।
विण्मूत्रवातसङ्गश्च स्वेदास्रावोऽक्षिरक्तता ॥

अनेकेति। पुरातनैर्भिषग्भिर्ब्रह्मादिभिः। तिर इत्यादि। तिरश्चीनस्तिर्यग्भूतः यतश्च गात्रस्य पातनं चकारात् सावशेषत्वेन प्रलम्बनञ्चेत्येवं व्याख्येयम्। कुन्तेत्यादि। कुन्तो भल्लः, शक्तिर्नाम शस्त्रं "शावल" इत्याख्यायते, ऋष्टिस्तूभयतो धारः खड्गः। आशयोऽत्राहारद्रव्यादीनामाधारमात्रं न पुनः प्रागुक्तो वाताशयादिरेवानन्तरं तथोपहते कोष्ठेऽपि भिन्नशब्दोपादानात्। किञ्चिदिति इति सम्बन्धः। भिन्ने कोष्ठे रक्तपूर्णे सति विशेषयन् प्रथमन्तावन्नामतः कोष्ठजातं निवेदयति स्थानानीति। अग्निः पित्तं तस्य स्थानं पक्वामाशयमध्यं रुधिरस्य च यकृत्प्लीहानावित्युणादिवत्। उत्पन्नस्य हि मूत्रस्य स्थानं वस्तिस्तस्याल्पशोणितत्वेनोपदेशात् तस्मिन् भिन्ने विवक्षिता रक्तपूर्णता शक्तितेति मूत्रशब्देनोत्पिरस्यपि मूत्रमशीर्षप्यपि कुक्षा मूत्रस्थानत्वेन वस्तिवङ्क्षणमाख्याते द्वे वस्तिशिरसी. अप्यादातुम्; मूत्रोत्पत्तेः स्थाने हि ते रक्तवाहुल्यादपाकृतत्वामाशयमेकान्तेन। परिभाषेयं

लोहगन्धित्वमास्यस्य गात्रदौर्गन्ध्यमेव च ।
हृच्छूलं पार्श्वयोश्चापि विशेषञ्चात्र मे शृणु ॥ १० ॥
आमाशयस्थे रुधिरे रुधिरं छर्दयेत् पुनः ।
आध्मानमतिमात्रञ्च शूलञ्च भृशदारुणम् ॥ ११ ॥
पक्वाशयगते चापि रुजो गौरवमेव च ।
शीतता चाप्यधो नाभेः खेभ्यो रक्तस्य चागमः ॥ १२ ॥

पुंशरीरमेवाधिकरोतीत्येव गर्भाशयेनोपदिश्यते । तस्मिन्नित्यादि । भिन्ने तस्मिन् रक्तपूर्णे सतीत्यर्थः । अभक्तच्छन्दोऽनन्नाभिलाषः, छन्दः कान्तोऽदन्तो वाऽभिलाषापरपर्य्यायः, खेदस्यातितरामागतिः खेदास्रावः रक्तस्येवगन्धोऽस्येति लोहगन्धि ॥ ६—१० ॥

सम्प्रति यस्मिन् कस्मिंश्चित् कोष्ठे भिन्ने मूत्रमार्गादितो रक्तागतेरसामञ्जस्यात् "मूत्रमार्गगुदास्येभ्यः" इत्यादि प्रागुक्तमर्थं विशदयन्नधिकमपि किञ्चिदभिधत्ते विशेषञ्चेत्यादिना । आमाशयशब्दोऽयमजहत्स्वार्थया लक्षणया नाभेरूर्ध्ववर्त्तिनि कोष्ठसमूहे प्रवर्त्तते, पक्वाशयशब्दश्च नाभेरधोवर्त्तिनीति ब्रूमः, तथाचामाशयस्थे आमपित्तरुधिराशयहृदयफुफ्फुसस्थे रुधिरे रुधिरं छर्दयेत् मुखनासिकातः प्रच्यावयेत्, पक्वाशयगते वस्तिवृक्कस्थे पक्वाशयोण्डुकस्थे च रक्ते मूत्रमार्गतो गुदतश्च रक्तं निर्गच्छति तदेव च पुनः पक्वाशयोण्डुकस्थं रक्तं कदाचिदुदावर्त्तानिलाविष्टं सत् तथाभूतं पुरीषमिवास्यादपि निरेतीत्यभिसन्धायोक्तं "खेभ्यो रक्तस्य चागमः" इति । खेभ्यो मूत्रमार्गगुदास्येभ्य इत्यर्थः । तत्र हृदयरुधिराशयस्थस्य रुधिरस्य मुखनासिकातः प्रच्युतिः फुफ्फुसानुसारित्वेनेत्यवधेयम् । अन्ये तु खेभ्य इति बहुवचनं स्त्रीणां गर्भकोष्ठे भिन्ने तन्मुखस्य रक्तमपत्यपथतो निर्गच्छतीत्यवबोधनार्थमित्याहुः । सम्प्रति भिन्नव्याख्याप्रसङ्गान्निराभासपक्वाशयचक्रमप्याचष्टे

अभिन्नेऽप्याशयेऽन्त्राणां खैः सूक्ष्मैरस्रपूरणम् ।
पिहितास्ये घटे यद्वल्लक्ष्यते तच्च गौरवम् ॥ १३ ॥
सूक्ष्मास्यशल्याभिहतं यदङ्गन्त्वाशयादिना ।
उत्तुण्डितं निर्गतं वा तद्विद्धमिति निर्दिशेत् ॥ १४ ॥
नातिच्छिन्नं नातिभिन्नमुभयोर्लक्षणान्वितम् ।
विषमं व्रणमङ्गे यत् तत् क्षतन्त्वभिनिर्दिशेत् ॥ १५ ॥
प्रहारपीडनाभ्यान्तु यदङ्गं पृथुतां गतम् ।
सास्थि तत् पिच्चितं विद्यान्मज्जरक्तपरिप्लुतम् ॥ १६ ॥
विगतत्वग्यदङ्गं हि सङ्घर्षादन्यथापि वा ।

अभिन्न इत्यादिना । आशये सन्निहितत्वात् पक्वाशये अभिन्ने हरिण-महिषविषाणादिभिर्भिन्नवत् प्रपीडिते सति अन्त्राणां खैः सांसिद्धिकैः सूक्ष्मैश्छिद्रैरस्रपूरणम्, अन्नरसविदग्धशोणितजेन सलिलेन परिस्राव्युदरवन्निष्यन्देनान्त्राणां बहिराकरणान्तरालप्रपूरितत्वं लक्ष्यत इति परेणान्वयः । अत्र दृष्टान्तः पिहितास्य इति । पिहितास्ये आच्छादितमुखे, घटे इति नवे सलिलन्यस्त एवेति युक्त्यान्वेयम् ॥ ११—१३ ॥

सूक्ष्मेत्यादि । आशयशब्दोऽयं प्राग्वत् कोष्ठेऽपि प्रवर्त्तते प्रकृतत्वात्, तस्मिंश्च विद्धे भिन्नसंज्ञोपदेशादिदमुच्यते आशयादिनेति । वेगक्षयादनिर्गतत्वेनोन्नतं त्वङ्मांसाच्छादितं शल्यमुखं सञ्जातमस्येत्युत्तुण्डितं, शल्यस्य निर्गमनमस्येति निर्गतमित्यधिकरणे क्तः । तथाचाशयादिना उत्तुण्डितं निर्गतं वा सूक्ष्मास्यशल्याऽभिहतं यदङ्गं तद्विद्धं विद्धोनामव्रणोऽस्तीत्यध्याहारो मन्तव्यः । नातीत्यादि । विषमं छिन्नभिन्नोभयलिङ्गान्वयात् नतोन्नतं दुर्विभिन्नं वा । विषमेणेति । सङ्घर्षादन्योऽन्यदृढसंयोगात् अन्यथा सहसा कर्कश-

उषास्रावान्वितं तत् तु घृष्टमित्युपदिश्यते ॥ १७ ॥
छिन्ने भिन्ने तथा विद्धे क्षते वाऽसृगतिस्रवेत् ।
रक्तक्षयाद्रुजस्तत्र करोति पवनो भृशम् ॥
स्नेहपानं हितं तत्र तत्सेको विहितस्तथा ।
वेशवारैः सकृशरैः सुस्निग्धैश्चोपनाहनम् ॥
धान्यस्वेदांश्च कुर्व्वीत स्निग्धान्यालेपनानि च ।
वातघ्नौषधसिद्धैश्च स्नेहैर्बस्तिर्विधीयते ॥ १८ ॥
पिच्चिते च विघृष्टे च नातिस्रवति शोणितम् ।
आगच्छति भृशं तस्मिन् दाहः पाकश्च जायते ॥
तत्रोष्मणो निग्रहार्थं तथा दाहप्रपाकयोः ।
शीतमालेपनं कार्य्यं परिषेकश्च शीतलः ॥ १९ ॥
षट्स्वेतेषु यथोक्तेषु छिन्नादिषु समासतः ।
ज्ञेयं समर्पितं सर्व्वं सद्योव्रणचिकित्सितम् ॥ २० ॥

घिषादौ स्खलनादितः। घृष्टमिति विद्वत्साधनीयम् । छिन्न इत्यादि स्नेहस्तत्र वातघ्नौषधसिद्ध एवौपयोगिकत्वात् । वेशवारोनाम "निरस्थिपिशितं पिष्टं स्विन्नं गुड़घृतान्वितम् । कृष्णामरिचसंयुक्तं वेशवार इति स्मृतः" इत्युक्तलक्षणः । अत्र बहुवचनन्त्वंशांशविकल्पेनानेकत्वान्नानुपपन्नम् । कृशरा सम्पक्वस्तिलतण्डुलकल्कः । धान्यस्वेदास्तु "धान्यानि वा सम्यगुपस्वेद्य" इत्यादिना स्वेदाध्याये वक्ष्यन्ते । उक्तमिदमर्थमुपसंहरति षट्स्वित्यादिना । ज्ञेयमेकान्तेनौपयौगिकतया ज्ञातव्यं सर्व्वं सद्योव्रणचिकित्सितं सद्यो व्रणानां प्रायश्चिकित्सितसामान्यं यथोक्तेषु संक्षेपेणोक्तेष्वेतेषु षट्सु छिन्नादिषु समासतः समर्पितं सन्निवेशितमित्यर्थः ॥ १४—२० ॥

अत ऊर्द्ध्वं प्रवक्ष्यामि छिन्नानान्तु चिकित्सितम् ॥ २१ ॥
ये व्रणा विवृताः केचिच्छिरःपार्श्वावलम्बिनः।
तान् सीव्येद्विधिनोक्तेन बध्नीयाद्गाढ़मेव च ॥ २२ ॥
कर्णं स्थानादपहृतं स्थापयित्वा यथास्थितम्।
सीव्येद्यथोक्तं तैलेन स्रोतश्चाप्यभितर्पयेत् ॥ २३ ॥
कृकाटिकान्ते छिन्ने तु गच्छत्यपि समीरणे।
सम्यङ्निवेश्य बध्नीयात् सीव्येच्चापि निरन्तरम् ॥
आजेन सर्पिषा चैव परिषेकन्तु कारयेत्।
उत्तानोऽन्नं समश्नीयाच्छयीत च सुयन्त्रितः ॥ २४ ॥
शाखासु पतितां स्तिर्य्यक् प्रहारान् विवृतान् भृशम्।
सीव्येत् सम्यग्निवेश्याशु सन्ध्यस्थीन्यनुपूर्व्वशः ॥

पृथक्त्वेन विस्तरशश्छिन्नानांप्रतीकारक्रममुपदेष्टुं प्रतिजानीते अत इत्यादिना। उक्तेन विधिनेति काकाक्षिगोलकन्यायात् सू० २५।१८ अध्यायोक्ते विधौ धारयति, एवकारश्च दोषविशेषानपेक्षत्वमाख्यायतीति बोध्यं। कर्णमिति। अपहृतं भ्रष्टम्। तैलेनेति नासासन्धानोक्तविधिसाहचर्य्यात् कथिततैलेन स्रोतः कर्णशुषिरं चकारात् स्यूतदेशञ्च, अभि पौनःपुन्येनेत्यर्थः। कृकाटिकान्त इति। कृकाटिके नाम शिरोग्रीवयोःसन्धाने द्वे सन्धिमर्म्मणी तयोः समीपवर्त्तिश्वासानिलवाहिनी नाड़ीच कृकाटिकान्तः, आगच्छति चेत्यपेरर्थः। सम्यङ्निवेश्य यथावत् संयोज्य निरन्तरं समीरणागमभयादव्यवहितं सीव्येत् ततो बध्नीयादित्यर्थः। सुयन्त्रितः शिरआदिपरिचालनविरहितत्वेन सुसंयतः सम्भुत्तानः शय्यासंलग्नपृष्ठतयोर्द्ध्वमाचापन्न इत्यर्थः। अत्र शयनभोजनयोरुपदेशेनैव शय्यस्तथाभूतेनावस्थानमर्थाच्चितं

बद्ध्वा वेल्लितकेनाशु ततस्तैलेन सेचयेत्।
चर्म्मणा गोफणाबन्धः कार्य्यो यो वा स्थितो भवेत्॥ २५॥
पृष्ठे व्रणो यस्य भवेदुत्तानं शाययेत् तु तम्॥ २६॥
अतोऽन्यथा चोरसिजे शाययेत् पुरुषं व्रणे॥ २७॥
छिन्नां निःशेषतः शाखां दग्ध्वा तैलेन बुद्धिमान्।
बध्नीयात् कोशबन्धेन प्राप्तं कार्य्यञ्च रोपणम्॥
चन्दनं पद्मकं रोध्रमुत्पलानि प्रियङ्गवः।
हरिद्रा मधुकञ्चैव पयः स्यादत्र चाष्टमम्॥
तैलमेभिर्विपक्वन्तु प्रधानं व्रणरोपणम्।
चन्दनं कर्कटाख्या च सहे मांस्याब्दयामृते॥

भवति प्रतीकारानुगुणसाधनत्वात्। शाखास्वित्यादि। शाखा हस्तपादं। प्रायेणहि तिर्य्यक्छिन्ना विवृता भवन्ति सीवनञ्च तत् सन्धानार्थमुपदिश्यते, तदिदमुच्यते तिर्य्यगिति एवञ्च ऋजुच्छिन्नानामपि विवृतत्वे सीवनं प्राप्तमेव। अनुपूर्व्वशोऽनुक्रमेणेत्यर्थः, तत्रितोयमनन्यार्थः। ततो वेल्लितकेनानुवेल्लित-समाख्येन बन्धेन बद्ध्वा तैलेन सेचयेत् प्राग्वदेव। गोफणाबन्धस्त्वं सव्रण-विषयएव उक्तञ्च "चर्म्मणा गोफणाबन्धः कार्य्योऽसंगते व्रणे" इति। पृष्ठ इत्यादि। उत्तानस्य पृष्ठगता अनुत्तानस्य चोरसिस्थाहि पेश्यो नातिसङ्कोच-विकाशाभ्यामनवस्थितदोषत्वेन च झटित्यारोग्याय कल्पन्ते तदिदमुपपन्नं भवति पृष्ठ इत्यादि॥ २१—२७॥

छिन्नामित्यादि। प्राप्तं युक्तम्। किन्नाम तद्रोपणमित्याह चन्दनमिति। अत्र चन्दनादीनां समानां कल्कः पयश्चतुर्गुणम्। केचित्तु "क्षीरमुख्यद्रवा-न्यैः पाको यत्रेरितः क्वचित्। जलं चतुर्गुणं तत्र क्षीरादीनामकल्पयेत्"

हरेणवो मृणालञ्च त्रिफला पद्मकोत्पलम् ।
अर्थोदकाङ्कं त्रिवृतमेतद्वा पयसान्वितम् ॥
तैलं विपक्वं सेकार्थे हितन्तु व्रणरोपणे ॥ २८ ॥
अत ऊर्द्ध्वं प्रवक्ष्यामि भिन्नानान्तु चिकित्सितम् ।
भिन्नं नेत्रमकर्म्मण्यमभिन्नं लम्बते तु यत् ॥
तन्निवेश्य यथास्थानमव्याविद्धशिरं शनैः ।
पीड़येत् पाणिना सम्यक् पद्मपत्रान्तरेण तु ॥
ततोऽस्य तर्पणं कार्य्यं नस्यपानेन सर्पिषा ।
आजं घृतं क्षीरपात्रं मधुकञ्चोत्पलानि च ॥
जीवकर्षभकौ चैव पिष्ट्वा सर्पिर्विपाचयेत् ।
सर्व्वनेत्राभिघाते तु सर्पिरेतत् प्रशस्यते ॥ २९ ॥

इति अरण्याज्जलमपि चतुर्गुणं देयमित्याहुः । तैलान्तरमाह चन्दनमिति । कर्कटाख्या शृङ्गी, सहे मुद्गमाषपर्ण्यौ, मांस्याह्वया जटामांसी, अमृतागुडूची, हरेणवो रेणुका, मृणालमुशीरम् । त्रिभिर्घृतवसामज्जभिर्वृतं त्रिवृतं । तैलमिति सम्बन्धः । अत्र घृतादीनां समांशेन प्रस्थो ग्राह्यः । शेषं समानम् । अतइत्यादि । अकर्म्मण्यमचिकित्स्यम्, "असाध्यं स्फुटितं नेत्रम्" इति तन्त्रान्तरञ्च । भिन्नं स्फुटितमित्यनर्थान्तरम् । अभिन्नं यन्नेत्रं लम्बते सूत्रबन्धनत्वेन लम्बमानं भवति । अव्याविद्धशिरमिति शिरः पर्य्यायोऽयं शिरशब्दोऽदन्तः "निपकस्य शिराम् ह्रोषिः" इति वत् । अवक्रशिरस्कमित्यर्थः । नेत्रविशेषणमेतत्, आतुरविशेषणत्वेतु पीड़येन्नावच्छेद इत्युक्तम् । ततोऽनेनानन्त-

उदरान्मेदसो वर्त्तिर्निर्गता यस्य देहिनः।
कषायभस्ममृत्कीर्णां बद्ध्वा सूत्रेण सूत्रवित्॥
अग्नितप्तेन शस्त्रेण छिन्द्यान्मधुसमायुतम्।
बद्ध्वा व्रणं सुजीर्णेऽन्ने सर्पिषः पानमिष्यते॥
स्नेहपानादृते चापि पयःपानं विधीयते।
शर्करामधुयष्टिभ्यां लाक्षया वा श्वदंष्ट्रया।
चित्रासमन्वितञ्चैव रुजादाहविनाशनम्॥ ३०॥
आटोपो मरणं वा स्यात्क्लो वाऽच्छिद्यमानया॥ ३१॥
मेदोग्रन्थौ च यत् तैलं वक्ष्यते तच्च योजयेत्॥ ३२॥
त्वचोऽतीत्य शिरादीनि भित्त्वा वा परिहृत्य वा।
कोष्ठे प्रतिष्ठितं शल्यं कुर्य्यादुक्तानुपद्रवान्॥ ३३॥
तत्रान्तर्लोहितं पाण्डुं शीतपादकराननम्।
शीतोच्छ्वासं रक्तनेत्रमानद्धञ्च विवर्ज्जयेत्॥ ३४॥

रोगेणेत्यर्थः। आजमित्यादि, तृतीयचकारोवार्थः तथाचाजं घृतं सर्पिर्गव्यं घृतं वेत्यर्थः। तच्चोत्सर्गसिद्धं प्रस्थमितमेवपाह्यं परिमाणानुपदेशात्। पात्रमाढ़कः। उदरादित्यादि। कषायभस्ममृत्कीर्णां पेच्छिलापाकरणार्थं मूलावच्छेदे कषायरसद्रव्यादिभिश्चूर्णितां कृत्वेति तात्पर्य्यम्। अग्नितप्तेनेति पाकभयात्। सूत्रविदिति च शरीरसमत्वसादृगुणात् क्षाम्यादीनेव पाश-यितुमित्यनुसन्धेयम्। सर्पिर्हित्वाशर्करादिसिद्धं क्षीरमप्युपयुक्तं स्नेहे-त्यादिना। स्नेहोऽत्र सर्पिरेव प्रकृतत्वात्। चित्रा गवाक्षी॥ २८—३२॥

झटित्यवबोधार्थं कोष्ठगतशल्यलक्षणानि स्मारयन्नसाध्यानाचष्टे त्वच-

आमाशयस्थे रुधिरे वमनं पथ्यमुच्यते ॥ ३५ ॥
पक्वाशयस्थे देयञ्च विरेचनमसंशयम् ।
आस्थापनञ्च निःस्नेहं कार्य्यमुष्णैर्विशोधनैः ॥
यवकोलकुलत्थानां निःस्नेहेन रसेन च ।
भुञ्जीतान्नं यवागूं वा पिबेत् सैन्धवसंयुताम् ॥ ३६ ॥
अतिनिःस्रुतरक्तो वा भिन्नकोष्ठः पिबेदसृक् ॥ ३७ ॥
स्वमार्गप्रतिपन्नास्तु यस्य विण्मूत्रमारुताः ।
व्युपद्रवः स भिन्नेऽपि कोष्ठे जीवति मानवः ॥ ३८ ॥
अभिन्नमन्त्रं निष्क्रान्तं प्रवेश्यं नान्यथा भवेत् ।
पिपीलिकाशिरोग्रस्तं तदप्येके वदन्ति तु ॥ ३९ ॥

इत्यादिना । उक्तान् 'सू० २६ अ०' "कोष्ठगते आटोपानाहौ" इत्यादिना कथितान् । तत्र कोष्ठे भिन्ने सतीत्यर्थः । सुचिरमन्तर्मध्ये शोषितमस्येत्यन्तर्लोहितम् । आमेत्यादि । निःस्नेहं घृतादिभिर्विनाकृतम् । शीतं हि शोणितं स्तम्भयतीत्युक्तमुष्णैरिति । उष्णैरग्निसन्तप्तैः, विशोधनैरुष्णवीर्य्यैर्गोमूत्रादिभिरित्यर्थः । असृगित्याममेव सद्यस्कत्वेनोष्णमित्याहुः । अथवन्नेवं चिकित्सितोऽयमातुरो विचिकित्सां हित्वा कैश्चिज्जीवतीत्यवस्थामाह स्वेति । भिन्ने कोष्ठे स्वमार्गप्रतिपन्नाः क्रियाफलमासाद्य यथास्वमार्गानुगताः । अपि निश्चयेन जीवतीत्यर्थः । अभिन्नमित्यादि । अन्यथाऽन्यप्रकारं भिन्नमिश्रमेतत् न प्रवेश्यमित्यन्वयः । पिपीलिकाशिरोग्रस्तं कृष्णपिपीलिकादिभिः दंशयित्वा तच्छिरांसि छित्वा शरीरमात्रापाकरणेन संयोजितम् [illegible]; तद्भिन्नमपि वदन्ति प्रवेश्यमिति पूर्वेणान्वयः ॥ ३३—३९ ॥

प्रक्षाल्य पयसा दिग्धं तृणशोणितपांशुभिः ।
प्रवेशयेत् कृत्तनखो घृतेनाक्तं शनैः शनैः ॥ ४० ॥
प्रवेशयेत् क्षीरसिक्तं शुष्कमन्त्रं घृताप्लुतम् ॥ ४१ ॥
अङ्गुल्याभिमृशेत् कण्ठं जलेनोद्वेजयेदपि ।
हस्तपादेषु संगृह्य समुत्याप्य महाबलाः ।
भवत्यन्तःप्रवेशस्तु यथा निर्धुनुयुस्तथा ॥ ४२ ॥
तथान्त्राणि विशन्त्यन्तः स्वां कलां पीड़यन्ति च ॥ ४३ ॥
व्रणाल्पत्वाद्बहुत्वाद्वा दुष्प्रवेशं भवेत् तु यत् ।
तद्दापाद्य प्रमाणेन भिषगन्त्रं प्रवेशयेत् ॥ ४४ ॥
यथास्थानं निविष्टे च व्रणं सीव्येदतन्द्रितः ॥ ४५ ॥
स्थानादपेतमादत्ते प्राणान् गुम्फितमेव वा ॥ ४६ ॥

अवस्थाविशेषे प्रवेशनक्रमं विशिनष्टि प्रक्षाल्येति । दिग्धं लिप्तं, कृत्तनखश्छिन्ननखः, अङ्गुल्या कण्ठाऽभिमर्शनं हि वायोरूर्द्ध्वगमनकारिणा च्छर्दिवेगविशेषेण सद्यःप्रवेशानुगुणमाध्मानापचयमापादयति, चक्षुरादौ शीतलजलावसेचनञ्च मूर्च्छाभयमपास्यतीतियुक्तमुक्तमङ्गुल्येति । किञ्च खल्वेतावतैवान्त्राणि सम्यगन्तः प्रविष्टानि भवन्ति नेत्याह हस्तेति । अन्तः प्रवेशो यथावकाशमन्तर्निवेशः । निर्धुनुयुः शनैः शनैर्दोलयेयुः । स्वां पञ्चमीमित्यर्थः, आम्नायते हि "पञ्चमी पुरीषधरा नाम" इति । पीड़यन्ति रसमलविरेकार्थमवस्रंसमार्थं पुरीषस्याधोगामिना सङ्कोचविकाशाभिनिर्वर्त्तकेन वेगविशेषेण योजयन्ति यथावदवस्थानादित्याकूतम् । व्रणाल्पत्वात् व्रणसौक्ष्म्यात् बहुत्वाद्विनिर्गतानामन्त्राणां विस्तीर्णत्वात् । यथास्थानं प्रविष्ट-

वेष्टयित्वा तु पट्टेन घृतसेकं प्रदापयेत् ।
घृतं पिबेत् सुखोष्णञ्च चित्रातैलसमन्वितम् ।
मृदुक्रियार्थं शकृतो वायोश्चाधःप्रवृत्तये ॥ ४७ ॥
ततस्तैलमिदं कुर्य्याद्रोपणार्थं चिकित्सकः ।
त्वचोऽश्वकर्णधवयोर्मोचकीमेषशृङ्ग्योः ॥
शल्लक्यर्ज्जुनयोश्चापि विदार्य्याः क्षीरिणां तथा ।
बलामूलानि चाहृत्य तैलमेतैर्विपाचयेत् ॥
व्रणं संरोपयेत् तेन वर्षमात्रं यतेत च ॥ ४८ ॥
पादौ निरस्तमुष्कस्य जलेन प्रोक्ष्य चाक्षिणी ।
प्रवेश्य तुन्नसेवन्या मुष्कौ सीव्येत् ततः परम् ॥

इति उक्तेन विधिनेति शेषः । अतन्द्रितोऽवहितः सीवनं प्रत्यङ्गपरिवर्ज्जन-कुशल इति यावत् । अत्र हेतुः स्थानादिति । यस्मात् स्थानादपेतं स्वस्थानात् भ्रष्टं गुम्फितं ग्रथितं वा प्राणानादत्त एवेति सम्बन्धः । वेष्टयित्वेत्यादि । चित्रा दन्ती चित्रतैलेति पाठे तु चित्र एरण्डः । मृदुक्रियार्थं सुखं निःसरणाय मृदूकरणार्थमित्यर्थः । ततइत्यादि । अश्वकर्णः शालभेदः, मोचकी शाल्मली, मेषशृङ्गः स्थावरविषभेदः, शल्लकी सिह्लकः, क्षीरिणो वटादयः, त्वच इत्यनेनैषां सम्बन्धः । आहृत्य कल्कार्थमिति शेषः । अत्र द्रवार्थं जलं चतुर्गुणं देयमित्यूह्यम् वर्षमात्रं संवत्सरं यावत् यतेत गुर्व्वादिपरिहारेण व्रणोपास्य विधिमनुवर्त्ततेति निष्कर्षः ॥ ४०—४८ ॥

पादावित्यादि नेह पादशब्दः कथञ्चिदपि चरणौ वक्तीति निश्चीयते तयोर्मुष्काभ्यां सह तादृशसम्बन्धविनाकृतत्वेन कर्म्मण्यस्मिन् विधित्सितस्य

कार्य्यो गोफणिकाबन्धः कट्यामाविश्य यन्त्रकम् ।
न कुर्य्यात् स्नेहसेकञ्च तेन क्लिद्यति हि व्रणः ॥ ४९ ॥
कालानुसार्य्यागुर्व्वेला-जातीचन्दनपत्रकैः ।
शिलादार्व्वीमृतातुत्थैस्तैलं कुर्व्वीत रोपणम् ॥ ५० ॥
शिरसोऽपहृते शस्त्रे वालवर्त्तिं प्रवेशयेत् ।
वालवर्त्त्यामदत्तायां मस्तुलुङ्गं व्रणात् स्रवेत् ॥
हन्यादेनं ततो वायुस्तस्मादेवमुपाचरेत् ।
व्रणो रोहति चैकैकं शनैर्वालमपक्षिपेत् ॥ ५१ ॥
गात्राद्वाऽपहृतेऽन्यस्मात् स्नेहवर्त्तिं प्रवेशयेत् ।
कृते निःशोणिते चापि विधिः सद्यःक्षते हितः ॥ ५२ ॥

शोधनस्यापार्थकत्वेनोपलम्भात् किन्तर्हि "पादोव्रध्न" इति कोषान्तर-स्मरणात् ह्रधमूलापरपर्य्यायत्वेनाभ्युपगतोऽयं पादशब्दो गौण्या वृत्त्या निरस्त-मुष्कस्य वङ्क्षणसन्धिस्थे द्वे मुष्कमूले लक्षयतीत्याहु र्मुख्यार्थस्यासामञ्ज-स्यात्, नतावद्व्याख्यानमिदमश्रद्धेयम्, हिमाम्भःसंसृष्टेनोदकेन प्रोक्षिते हि ते सङ्कुचाश्चेव मुष्कयोरन्तः प्रवेशनं प्रत्यानुकूल्याय प्रभवतः । पक्षा-न्तरे च प्रोक्षिते मूर्च्छाशङ्कामपाकुर्वन्तः प्रायेणेति साम्प्रतं भवति पादावक्षि-णीव जलेन प्रोक्ष्येति । निरस्तमुष्कस्य विलम्बिमुष्कस्य कोषाविर्गतफल-स्येति यावत् यन्त्रकं कटिबन्धाकारं दृढमसूक्ष्मं वस्त्रखण्डम् आविश्यासज्य । कालानुसार्य्यं तगरं, शिला मनःशिला । विद्धचिकित्सितमधिकरोति शिरस इत्यादिना । वालः केशः, मुस्तुलुङ्गं मस्तिष्कम । गात्रादित्यादि । अन्यस्मात् शिरोव्यतिरिक्तात्, व्यपहृते निहृते शल्यमित्यनुषज्यते । इत्यालाप्र सूत्रकवर्त्तिरिह स्नेहवर्त्तिः । सद्यःक्षते हितो विधिर्मधुघृताद्युपयोगः, अक्रिया

दूरावगाढ़ाः सूक्ष्माः कुर्य्याद् व्रणास्तान् विशोधितान् ।
कृत्वा सूत्रमेषा भेषेण चक्रतैलेन तर्पयेत् ॥ ५३ ॥
समङ्गां रजनीं पद्मां त्रिवर्गं तुल्यमेव च ।
विड़ङ्गं कटुकां पथ्यां गुड़ूचीं सकरञ्जिकाम् ॥
संहृत्य विपचेत् काले तैलं रोपणमुत्तमम् ॥ ५४ ॥
तालीशं पद्मकं मांसी हरेणुमगुरुचन्दनम् ।
हरिद्रे पद्मबीजानि सौवीरं मधुकञ्च तैः ॥
पक्वं सद्योव्रणेषूक्तं तैलं रोपणमुत्तमम् ॥ ५५ ॥
क्षते क्षतविधिः कार्य्यः पिच्चिते भग्नवद्विधिः ॥ ५६ ॥
घृष्टे रुजो निगृह्याशु चूर्णैरुपचरेद्व्रणम् ॥ ५७ ॥
विश्लिष्टदेहं पतितं मथितं हतमेव च ।
वासयेत् तैलपूर्णायां द्रोण्यां मांसरसाशनम् ॥

सू० २७ अध्यायोक्तश्च कार्य्य इति शेषः । दूरेति । दूरावगाढ़ा अतिगम्भीराः मेवम् "पौवकारौ" इति प्रसिद्धं व्रणमेवम् । चक्रतैलस्वनामतावार्थे "मधुकं चीरकाकोली च" इत्यादिना वक्ष्यमाणम् । समङ्गामित्यादि । समङ्गा वराहक्रान्ता, पद्मा भार्गी, त्रिवर्गस्त्रिफला । संहृत्य कल्कार्थं संगृह्य । तालीशमित्यादि । अत्र पूर्व्वस्मात् संहृत्येत्यध्याहार्य्यम् । तैः कल्कीकृतैरित्यर्थः । क्षत इत्यादि । क्षतसामान्यो विधिः क्षतविधिः । निम्बपत्र विहितक्षेदसेकादिभि र्निवार्य्य, चूर्णैर्मिश्रकोलकङ्कुकादिकृतैरिति शेषः उपचरेद्व्रणमुपचरेत् । प्रसङ्गाद्विश्लिष्टदेहादीनां चिकित्सितमभिधातीति विश्लिष्टेत्यादिना । विश्लिष्टं सन्धिमुक्त विशेषः, पतितं वृक्षादितः पतने-

अयमेव विधिः कार्य्यः क्षीणे मर्म्महते तथा ॥ ५८ ॥

रोपणे सपरीषेके पाने च व्रणिनां सदा।
तैलं घृतं वा संयोज्यं शरीरर्त्तूनवेक्ष्य हि ॥ ५९ ॥

घृतानि यानि वक्ष्यामि यत्नतः पित्तविद्रधौ।
सद्योव्रणेषु देयानि तानि वैद्येन जानता ॥ ६० ॥

सद्यःक्षतव्रणं वैद्यः सशल्यं परिषेचयेत्।
सर्पिषा नातिशीतेन बलातैलेन वा पुनः ॥ ६१ ॥

समङ्गां रजनीं पद्मां पथ्यां तुत्थं सुवर्च्चलाम्।
पद्मकं रोध्रमधुकं विडङ्गानि हरेणुकम् ॥

तालीशपत्रं नलदं चन्दनं पद्मकेशरम्।
मञ्जिष्ठोशीरलाक्षाश्च क्षीरिणाञ्चापि पल्लवान् ॥

पियालबीजं तिन्दुक्यास्तरुणानि फलानि च।
यथालाभं समाहृत्य तैलमेभिर्विपाचयेत् ॥

सद्योव्रणानां सर्व्वेषामदुष्टानान्तु रोपणम्।
कषायमधुराः शीताः क्रियाः स्निग्धाश्च योजयेत् ॥

नातितरां प्रपीड़नम्, मथितं हस्त्यादिभिर्व्यथितम्, क्षतं दन्तादिभिराकृष्टम्, द्रोणीकाष्ठाम्बुवाहिणी "टब" इत्याख्यायते। क्षीण इति प्रक्रान्तत्वात् सद्योव्रणातुर एवेति नेयम् ॥ ४९—५८ ॥

रोपण इत्यादि। अत्र शरीरर्त्तूनवेक्ष्येति विशेषणं चि० ३१ अ० कोष्ठोपयोगिके स्नेहपानं प्रति विवक्षितं दोषकालापेक्षं विधिं स्मारयति। सद्य इत्यादि।

सद्योव्रणानां सप्ताहं पश्चात् पूर्व्वोक्तमाचरेत् ॥ ६२ ॥
दुष्टव्रणेषु कर्त्तव्यमूर्द्ध्वाधश्च शोधनम्।
विशोषणं तथाहारः शोणितस्य च मोक्षणम् ॥
कषायं राजवृक्षादौ सुरसादौ च धावनम्।
तयोरेव कषायेण तैलं शोधनमिष्यते ॥
क्षारकल्पेन वा तैलं क्षारद्रव्येण साधितम् ॥ ६३ ॥
द्रवन्ती चिरविल्वश्च दन्ती चित्रकमेव च।
पृथ्वीका निम्बपत्राणि कासीसं तुत्थमेव च ॥
त्रिवृत् तेजोवती नीली हरिद्रे सैन्धवं तिलाः।
भूमीकदम्बः सुवहा शुकाख्या लाङ्गलाह्वया ॥
नैपाली जालिनी चैव मदयन्ती मृगादनी।
सुधामुर्व्वार्ककीटारि-हरितालकरञ्जिकाः ॥

वला तैलं चि० १५ अ० वक्ष्यमाणम्। सुवर्च्चला नामौषधि र्हिरण्यक्षीरा पुष्करसदृशपत्रा तदभावे सूर्य्यमण्डलाकारपुष्पा सूर्य्यकान्तैवोपयुज्यते। नलदं जटामांसी, तिन्दुकी "गाव" इत्यभिधीयते, तरुणान्याम्राणि। पश्चात् सप्ताहात् परं पूर्व्वोक्तं द्विव्रणीयोक्तम्। प्रसङ्गात् दुष्टव्रणचिकित्सितमधिकरोति दुष्टेत्यादिना, विशोषणं पित्तश्लेष्मोपशोषणं कषायादि; तथा विशोषणएवाहारः, राजवृक्षादिः सुरसादिश्च सू० ३८ अ० उक्तः। क्षारपाकविधावुपदिष्टानां मुष्ककादीनां क्षारं षड्गुणेनोदकेन मूत्रेण वा परिस्राव्य तैलाच्चतुर्गुणेन तेन शोधनं तैलं पाचयितुमिदमुच्यते क्षारकल्पेनेति ॥ ५९—६२ ॥

द्रवन्तीत्यादि। द्रवन्ती दन्तीभेदः, चिरविल्वः करञ्जः, पृथ्वीका स्थूलजीरकः, तेजोवती चव्यम्, नीली वन्यनीलमूलम्, भूमीकदम्बो मुण्डितिका

यथोपपत्ति कर्त्तव्यं तैलमेतैस्तु शोधनम् ॥ ६४ ॥
घृतं वा यदि वा प्राप्तं कल्काः संशोधनास्तथा ॥ ६५ ॥
सैन्धवं त्रिवृदेरण्डपत्रकल्कास्तु वातिके ॥ ६६ ॥
चित्रकहरिद्रामधुकाकल्कः पैत्ते तिलैर्युतः ॥ ६७ ॥
कफजे तिलतेजाह्वा दन्तीस्वर्जिकचित्रकाः ॥ ६८ ॥
दुष्टव्रणविधिः कार्य्यो मेहकुष्ठव्रणेष्वपि ॥ ६९ ॥
षड्विधः प्राक्प्रदिष्टो यः सद्योव्रणविनिश्चयः ।
नातः शक्यं परं वक्तुमपि निश्चितवादिभिः ॥
उपसर्गैर्निपातैश्च तत् तु पण्डितमानिनः ।
केचित् संयोज्य भाषन्ते बहुधा मानगर्व्विताः ॥

"मुण्डेरी" इति परिचीयते, सुवहाऽत्र निर्गुण्डी, शुकाख्या शिरीषः, लाङ्गलाह्वा "ईश्लाङ्गली" इत्यभिधीयते, नैपाली मनःशिला, जालिनी कोषातकी, मदयन्ती वनमल्लिका, मृगादनी इन्द्रवारुणी, सुधा स्नुही, कीटारि विडङ्गम् करञ्जिका नक्तमालः, युक्तिमनतिक्रम्येति यथोपपत्ति । एतैः कल्कोक्तै रेवेत्युक्तेयं करणनिर्देशात् । अवस्थाविशेषे एभिरेव घृतकल्कावपि कार्य्यावित्याह घृतमिति । वा शब्दाववधारणार्थौ तदयमर्थः । यदि घृतमेव प्राप्तं वातपित्ताऽधिकत्वात् युक्तं स्यात्तर्हि एतैः संशोधनं घृतं कार्य्यं तथा यदि श्लेष्मादिबाहुल्यात् कल्का एव युक्ताः स्युस्तर्हीति समानम् । अत्र कल्का इति बहुवचनं यथा रोगग्रहणेनानेकत्वान्नानुपपन्नम् । कल्कान्तराण्युपदिदिक्षति सैन्धवमित्यादिना । तेजोह्वा चविका । षड्वित्यादि । प्रदिष्टमित्यादिनोपदिष्टः । अपि नियमेन निश्चितवादिभिस्तत्त्वदर्शिभिः पण्डितमानिनः पण्डितम्मन्याः मानगर्व्विता बहुप्रकाराऽभिन्नत्वेनान्येन-

बहु तद्भाषितं तेषां षट्स्वेवन्तर्भावतिष्ठते।
विशेषा इव सामान्ये षट्त्वन्तु परमं मतम्॥ ७०॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने
सद्योव्रणचिकित्सितं नाम
द्वितीयोऽध्यायः॥ २॥

मतान्तराकारिणः केचित्तु तत् छिन्नादिकम् उपसर्गैः प्रादिभिर्निपातैर्मन्नागादिभिश्च संयोज्य बहुधा भाषन्ते "घृष्टावकृत्त-विच्छिन्न-प्रविलम्बित-पातितम" इत्येवं क्रमेणेति शेषः। 'तदपार्थकमित्यावेदयितुमिदमुच्यते बह्निति। एषु छिन्नादिषु षट्स्ववतिष्ठते अन्तर्भवतीत्यर्थः। अत्र दृष्टान्तः विशेषा इति। एवञ्च प्रागुक्तं छिन्नादिषट्त्वमेवातितरां सम्मतं भवति सर्वान्तर्भावित्वादित्याशयेनाह षट्त्वमिति तुकारोऽवधारणार्थः। परिशिष्टं निगदव्याख्यातम्॥ ६४—७०॥

इति श्रीडल्हणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
चिकित्सितस्थाने सद्योव्रणचिकित्सितं नाम द्वितीयोऽध्यायः।

तृतीयोऽध्यायः।

अथातो भग्नानां चिकित्सितं व्याख्यास्यामः ॥ १ ॥

अल्पाशिनोऽनात्मवतो जन्तोर्वातात्मकस्य च।
उपद्रवैर्वा जुष्टस्य भग्नं कृच्छ्रेण सिध्यति ॥ २ ॥

लवणं कटुकं क्षारमम्लं मैथुनमातपम्।
व्यायामञ्च न सेवेत भग्नो रुक्षान्नमेव च ॥ ३ ॥

शालिर्मांसरसः क्षीरं सर्पिर्यूषः सतीनजः।
बृंहणञ्चान्नपानं स्याद्देयं भग्नाय जानता ॥ ४ ॥

मधूकोडुम्बराश्वत्थ-पलाशककुभत्वचः।
वंशसर्ज्जवटानां वा कुशार्थमुपसंहरेत् ॥ ५ ॥

किन्नु खलु भग्नानां विधिमुपदिशन्त्याचार्य्याः, यं भवानत्यदिक्षत् पूर्व्वाध्याये पिच्चितं प्रतिकर्त्तुमित्येवं जिज्ञासूनामवसरं मुष्णन्नुद्देशक्रमागतं भग्नानां चिकित्सितमधिकरोति अथात इत्यादिना ॥ १ ॥

अल्पेत्यादि। अनात्मवतोऽसमीक्ष्यकारिणः, उपद्रवा ज्वरादयः, सतीनो वर्त्तुलकलायः। मधूकेत्यादि। ककुभोऽर्ज्जुनः वंशेत्यादौ त्वच इत्येव योजना। कुशार्थमिति कुशा नाम सामगानां स्तोत्रगाने तात्पर्य्यव्यञ्जनाय ग्राह्य औडुम्बर शङ्कुस्तत्साम्यात् कुशाशब्दोऽत्र तदाकारे भग्नसंश्लेषणे फलके प्रवर्त्तत इति निश्चीयते, "वल्कलैः शकलैरपि"—"कुशाह्वयैः समं वन्धम्" इति तन्त्रा-

आलेपनार्थं मञ्जिष्ठां मधुकं रक्तचन्दनम् ।
शतधौतघृतोन्मिश्रं शालिपिष्टञ्च संहरेत् ॥ ६ ॥
सप्ताहादथ सप्ताहात् सौम्येष्वृतुषु बन्धनम् ।
साधारणेषु कर्त्तव्यं पञ्चमे पञ्चमेऽहनि ।
आग्नेयेषु त्र्यहात् कुर्य्याद्भग्नदोषवशेन वा ॥ ७ ॥
तत्रातिशिथिलं बद्धे सन्धिस्थैर्य्यं न जायते ।
गाढ़ेनापि त्वगादीनां शोफो रुक् पाक एव च ।
तस्मात् साधारणं बन्धं भग्ने शंसन्ति तद्विद: ॥ ८ ॥

न्तरीये कुशाशब्दस्य तदर्थे प्रयोगदर्शनात् । उप समीपे संहरेदासादयेत् [illegible] अत्र त्वचामासामुपदेश: शीतवीर्य्यत्वेनातितरां भग्नानुगुणत्वादेव न पुन- स्तन्मात्रपरिग्रहार्थमित्यध्यवसितव्यम् । लघुपरिमाणवतां काष्ठानाम[illegible] देवोपयोगदर्शनात् । प्रदर्शितं तन्त्रान्तरीये काष्ठफलकपरिग्रहार्थं शकल- शब्दोपादानाच्च । ताश्च त्वच: काष्ठानिचावाधभयात् तनूनि सुश्लक्ष्णा[illegible] योगं सच्छिद्राणि सप्रतिस्तम्भानि तूलपट्टावच्छन्नानि चैव ग्राहयेत् [illegible] । शालिपिष्टं तण्डुलचूर्णम् । माभूत् बन्धपिहितोष्मणोऽनि[illegible]ऽभि- निर्वृत्तिरित्युत्प्रकर्षनिकर्षतो बन्धकालं विशिनष्टि सप्ताहादित्यादिना । अथ प्रथमबन्धनादनन्तरं सौम्येष्विति बहुवचनं गणार्थम् । सप्ताहात् सप्ता- हात् प्रतिसप्ताहं प्राप्येत्यर्थ: । बन्धनं पूर्व्वबन्धं मुक्त्वा पुनर्व्वन्धनं कार्य्य- मित्यर्थ: । त्र्यहादिति द्विरुक्तमन्तरेणाऽपि वीप्सा[illegible]वगमयति, प्रकृतत्वात् पक्षान्तरमाह भग्नेति । भग्नदोषवशेन भग्नो[illegible]स्तारतम्येन । एतेनोप- वलमभिसमीक्ष्य यथा त्वगादय: प्रदुष्टा न भवेयुस्तथैव बन्धनं कार्य्य- मित्याचाय्यानम् ॥ २—८ ॥

न्यग्रोधादिकषायन्तु सुशीतं परिषेचने ।
पञ्चमूलीविपक्वन्तु क्षीरं कुर्य्यात् सवेदने ।
सुखोष्णमवचार्य्यं वा चक्रतैलं विजानता ॥ ९ ॥
विभज्य कालं दोषञ्च दोषघ्नौषधसंयुतम् ।
परिषेकं प्रदेहञ्च विदध्याच्छीतमेव च ॥ १० ॥
गृष्टिक्षीरं ससर्पिष्कं मधुरौषधसाधितम् ।
शीतलं लाक्षया युक्तं प्रातर्भग्नः पिबेन्नरः ॥ ११ ॥
सव्रणस्य तु भग्नस्य व्रणं सर्पिर्मधूत्तरैः ।
प्रतिसार्य्य कषायैस्तु शेषं भग्नवदाचरेत् ॥ १२ ॥
प्रथमे वयसि त्वेवं भग्नं सुकरमादिशेत् ।
अल्पदोषस्य जन्तोस्तु काले च शिशिरात्मके ॥ १३ ॥
प्रथमे वयसि त्वेवं मासात् सन्धिः स्थिरो भवेत् ।
मध्यमे द्विगुणात् कालादुत्तरे त्रिगुणात् स्मृतः ॥ १४ ॥
अवनामितमुन्नम्येदुन्नतञ्चावपीडयेत् ।

न्यग्रोधेत्यादि चक्रतैलं चि० २४ अ० वक्ष्यमाणम् । शीतमेवेत्येवकारेण कोष्णमपि निरुणद्धि । गृष्टिः सकृत्प्रसूता गौः । मधुरौषधानि सू० ४२ अ० उक्तो मधुरोवर्गः । सव्रणस्येत्यादि । सव्रणस्य भग्नस्य सामाद्धिकत्वेतिनेयम् उक्तं हि तस्य व्रणभग्नप्रतिकारवत् प्रतीकारमुशन्त्याचार्य्याः । सर्पिर्मधूत्तरैः प्रव्यक्तसर्पिर्मधुभिः कषायैः सू० ४२ अ० उक्तैर्यथालाभं कषायवर्गोपदिष्टैर्भेषजैः प्रतिसार्य्य प्रलिप्येत्यर्थः । शेषं बन्धनादिकम् । प्रथम इत्यादि । एवन्नित्यं चिकित्सितमित्यर्थः । जन्तोस्त्विति तुकारः प्रथमे

आञ्छेदतिक्षिप्तमधोगतञ्चोपरि वर्त्तयेत् ॥ १५ ॥
आञ्छनैः पीड़नैश्चैव संक्षेपैर्बन्धनैस्तथा ॥
सन्धीञ्छरीरे सर्व्वांस्तु चलानप्यचलानपि ।
एतैस्तु स्थापनोपायैः स्थापयेन्मतिमान् भिषक् ॥ १६ ॥
उत्पिष्टमथ विश्लिष्टं सन्धिं वैद्यो न घट्टयेत् ।
तस्य शीतान् परीषेकान् प्रदेहांश्चावचारयेत् ॥ १७ ॥
अभिघाते हृते सन्धिः स्वां याति प्रकृतिं पुनः ॥ १८ ॥

वयसीति वयोविशेषापेक्षां निरस्यति । एव मुक्तेन वक्ष्यमाणेन च विधिनेत्यर्थः । उत्तरे चरमे वयसीति सम्बन्धः । सामान्यं विधिमुपदिश्य क्रमागतत्वात् प्रथमन्तावत् सन्धिमुक्तचिकित्सितमाह अवेत्यादिना । अवनामितम् अवक्षिप्तत्वेनावनतम् उन्नह्येदुन्नमयेत् संश्लेषयेदिति निष्कर्षः । "अथावनतमुन्नम्यम्" इति तन्त्रान्तरञ्च । उन्नतम् विवर्त्तितत्वेनोन्नतमस्थ्यवपीड़येत् । अतिक्षिप्तमाञ्छेद्यथावत्स्थापनायमाकर्षेदित्यर्थः । अधोगतं तिर्य्यक् क्षिप्तत्वेनापरस्यास्थ्नोऽधः प्रविष्टं उपरिवर्त्तयेत् यथास्थानं स्थापयेदित्यर्थः । कैरित्याह आञ्छनैरित्यादि । यथायोगमाञ्छनादिभिरित्यर्थः । अत्राञ्छनानि नानाविधान्याकर्षणानि, पीड़नान्यार्द्रवस्त्रनिपीड़नादिन्यायेनयन्त्रणानि, संक्षिप्यन्ते संकुच्यन्त एभिरिति संक्षेपा आकुञ्चनानि, वक्ष्यति च "प्रसार्य्याकुञ्चयेच्चैनम्" इति । बन्धनानि तु चक्रयोगानुगुणान्येवेति निश्चीयते "मतिमांश्चक्रयोगेन आञ्छेत्" इत्यनागतावेक्षणात् । उक्तमर्थं पुनरुपसंहरन् विशदयति सन्धीनित्यादिना । सर्व्वान् अवक्षिप्तविवर्त्तितातिक्षिप्ततिर्य्यक्क्षिप्तत्वेन प्रपीड़ितानखिलानित्यर्थः । अत्र मतिमानिति विशेषणं यथायोगं विमृश्याञ्छनादीनामुपयोगार्थम् । षट्सु सन्धिमुक्तेषु मध्ये पिष्टावुत्पिष्टविश्लिष्टौ प्रत्याह उत्पिष्टमिति । अथेत्ययं समुच्चयार्थः, घट्टयेत् चालयेत्

घृतदिग्धेन पट्टेन वेष्टयित्वा यथाविधि।
पट्टोपरि कुशां दत्त्वा यथावद्बन्धमाचरेत् ॥ १९ ॥
प्रत्यङ्गभग्नस्य विधिरत ऊर्द्ध्वं प्रवक्ष्यते ॥ २० ॥
नखसन्धिं समुत्पिष्टं रक्तानुगतमारया।
अवमथ्य स्रुते रक्ते शालिपिष्टेन लेपयेत् ॥ २१ ॥
भग्नां वा सन्धिमुक्तां वा स्थापयित्वाङ्गुलीं समम्।
अणुनातिष्ठ्य पट्टेन घृतसिक्तं प्रदापयेत् ॥ २२ ॥
अभ्यज्य सर्पिषा पादं तलभग्नं कुशोत्तरम्।
वस्त्रपट्टेन बध्नीयान्नच व्यायाममाचरेत् ॥
अभ्यज्यायामयेज्जङ्घामूरुञ्च सुसमाहितः।

तस्योत्पिष्टस्य विश्लिष्टस्य चेत्यर्थः। अभिघाते अभिघातजे विकारे हृते ऽपनीते स्वामात्मीयां प्रकृतिं यथास्वभावमिति यावत्। अवनामितादीनां षण्णां बन्धनक्रममुपदिशति घृतेत्यादिना कुशा मधूकादीनां त्वचस्तनु काष्ठानि च ॥ ८—१९ ॥

प्रत्यङ्गेत्यादि। प्रत्यङ्गान्यङ्गावयवाः, रक्तानुगतं दुष्टरक्तानुविद्धम्, आरा व्यधनास्त्रभेदः। अवमथ्य सक्तहिस्त्विर्व्वा विद्धा रक्ते स्रुते स्राविते शालिपिष्टं शालितण्डुलकल्कः। अनुक्तमपि बन्धनमुत्सर्गसिद्धं भवति। व्रणत्वेनाविनाकृतत्वात्। भग्नामित्यादि। समं साधु यथावदित्यनर्थान्तरम्, "सर्व्वसाधु समानेषु समम्" इति मेदिनी। अणुना सूक्ष्मेणेति तात्पर्य्यम्। बन्धनार्थां मधूकादित्वक् काष्ठं वा पश्चात् प्रदेशेऽस्येति कुशोत्तरम्। तलभग्नं पादं वस्त्रपट्टेन कुशोत्तरं बध्नीयादिति सम्बन्धः। इष्टा अत्र मधूकादय-

दत्त्वा कुशत्वचः शीता वस्त्रपट्टेन वेष्टयेत् ॥ २३ ॥
मतिमांश्चक्रयोगेन आञ्छेदूर्व्वस्थि निर्गतम् ।
स्फुटितं पिच्चितञ्चापि वध्नीयात् पूर्व्ववद्भिषक् ॥ २४ ॥
आञ्छेदूर्द्धमधो वापि कटीभग्नन्तु मानवम् ।
ततः स्थानस्थिते सन्धौ वस्तिभिः समुपाचरेत् ॥ २५ ॥
पर्शुकास्वथ भग्नासु घृताभ्यक्तस्य तिष्ठतः ।
दक्षिणास्वथ वा वामास्वनुमृज्य निवन्धनीः ॥

एव प्रकृतत्वात् । मतिमानिति । इदमत्रावधेयम्, ऊरुसन्धेरुदूखला-कारात्गह्वराद्बहिर्निर्गतं हि मुषलाकारमस्थ्यायतत्वादाभुग्नत्वान्मांसादिसन्तत-त्वाच्च अशक्यं भवति स्वस्थानमानेतुं हस्तेनेति कटीमावेष्ट्य दृढ़मातुरं कील-कबन्धं निवध्य वलवद्भिर्ग्राहयित्वा वा चक्राश्रितया रज्ज्वा जानुसन्धेरूर्द्ध्वं वद्ध्वा प्राणानवाधमानाः शनैः शनैश्चक्रभ्रामणेन रज्जुं तामाकृष्यास्थि तदु-दूखलसम्मुखमानयन्ति कुशलायथावदवस्थापयितुम् तदिदमुच्यते मतिमानि-त्यादि तथाच मतिमान् समीक्ष्यकारी चक्रयोगेन प्रदर्शितया रीत्या चक्र-प्रयोगेण निर्गतमुदूखलाद्बहिर्निर्गतम्, ऊर्व्वस्थि ऊरुसन्धिगतं मुषलाकार मस्थ्याञ्छेदाकर्षेत् स्वस्थानमानिनीषयेति निष्कर्षः । चक्रं नामाकर्षणार्थी यन्त्रविशेषः, 'चरखी' इति प्राकृतैराख्यायते । यदत्र शास्त्रतन्त्रार्थतत्त्व-पराङ्मुखानां केषाञ्चिज्जल्पाकानां मतानि स्मारं स्मारं केनचित् 'चक्रयोगेन' इत्युपक्रम्य "वर्त्तुलान् कुशान् दत्त्वा चक्रवदाञ्छेद् वध्नीयादित्यर्थः" इत्येवं वहनर्थकमुक्तं तन्नातीवोचितम्, अस्त्ययं हि लौकिकानामाभाणकः "अन्धस्ये-वान्धलग्नस्य विनिपातः पदेपदे" इति । स्फुटितमित्यादि स्फुटितपिच्चिते नि० १५ अ० उक्त लक्षणे, पूर्व्ववत् तलभग्नवत् ॥ २०—२४ ॥

आञ्छेदित्यादि । अतोऽर्द्धमधोवेति पक्षद्वितयं फल-प्रत्यविशेषाभ्यानु-

ततः कवलिकां दत्त्वा वेष्टयेत् सुसमाहितः।
तैलपूर्णे कटाहे वा द्रोण्यां वा शाययेन्नरम् ॥ २६ ॥
मुषलेनोत्क्षिपेत् कक्षामंससन्धौ विसंहते।
स्थानस्थितञ्च बध्नीत स्वस्तिकेन विचक्षणः ॥ २७ ॥
कौर्परन्तु तथा सन्धिमङ्गुष्ठेनानुमार्ज्जयेत्।
अनुमृज्य ततः सन्धिं पीड़येत् कूर्पराच्युतम्।

पपन्नम्। वस्तिभि र्यथायोगमास्थापनानुवासनोत्तरवस्तिभिरित्यर्थः। वस्त्युपयोगादनन्तरं बन्धनादिकमप्येकान्तेनोपयोगमेतीति "ततः कवलिका" मित्यादिना परेणापि संयुयुजन्ति कुशलाः। पर्शुकास्वित्यादि। अपेत्यर्थं समुच्चयार्थः, तदयमर्थः, दक्षिणास्वथवा वामासु पर्शुकासु पार्श्वास्थिसु भग्नास्वथाभग्नासु तरुणत्वेनानतासु इति यावत्, आम्नायते हि "तरुणास्थीनि नम्यन्ते" इति। निबध्यन्ते याभिरिति व्युत्पत्त्या निबन्धनीर्बन्धनसाधनत्वात् पार्श्ववर्त्तिनीः पर्शुकाः पृष्ठवंशमुभयतश्चतस्रो मांसरज्जूश्चानुमृज्य स्थापयेदिति सन्दर्भः। कवलिकाव्याहृताः। वेष्टयेद्वस्त्रपट्टेनेति नेयम्। समाहितोऽवहितः स्वकर्मकुशल इति तात्पर्य्यम्। द्रोणी काष्ठाम्बुवाहिनी 'टप' इति विज्ञायते। मूषलेत्यादि। अंससन्धौ भुजशिरःसन्धौ विसंहते सन्धिस्थादुदूखलान्मुषलाकारे अस्थ्नि बहिर्निर्गते कक्षां शयानस्य बाहुमूलं मुषलेन कक्षान्तर्निवेशितेन पार्ष्णुापमितेन पादासक्तेनोपसंस्कृतेन काष्ठखण्डेन क्रियासौकर्य्यात् कक्षान्तर्निहितेन पार्ष्णिना वा उत्क्षिपेत् कूर्परादूर्द्ध्वं हस्ताभ्यां गृहीत्वा यथायोगं तिर्य्यगादिसञ्चालनानुविद्धेन वेगविशेषेणाक्ष्योन्नमयेत् मुषलाकार मस्थि तदुदूखलाभिमुखमानीय यथास्थानं स्थापयितुम्। स्वस्तिको नामबन्धविशेषः ॥ २५—२७ ॥

प्रसार्य्याकुञ्चयेच्चैनं स्नेहसेकञ्च दापयेत् ॥ २८ ॥
एवं जानुनि गुल्फे च मणिबन्धे च कारयेत् ॥ २९ ॥
उभे तले समे कृत्वा तलभग्नस्य देहिनः ।
बध्नीयादामतैलेन परिषेकञ्च कारयेत् ॥
प्राग्गोमयमयं पिण्डं धारयेन्मृन्मयं ततः ।
हस्ते जातबले चापि कुर्य्यात् पाषाणधारणम् ॥ ३० ॥
सन्नमुन्नमयेत् खिन्नमचकं मुषलेन तु ।
तथोन्नतं पीड़येच्च बध्नीयाद्गाढमेव च ॥ ३१ ॥

कौर्परमिति। तुकारोऽयमंसोक्तप्रक्रियासाम्यं निरस्यति। तथा विसंहतं कौर्परसन्धिन्तु अङ्गुष्ठेन प्रमार्जयेत् जानुन्यासज्य विश्लिष्टातप्रकारमध्यवसातुमित्याकूतम्। अनुमृज्य पीड़नीयावकाशमनुसन्धातुं प्रमृज्य तत इति द्वितीयान्तात् सार्व्वविभक्तिकस्तसिल्, तं कूर्परात्तुन्नतं कूर्परगर्त्ताद्वहिर्निर्गतं सन्धिं सन्ध्यवयवभूतं गुटिकाकारमस्थिविशेषं पीड़येद्विमर्द्दयेत् एवं सन्धिं प्रसार्य्याकुञ्चयेत् ऋजूकृत्य स्वस्थानस्थापनायेत्यभिसन्धिः। सम्प्रत्यन्यासक्तिकत्वात् कूर्परोक्तं विधिं जान्वादावतिदिशति एवमित्यादिना। उभे इत्यादि। अत्र समे कृत्वेति समीकरणं सम्यक् स्थापितं नवेति संशयनिरासार्थम्। बध्नीयात् कुशाभ्रत्या भग्नमेव तलमित्युन्नेयम्। अत्र गोमयपिण्डादिधारणमावाधभयात् क्रमशो गुरुभारार्पणेन शनैः शनैः स्वकार्य्यक्षमत्वमापादयितुम्, एवञ्चोक्तेनानुक्तमेषु तथाविधद्रव्यान्तरधारणमप्यविरुद्धम्। सन्नमित्यादि। सन्नमवनतमचकं जङ्घतोऽसंश्रितपार्श्वकाकोरमस्थि मुषलेन तदवाचकतलाभिमुखं कृत्वा कथान्तर्निहितेन तिर्य्यगूर्द्धवेगमनुभवेनेति प्रत्येतव्यम्। पीड़येदङ्गुष्ठाभ्यामिति शेषः ॥ २८—३१ ॥

ऊरुवच्चापि कर्त्तव्यं बाहुभग्नचिकित्सितम् ॥ ३२ ॥
ग्रीवायान्तु विवृत्तायां प्रविष्टायामधोऽपि च
अवटावथ हन्वोश्च प्रगृह्योन्नमयेन्नरम् ॥
तथा कुशां समं दत्त्वा वस्त्रपट्टेन वेष्टयेत् ।
उत्तानं शाययेच्चैनं सप्तरात्रमतन्द्रितः ॥ ३३ ॥
हन्वस्थिनी समानीय हनुसन्धौ विसंहते ।
स्वेदयित्वा स्थिते सम्यक् पञ्चाङ्गीं वितरेद्भिषक् ॥
वातघ्नमधुरैः सर्पिः सिद्धं नस्ये च पूजितम् ॥ ३४ ॥
अभग्नांश्चलितान् दन्तान् सरक्तानवपीडयेत् ।
तरुणस्य मनुष्यस्य शीतैरालेपयेद्बहिः ॥

अहो अंससन्धिंप्रत्येकं वक्तव्यमर्थं हित्वा सुदूरमागतोऽस्मि कथा-प्रसङ्गेन तिष्ठत्विदानीं तमेवार्थं वक्ष्यामीत्याह ऊरुवदिति । ऊरुवदूरुसन्धि-वत् चक्रयोगेनेति निष्कर्षः । चापीति अथवेतिवन्निपातसमुदायः पक्षा-न्तरसूचनार्थः । बाहुर्बाहुसन्धिः । कर्त्तव्यं संहतशरीरत्वात् पीवरत्वा-द्दोषस्य विधेरनैकान्तिकत्वमनुमिमानेनेत्याकूतम् । ग्रीवायामित्यादि । विवृत्तायां परिवृत्तायां तिर्य्यग्भूतायामिति यावत् । अवटुर्ग्रीवापश्चाद्भागः । हन्वोः परमार्थतएकत्वे सत्यपि सव्यापसव्यविभागेन द्वित्वं तावदाश्रित्याह हन्वोरित्यध्यवसेयम् । समं यथायोगं ग्रीवापश्चाद्भागे इति हृदयम् ॥३१—३३॥

हन्वित्यादि । हन्वस्थिनी हनुसन्ध्यस्थिनी समानीय सुखं सुखेन संयुज्य । स्थिते स्थापिते इत्यर्थः । पञ्चाङ्गीनाम बन्धविशेषः । वातघ्नानि भद्रदार्व्वा-दीनि मधुराणि च काकोल्यादीनि तानि च सू० ३८ । ४२ पं० द्रष्टव्यानि । अभग्नानित्यादि । निःशेषं निःसृते हि दन्ते मन्यावायुः सहसा निवर्त्ति

सिक्त्वाम्बुभिस्ततः शीतैः सन्धानीयैरुपाचरेत् ।
उत्पलस्य च नालेन क्षीरपानं विधीयते ॥
जीर्णस्य तु मनुष्यस्य वर्ज्जयेच्चलितान् द्विजान् ॥ ३५ ॥
नासां सन्नां विवृत्तां वा ऋज्वीं कृत्वा शलाकया ।
पृथङ्नासिकयोर्नाड्यौ द्विमुख्यौ संप्रवेशयेत् ।
ततः पट्टेन संवेष्ट्य घृतसेकं प्रदापयेत् ॥ ३६ ॥
भग्नं कर्णञ्च बध्नीयात् समं कृत्वा घृतप्लुतम् ।
सद्यःक्षतविधानञ्च ततः पश्चात् समाचरेत् ॥ ३७ ॥
मस्तुलुङ्गाद्विना भिन्ने कपाले मधुसर्पिषी ।
दत्त्वा ततो निबध्नीयात् सप्ताहञ्च पिबेद्घृतम् ॥ ३८ ॥

तमवकाशं सङ्कुचेति युक्तमुक्तं सरलानिति । अवपीडयेत् धान्यरोपणन्यायेनावपीड्य स्थापयेदित्यर्थः । शीतैः शतधौतघृतादिभिर्दूर्व्वाशीरादिभिश्च बहिर्लेपभागमित्यर्थः । शीतैरम्बुभिः सिक्तेति सेचनं गण्डूषधारणाद्नन्यत् । ततः शीताम्बुसेचनानन्तरं सन्धानीयैः सू० ३८ अ० उक्तैर्न्यग्रोधप्रियङ्ग्वम्बष्ठादिभिर्मधुघृतादिभिश्चोपाचरेत् दन्तमूलावलेपनैरिति शेषः । उत्पलनालेनेह क्षीरपानं दन्तचालनभयादिति गम्यते तेन मृणालादिनापि तत्पानं साम्प्रतमेव । नासामित्यादि । सन्नामस्थिभङ्गेनावनतां विवृत्तां वक्राम् । अत्र नासिकयोर्नाड्याविति सिद्धे पृथगिति करकङ्कणन्यायात् झटित्यवबोधार्थम् ॥ ३४—३६ ॥

भग्नमित्यादि । समं कृत्वा यथावत् स्थापयित्वेत्यर्थः । ततो बन्धनात् पश्चात् सद्यः क्षतविधानं सद्योव्रणचिकित्सितं तैलेन स्रोतः प्रपूरणमित्येतत् । मस्तुलुङ्गादित्यादि । भिन्ने हि मस्तिष्के न जीवतीति तत् प्रत्याख्यानार्थमिदमुच्यते मस्तुलुङ्गाद्विनेति । कपाल इति मस्तुलुङ्गशब्दाभिधानात् शिरसो-

पतनादभिघाताद्वा शूनभङ्गं यदृच्छतम् ।
शीतान् प्रदेहान् सेकांश्च भिषक् तत्रावचारयेत् ॥ ३९ ॥
अथ जङ्घोरुभग्नानां कपाटशयनं हितम् ।
कीलका बन्धनार्थञ्च पञ्च कार्य्या विजानता ॥
यथा न चलनं तस्य भग्नस्य क्रियते तथा ।
सन्धेरुभयतो द्वौ द्वौ तले चैकश्च कीलकः ॥
श्रोण्यां वा पृष्ठवंशे वा वक्षस्यक्षकयोस्तथा ।
भग्नसन्धिविमोक्षेषु विधिमेनं समाचरेत् ॥
सन्धींश्चिरविमुक्तांस्तु स्निग्धान् स्विन्नान् मृदूकृतान् ।
उक्तैर्विधानैर्बुद्ध्या च सम्यक् प्रकृतिमानयेत् ॥ ४० ॥

ऽस्थनीत्यर्थः । अथेत्यादि । खट्वेह कीलकवती यथास्थानं स्थानिगमवबध्नती सार्गलकपाटसाम्यात् कपाटशब्देनाख्यायते तस्यां शयनं कपाटशयनम् । नन्वेवं गते कति नाम कीलकास्तत्र स्थापयितव्या इत्याह कीलका इति । कीलकास्त्विह मुद्राकाराः स्तम्भाः 'खोटा' इत्यभिधीयन्ते । उक्तमर्थं पुनर्व्विशिनष्टि यथेति । सन्धर्जानुसन्धेरुभयत उभयपार्श्वतो द्वौ द्वावित्यूर्द्ध्वाधो विभागेन । श्रोण्यादिषु भग्नेषु सन्धिमुक्तेषु सत्सु चात्रविधिमतिदिशति श्रोण्यामित्यादिना । अत्र स्थानतः कीलका अनिर्द्दिष्टा अप्यौपयौगिकत्वात् श्रोण्यां भग्नसन्धिविमुक्तायां तदुभयपार्श्वतः, पृष्ठवंशे वक्षसि च पार्श्वयोः, अक्षकयोरप्येवा कक्षयो र्द्वौ द्वौ सर्व्वत्र तले चैकः कीलको देयः । एवमुभयतः मनुष्यत्वेनोपदिष्टौ द्वौ द्वौ कीलकौ स्थित्वा वृहदाकारे बालुकापूर्वे उपाधाने चेत् शरीरेणासज्योभयतः स्थाप्येते तदाऽपि न काचिद्दस्तुक्षतिरित्युपदेष्टव्यम् । परिशिष्टमतिरोहितार्थम् ॥ ३७—४० ॥

काण्डभग्ने प्ररूढे तु विषमोल्बणसंहिते ।
आपोथ्य समयेद्भग्नं ततो भग्नवदाचरेत् ॥ ४१ ॥
कल्पयेन्निर्गतं शुष्कं व्रणान्तेऽस्थि समाहितः ।
सन्ध्यन्ते वा क्रियां कुर्य्यात् सव्रणे व्रणभग्नवत् ॥ ४२ ॥
ऊर्द्धकाये तु भग्नानां मस्तिष्क्यं कर्णपूरणम् ।
घृतपानं हितं नस्यं प्रशाखास्वनुवासनम् ॥ ४३ ॥

काण्डेत्यादि । काण्डभग्ने विषमत्वेन व्यक्तं सन्धानमस्येति विषमोल्बणसंहितं तस्मिन् तथोक्ते प्ररूढे सन्धुते सति आपोथ्य भङ्क्त्वा भग्नं भग्नावच्छेदं समयेत् समं कुर्य्यात् समंस्थापयेदिति यावत् । भग्नवदाचरेत् भग्नोक्तं बन्धनादिकं कुर्य्यादित्यर्थः । कल्पयेदित्यादि । निर्गतं बहिर्गतं व्रणान्ते व्रणैकदेशे सन्ध्यन्ते सन्ध्येकदेशे वर्त्तमानं वा शुष्कमस्थि समाहितो निपुणो भिषक् कल्पयेच्छेदयेदित्यर्थः । "कल्पनं छेदनं क्लृप्तिरिति त्रिकाण्डशेषात् । अत्र सन्ध्यन्तस्य च व्रणान्तस्थत्वे सत्यपि पृथगुपादानमात्ययिकत्वाच्छेदनेऽवहितत्वेनातितरां भिषजं भावयितुम् । सव्रणे तस्मिन् व्रणभग्नवत् व्रणवद् भग्नवच्चेत्यर्थः, न पुनः "सव्रणस्यतुभग्नस्य" इत्यादि प्रागुक्तविधिवदित्युक्तेयम्, तस्य सशल्यमात्रविषयत्वेनाभ्युपगमात् । शास्त्रे ह्येकदेशनिदर्शनमनुमापकं भवतीति दिङ्मात्रमिदमुक्तमित्यव्यवस्थायामभिज्ञाव्यवस्थेयत्वेन युक्त्यातिदिष्टान्यस्थीनि साम्प्रतमपाकुर्व्वन्ति कुशलाः । ऊर्द्ध्वेत्यादि । ऊर्द्ध्वकायो-मूर्द्धा मस्तिष्क्यं मस्तिष्कहितं शिरसि स्नेहपिचुधारणमित्येतत् । प्रकृष्टा शाखा प्रशाखा चक्षुरिव्यतिरिक्तं हस्तपादमिति यावत् । तासु भग्नासु अनुवासनं पक्वाशयगते वाते दुष्ट इत्युक्तेयम् । अत्र शिरसि प्रशाखासु च भग्नासु मस्तिष्कादीनामनुवासनस्य चोपदेशेऽपि क्रियाणामासां वातप्रत्यनीकत्वेनोपक्रमादन्यत्राऽपि भग्ने चेत् शिरसि पक्वाशये वा वातः प्रकोपमापद्येत तदा विमृश्यैव मस्तिष्कादीन्युपयोज्यानीत्याहुः ॥ ४१—४३ ॥

अत ऊर्द्ध्वं प्रवक्ष्यामि तैलं भग्नस्य साधकम् ॥ ४१ ॥
रात्रौ रात्रौ तिलान् कृष्णान् वासयेदस्थिरे जले ।
दिवा दिवा शोषयित्वा गवां क्षीरेण भावयेत् ॥
तृतीयं सप्तरात्रं वा भावयेन्मधुकाम्बुना ।
ततः क्षीरे पुनः पीतान् सुशुष्कांश्चूर्णयेद्भिषक् ॥
काकोल्यादिं सयष्ट्याह्वं मञ्जिष्ठां शारिवां तथा ।
कुष्ठं सर्ज्जरसं मांसीं सुरदारु सचन्दनम् ॥
शतपुष्पाञ्च सञ्चूर्ण्य तिलचूर्णेन योजयेत् ।
पीड़नार्थञ्च कर्त्तव्यं सर्व्वगन्धशृतं पयः ॥
चतुर्गुणेन पयसा तत् तैलं विपचेद्भिषक् ॥
एलामंशुमतीं पत्रं जीवकं तगरं तथा ।
रोध्रं प्रपौण्डरीकञ्च तथा कालानुसारिणम् ॥
शैरेयकं क्षीरशुक्लामनन्तां समधूलिकाम् ।

अत इत्यादि । अस्थिरे स्रोतस्वति जले इत्यर्थः । भावयेत् रात्रौ वासयित्वा दिवाशोषयेदित्यर्थः उभयञ्चैतत् सप्तसप्तरात्रमिति नेयम् परमतस्तृतीयं सप्तरात्रमित्युक्ते स्तथैव परिभावितत्वाच । क्षीरे पुनः पीतानित्यपि सप्तरात्रमेव पूर्व्वोक्तसाहचर्य्यात् । तिलचूर्णेनेति तिलचूर्णभागत्रितयेन काकोल्यादिप्रभृतीनामेकं भागं योजयेदित्युपदेशः । पीड़नार्थं पीड़नकाले आर्द्रीकरणार्थं । सर्व्वगन्धं नाम "चातुर्जातककर्पूरकक्कोलागुरुकुङ्कुमम् । लवङ्गसहितञ्चैव सर्व्वगन्धं प्रकीर्त्तितम्" इत्युक्तलक्षणम् । तेन क्षीरपाकविधिना शृतं सर्व्वगन्धशृतम् । कल्कद्रव्येष्वंशुमती शालपर्णी, कालानुसारी तगरभेदः, शैरेयकं झिण्टी, क्षीरशुक्ला क्षीरविदारी, अनन्ता शारिवा, मधूलिका

पिष्ट्वा शृङ्गाटकञ्चैव पूर्व्वोक्तान्यौषधानि च।
एभिस्तद्विपचेत् तैलं शास्त्रविन्मृदुनाग्निना॥
एतत् तैलं सदा पथ्यं भग्नानां सर्व्वकर्म्मसु।
आक्षेपके पक्षवधे तालुशोषे तथार्द्दिते॥
मन्यास्तम्भे शिरोरोगे कर्णशूले हनुग्रहे।
बाधिर्य्ये तिमिरे चैव ये च स्त्रीषु क्षयं गताः॥
पथ्यं पाने तथाभ्यङ्गे नस्ये वस्तिषु भोजने॥
ग्रीवास्कन्धोरसां वृद्धिरमुनैवोपजायते।
मुखञ्च पद्मप्रतिमं ससुगन्धिसमीरणम्॥
गन्धतैलमिदं नाम्ना सर्व्ववातविकारनुत्।
राजार्हमेतत् कर्त्तव्यं राज्ञामेव विचक्षणैः॥ ४५॥
त्रपुसाक्षपियालानां तैलानि मधुरैः सह।
वसां दत्त्वा यथालाभं क्षीरे दशगुणे पचेत्॥
स्नेहोत्तममिदञ्चाशु कुर्य्याद्भग्नप्रसाधनम्।
पानाभ्यञ्जननस्येषु वस्तिकर्म्मणि सेचने॥ ४६॥

मूर्व्वा, शृङ्गाटकं जलकण्टकिफलं 'पाणिफल' इति विख्यायते। पूर्व्वोक्तान्यौषधानि काकोल्यादीनि शतपुष्पान्तानि॥ ४४—४५॥

त्रपुषेत्यादि त्रपुषं कर्कटीभेदः 'खीरा' इत्याख्यायते। अक्षं विभीतकफलं, पियालं "पेयाशाल" इति प्रसिद्धस्य फलम्, मधुरैः रसविशेषोक्तैर्मधुरवर्गैरित्यर्थः। भग्नमित्यादि अत्र सन्धिमात्रस्योपादानं दुष्करप्रती-

भग्नं नैति यथा पाकं प्रयतेत तथा भिषक्।
पक्वमांसशिरास्नायु तद्धि कृच्छ्रेण सिध्यति ॥ ४७ ॥
भग्नं सन्धिमनाविद्धमहीनाङ्गमनुल्बणम्।
सुखचेष्टाप्रचारञ्च संहितं सम्यगादिशेत् ॥ ४८ ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने
भग्नचिकित्सितं नाम
तृतीयोऽध्यायः ॥ ३ ॥

कारत्वेन प्राधान्यादित्यवधेयम्। सम्यक् संहितं हि काण्डभग्नमप्येभिरेव चिह्नैरुपलभ्यते। अनाविद्धमकुटिलम्, "आविद्धः . × × ×, कुटिले" इति मेदिनी। अनुल्बणमनुन्नतम्, अतिरोहितार्थमन्यत् ॥ ४६—४८ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये चिकित्सितस्थाने भग्नचिकित्सितं नाम तृतीयोऽध्यायः।

चतुर्थोऽध्यायः ।

अथातो वातव्याधिचिकित्सितं व्याख्यास्यामः ॥ १ ॥

आमाशयगते वाते छर्दयित्वा यथाक्रमम् ।
देयः षड्धरणो योगः सप्तरात्रं सुखाम्बुना ॥ २ ॥

चित्रकेन्द्रयवौ पाठा कटुकातिविषाभया ।
वातव्याधिप्रशमनो योगः षड्धरणः स्मृतः ॥ ३ ॥

पक्वाशयगते चापि देयं स्नेहविरेचनम् ।
वस्तयः शोधनीयाश्च प्राशाश्च लवणोत्तराः ॥ ४ ॥

भग्नं हि जनिं प्रति हेतुत्वेनाऽभिघातमभीप्सतीति निरदिक्षत्, आम्नायते वायुर्वेदे "अभिघातादभोजनात्" इत्युपक्रम्य "अनिलोबली करोति विविधान् व्याधीन् सर्वाङ्गैकाङ्गसंश्रयान्" इति, एवमसम्यक् संहितञ्च भग्नं वातव्याधिविधानेनोपक्रामन्ति भिषजः सम्यक् सन्धानगुणमापपादयितुम्, तदिदानीं निदानसाम्यात् केनाप्यंशेन प्रतीकारसाम्याच्चोद्दिष्टं वातव्याधिचिकित्सितमधिकरोति अथात इत्यादिना । वातव्याधिशब्देनेह सुखसाध्यत्वेन क्षुद्रा एव ते ते वातविकारा अभिप्रेयन्त इति निश्चीयतेऽनन्तरं तेषामेवोपादानात् परमतः पृथक्तेन महतां पुनर्वातव्याधीनां चिकित्सितोपदेशाच्च ॥ १ ॥

आमाशयेत्यादि । आमाशयगत इति वायोरनुकूलतयपक्वनिदानोक्तेः [illegible] आमाशयगतत्वेनाभूत इत्यर्थः । एतेन शेषं व्याख्यातप्रायम् । छेदादि-

कार्य्यो वस्तिगते चापि विधिर्वस्तिविशोधनः ॥ ५ ॥
श्रोत्रादिषु प्रकुपिते कार्य्यश्चानिलहा क्रमः ।
स्नेहाभ्यङ्गोपनाहाश्च मर्द्दनालेपनानि च ॥ ६ ॥
त्वङ्मांसासृक्शिराः प्राप्ते कुर्य्याच्चासृग्विमोक्षणम् ॥ ७ ॥
स्नेहोपनाहाग्निकर्म्म-बन्धनोन्मर्द्दनानि च ।
स्नायुसन्ध्यस्थिसंप्राप्ते कुर्य्याद्वायावतन्द्रितः ॥ ८ ॥
निरुद्धेऽस्थनि वा वायौ पाणिमन्थेन दारिते ।
नाड़ीं दत्त्वास्थनि भिषक् चूषयेत् पवनं बली ॥ ९ ॥

क्रममनतिक्रम्येति यथाक्रमम् । षण्णामनन्तरोक्तानां चित्रकादीनां धरण-मत्रेति षड्धरणः । धरणं हि पलदशमांशः पलस्य कर्षचतुष्टयं, कर्षस्व-स्मिन् शास्त्रेऽशीतिरक्तिक एवेति "चि० ३१ अ० ११" व्यक्तीभविष्यतीति योगस्यास्य पलदशमांशत्वेन द्वात्रिंशद्रक्तिकमेव मानमुपयोज्यमित्याविष्कृतं भवति षड्धरणेति विशेषणात् । सप्तरात्रमिति मध्यबलदोषप्रतीकारा-ऽभिप्रायेणेति द्रष्टव्यम् , दोषबलतारतम्येनावश्यमुपशमनकालतारतम्या-दित्यतो यावदारोग्यदर्शनादिति निष्कर्षः । महाव्याधिप्रशमन इति पाठेतु महाव्याधयोनाम "सू० ३३ अ०" परिभाषाविशेषेणोपदिष्टा अष्टौ वात-व्याध्यादयः । पक्वेत्यादि शोधनीया वस्तयोऽपि स्नैहिका एवानुगुणत्वात् । प्रकर्षणौपयोगिकतया अभ्यन्त इति प्रायाः प्रत्यानूपमांसाद्याहारास्ते तु लव-णान्तराः प्रचुरक्षायान्तरणा इत्युक्तेयं लवणेष्वस्यैव पानादिष्वभ्यवहार्य्यत्वेन विशेषितत्वात् । वस्तिविशोधनो मूत्राघातस्य उपशमनः ॥ २—५ ॥

निरुद्ध इत्यादि । तु शस्त्रस्थानाऽभिज्ञानोऽयं वा शस्त्रोऽस्थिगतश्च वायो-[illegible]। [illegible] विशेषात

शुक्रप्राप्तेऽनिले कार्य्यं शुक्रदोषचिकित्सितम् ॥ १० ॥
अवगाह-कुटी-कर्षू-प्रस्तराभ्यङ्ग-बस्तिभिः ।
जयेत् सर्व्वाङ्गगं वातं शिरामोक्षैश्च बुद्धिमान् ॥ ११ ॥
एकाङ्गगञ्च मतिमान् शृङ्गैश्चावस्थितं जयेत् ॥ १२ ॥
बलास-पित्त-रक्तैस्तु संसृष्टमविरोधिभिः ॥ १३ ॥

ध्वानेनेति मन्त्रोऽत्र सूत्रधाराणां "भ्रमर" इति प्रसिद्ध धाराविशेष इत्याहुः । तच्चोपयोगकाले प्रसारितपाणितलयुगप्रच्छादितहस्तमेव प्राच- यन्त्रधार्य्याः पाणिभ्यां परिभ्राम्य मण्डलाकारेण च्छिद्रं कारयितुं तदिदमुक्तं पाणीति । पाणिभ्यां प्रचारितोमन्थः पाणिमन्थः शाकपार्थिवादिषु द्रष्टव्यः । तथाच वायावस्थिनिरुद्धे श्लेष्मादीनां प्रतिहतत्वेनातितरामावृततयाऽनुभूते पाणिमन्थेन यथोक्तेन शस्त्रेण विदारिते सच्छिद्रीकृतेऽस्थनि नाड़ी मित्यौपयोगिकतया द्विमुखीं रजतादिनाड़िकां दत्वा संयोज्य बली भिषक् पवनं चूषयेदित्यर्थः । शुक्रेत्यादि । शुक्रदोषचिकित्सितं "शा० २ अ०" उपदिष्टम् । अवेत्यादि । अनन्तरश्लोके तुशब्दः समुच्चयार्थः । तथाच बलासपित्तरक्तैः संसृष्टमसंसृष्टञ्च सर्व्वाङ्गगमेकाङ्गगञ्च वातं बुद्धिमानवगाहादिभिः सिरामोक्षै रविरोधिभिराहारादिभिश्च जयेत्, अवस्थितं निरुद्धत्वेनाचलञ्च वातं मतिमान् शृङ्गैरविरोधिभिश्च निर्हरेदित्येवमेवान्वयः सन्निहितान्वये हि शुद्धवातेऽपि कुट्यादिस्वेदशोणितमोक्षयोः प्रसक्तेर्यातां तत्रेष्यते इति शास्त्रमिदमवगाह्य निश्चीयते । अवगाहोऽत्र द्रवस्वेदः कुटी प्रस्तरः कर्षूस्वेदः । कर्षूर्गोमयाग्निः "कारीषाग्नौ कुमान् कर्षूः" इति रभसः । नेह सिरामोक्षैः शृङ्गैरेति बहुवचन- [illegible] सम्भूतवातमात्रमुपहन्तु दोषमलमभिसमीक्ष्य [illegible] बोध्यम् । अत्र बुद्धिमान् मतिमांश्चेति [illegible]

सुप्तिवातेत्वसृङ्मोक्षं कुर्य्यात् तु बहुशो भिषक् ।
दिह्याच्च लवणागारधूमैस्तैलसमन्वितैः ॥ १४ ॥
पञ्चमूलीशृतं क्षीरं फलाम्लो रस एव च ।
सुस्निग्धो धान्ययूषो वा हितो वातविकारिणाम् ॥१५॥
काकोल्यादिः सवातघ्नः सर्व्वाम्लद्रव्यसंयुतः ।
सानूपोदकमांसस्तु सर्व्वस्नेहसमन्वितः ॥
सुखोष्णाः स्पष्टलवणाः शाल्वणाः परिकीर्त्तिताः ।
तेनोपनाहं कुर्व्वीत सर्व्वदा वातरोगिणाम् ॥
कुञ्चमानं रुजार्त्तं वा गात्रं स्तब्धमथापि वा ।
गाढं पट्टैर्निबध्नीयात् क्षौमकार्पासकौषिकैः ॥
बिडालनकुलोष्ट्राणां चर्म्मगोधां मृगस्य वा ।

सिरामोक्षयोश्च यथा योगमुपयोगार्थम् । एवञ्चावगाढोविशेषतः पित्तसंसृष्टे वायावुपयोज्यः, कुम्भ्यादयस्तयस्तु श्लेष्मसंसृष्टे इति स्वेदाध्यायमनुसन्धायाध्यव-सितव्यम् । अभ्यङ्गो वस्तिश्च शुद्धे वाते संसृष्टे पुनर्निपुणं विभाव्य, शृङ्गसिरा-मोक्षणे च शोणितसंसृष्ट एवेति सन्दर्भः ॥ ८—१३ ॥

अवस्थितत्वेन लब्धे सुप्तिवाते पुनर्विशिनष्टि सुप्तीति । स्पर्शानभिज्ञत्वे-नोपलक्षितो वातः सुप्तिवातः । असृङ्मोक्षमिति येन केनचिदेव । दिह्यात् लिम्पेत् । स्निग्धादविरोधीन्याहारादीनि यान्युपयोक्ष्यामस्तेषु तेषु वात-विकारिष्वित्याह पञ्चेति । फलाम्लो दाडिमाद्यम्लः रसोऽत्र छागमांसरसः, धान्यन्तु वाह्लकत्वेन प्रसिद्धं कुलत्थादि । कुञ्चेत्यादि । आढमित्यभिव्यक्ती क्रियेति नेयं अध्यमभिज्ञात्य "अस्थ्नोः सन्धिषु च शिथिलः" इत्युपदेशात् ।

प्रवेशयेद्वा स्वभ्यक्तं शाल्वणेनोपनाहितम् ॥ १६ ॥
स्कन्धवक्षस्त्रिकप्राप्तं वायुं मन्यागतं तथा ।
वमनं हन्ति नस्यञ्च कुशलेन प्रयोजितम् ॥ १७ ॥
शिरोगतं शिरोवस्तिर्हन्ति वातमिमोक्षणम् ।
स्नेहमात्रासहस्रन्तु धारयेत् तत्र योगतः ॥ १८ ॥
सर्व्वाङ्गगतमेकाङ्गस्थितं वापि समीरणम् ।
हणद्धि केवलो वस्तिर्वायुवेगमिवाचलः ॥ १९ ॥
स्नेहस्वेदस्तथाभ्यङ्गो वस्तिः स्नेहविरेचनम् ।
शिरोवस्तिः शिरःस्नेहो धूमः स्नैहिक एव च ॥
सुखोष्णाः स्नेहगण्डूषो नस्यं स्नैहिकमेव च ।
रसाः क्षीराणि मांसानि स्नेहाः स्नेहान्वितञ्च यत् ॥
भोजनानि फलाम्लानि स्निग्धानि लवणानि च ।
सुखोष्णाश्च परीषेकास्तथा संवाहनानि च ॥
कुङ्कुमागुरुपत्राणि कुष्ठैलातगराणि च ।
कौशेयौर्णिकरोमाणि कार्पासानि गुरूणि च ॥

और्णिकं मेषलोमजं वस्त्रम् । गोणीशब्दस्येह कार्पेतात्पर्य्यम् । प्रसङ्गादेकाङ्ग-विशेषगतवातचिकित्सितमधिकरोति स्कन्धेति । शिरोवस्तिः शिरसि स्नेह-पिचुधारणं, मात्रा लघ्वक्षरोच्चारणोपलक्षितः कालः । तु शब्दः समुच्चयार्थः । तत्र शिरसि धारयेत् सामितादिकर्णनालवालेनाधस्तात् परिवेष्ट्यानुवेध्य योगत इति विशेषणात् । योगो युक्तिरित्यनर्थान्तरम् ॥ १४-१८

प्रवर्त्तितोऽयं प्रासङ्गिकार्थः सम्प्रति तु शिष्टं प्रकृतमेवं प्रवर्त्तयिष्याम

निवातातपयुक्तानि तथा गर्भगृहाणि च ।

मृदवो शय्याग्निसन्तापो ब्रह्मचर्यं तथैव च ॥

समासेनैवमादीनि योज्यान्यनिलरोगिषु ॥ २० ॥

त्रिवृद्दन्तीसुवर्णक्षीरीसप्तलाशङ्खिनीत्रिफलाविडङ्गानामक्ष-समाः कल्काः, बिल्वमात्रः कल्कस्तिल्वकमूलकम्पिल्लकयो-स्त्रिफलारसदधिपात्रे द्वे द्वे, घृतपात्रमेकं, तदैकध्यं संसृज्य विपचेत्; तिल्वक-सर्पिरेतत् स्नेहविरेचनमुपदिशन्ति वात-रोगेषु । तिल्वकविधिरेवाशोकरम्यकयोर्द्रष्टव्यः ॥ २१ ॥

तिलपरिपीडनोपकरणकाष्ठान्याहृत्यानल्पकालं तैलपरि-पीतान्यणूनि खण्डशः कल्पयित्वावक्षुद्य महति कटाहे पा-नीये चाप्लाव्य क्वाथयेत्, ततः स्नेहमम्बुपृष्ठाद्यदुदेति तत् सरकपालयोरन्यतरेणादाय वातघ्नौषधप्रतीवापस्य स्नेहपाक-कल्पेन विपचेत्, एतदणुतैलमुपदिशन्ति वातरोगेषु । अणु-भ्यस्तैलद्रव्येभ्यो निष्पाद्यत इत्यणुतैलम् ॥ २२ ॥

अथ महापञ्चमूलकाष्ठैर्बहुभिरवदह्यावनिप्रदेशमसितमु-षितमेकरात्रमुपशान्तेऽग्नावपोह्य भस्म निहतां भूमिं विदा-

---

इत्याह सर्व्वेति । अम्लानि फलानि फलाम्लानि । संवाहनमङ्गमर्द्दनं । धर्म्म [illegible] गुर्व्वाच छत्रादीनि । ब्रह्मचर्य्यं सर्व्वथा मैथुनपरित्यागम् ॥ १९—२० ॥

भगवन् [illegible] देवत्तं स्नेहविरेचनमुपदिशन्तीत्याह त्रिवृदित्यादि । सुवर्णक्षीरी कङ्कुष्ठः व्यवहारस्तु "स्वर्णक्षीरी" इति प्रसिद्धैव । सप्तलाया-स्त्वभावेतु "कालादाना" नामौषधि [illegible], शङ्खिनी यवतिक्ता "[illegible]' इति [illegible] । तिल्वको लोध्रः [illegible]; "[illegible]-

रीगन्धादिसिद्धेन तैलघटशतेन तुल्यपयसाभिषिच्यैकरात्रमवस्थाप्य ततो यावती मृत्तिका स्निग्धा स्यात् तामादायोष्णोदकेन महति कटाहेऽभ्यासिञ्चेत्; तत्र यत् तैलमुत्तिष्ठेत् तत् पाणिभ्यां पर्य्यादाय स्वनुगुप्तं निदध्यात्। ततस्तैलं वातहरौषधक्वाथमांसरसक्षीराम्लभागसहस्रेण सहस्रपाकं विपचेद्यावता कालेन शक्नोति पक्तुम्। प्रतिवापश्चात्र हैमवता दक्षिणापथगाश्च गन्धाः, वातघ्नानि च, तस्मिन् सिध्यति, शङ्खानाध्मापयेद्दुन्दुभिं घातयेच्छत्रं धारयेद्वालव्यजनैश्च वीजयेद्ब्राह्मणसहस्रं भोजयेत्, तत् साधु सिद्धमवतार्य्य सौवर्णे राजते मृन्मये वा पात्रे स्वनुगुप्तं निदध्यात्। तदेतत् सहस्रपाकमप्रतिवारवीर्य्यं राजार्हं तैलम्। एवं भागशतविपक्वं शतपाकम् ॥ २३ ॥

गन्धर्व्वहस्त-मुष्कक-नक्तमालाटरूषक-पूतीकारग्वध-चित्रकादीनां पत्राण्यार्द्राणि लवणेन सहोदूखलेऽवक्षुद्य स्नेहघटे प्रक्षिप्यावलिप्य गोशकृद्भिर्दाहयेत्; एतत् पत्रलवणमुपदिशन्ति वातरोगेषु ॥ २४ ॥

लागुड़ी" इत्याख्यायते। सम्प्रति तिल्वकं हित्वाऽशोकेनैक मेकञ्च सर्पी रम्यकेन पाचयितुं विधिरयमतिदिश्यते तिल्वकेत्यादिना रम्यकं पटोलमूलं। तिलेत्यादि। अनल्पकालं तैलपरिपीतानि तिलपीड़नोपकरणकाष्ठानि "घानि" इति प्रसिद्धस्य काष्ठानि। खण्डशोऽणूनि कारयित्वेत्यन्वयः। सरकः पानपात्राकारः क्षुद्रशरावः। अथेत्यादि, असित-कृष्णवर्णं निहन्तीं शीतलाम्। हैमवता गन्धाः कस्तूरीजटामांसीप्रभृतयः दक्षिणपथगाश्च

एवं स्नुहीकाण्डवार्त्ताकुशिग्रुलवणानि संचूर्ण्य घटं पूरयित्वा सर्पिस्तैलवसामज्जभिः प्रक्षिप्यावलिप्य गोमयाग्निना दाहयेत्; एतत् स्नेहलवणमुपदिशन्ति वातरोगेषु। [काण्डलवणम्] ॥ २५ ॥

गण्डीर-पलाश-कुटज-बिल्वार्क-स्नुह्यपामार्ग-पाटला-पारिभद्रक-नादेयी-कृष्णगन्धा-नीप-निर्दहन्यटरूषक-नक्तमालक-पूतीक-बृहती-कण्टकारिका-भल्लातकेङ्गुदी-वैजयन्ती-कदली-वर्षाभू-ह्रीवेर-सुरकेन्द्रवारुणी-श्वेतमोचकाशोका इत्येवं वर्गं समूलपत्रशाखमार्द्रमाहृत्य लवणेन सह संसृष्टं पूर्ववद्दग्ध्वा क्षारकल्पेन परिस्राव्य विपचेत्। एतत्प्रतिवापश्चात्र हिङ्ग्वादिभिः पिप्पल्यादिभिर्वा। इत्येतत् कल्याणकलवणं वातरोगेषु गुल्मप्लीहाग्निसङ्गाजीर्णार्शोऽरोचकार्त्तानां कासादिभिरुपद्रुतानाञ्चोपदिशन्ति पानभोजनेष्विति ॥ २६ ॥

भवति चात्र।

विष्यन्दनादुष्णभावाद्दोषाणाञ्च विपाचनात्।

गन्धाश्चन्दनकक्कोलादयः। शङ्कानःश्चापचेदित्याद्याःसुगमः। एवमनेन विधिना, शतपाकं विद्यादिति शेषः। गन्धर्व्वेत्यादि, गन्धर्व्वहस्तः एरण्डः। गण्डीरेत्यादि गण्डीरो नामौषधिः "शशा" इत्याख्यायते नादेयी भूमिजम्बूका खर्व्वाकारो जम्बूवृक्ष इति यावत्। कृष्णगन्धा शोभाञ्जनः निर्दहनी मूर्व्वा, सुरकः—कोकिलाक्षः। विपचेदेतदित्यन्वयः। विष्यन्दनेत्यादि। विष्यन्दनात् क्षरणात् मूत्रपुरीषादीनां निर्हरणादिति यावत्, संस्कारणाद्यनन्तर-

संस्कारपाचनाच्चेदं वातरोगेषु शस्यते ॥ २७ ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने

वातव्याधिचिकित्सितं नाम

चतुर्थोऽध्यायः ॥ ४ ॥

दश्यशहाय्यैामममपानानां संस्कारात् पाचनाच्चेत्यर्थः । शस्यते लवणजात-मिति शेषः । परिशिष्टं निगदव्याख्यातम् ॥ २१—२७ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये

चिकित्सितस्थाने वातव्याधिचिकित्सितं नाम चतुर्थोऽध्यायः ।

पञ्चमोऽध्यायः ।

अथातो महावातव्याधिचिकित्सितं व्याख्यास्यामः ॥ १ ॥

द्विविधं वातशोणितमुत्तानमवगाढञ्चेत्येके भाषन्ते तत्तु न सम्यक् कुष्ठवदुत्तानं भूत्वा कालान्तरेणावगाढीभवति तस्मान्न द्विविधम् ॥ २ ॥

तत्र बलवद्विग्रहादिभिः प्रकुपितस्य वायोर्गुरूष्णाध्यशनशीलस्य प्रदुष्टं शोणितं मार्गमावृत्य वातेन सहैकीभूतं युगपद्वात-

---

अवसितमिदं क्षुद्राणां वातव्याधीनां चिकित्सितमिदानीन्तु व्याधिव्यासितत्वेनाभ्युपगतमेवार्थं व्याख्यास्याम इत्यभिसन्धायोद्दिष्टं महावातव्याधिचिकित्सितमधिकरोति अथात इत्यादिना । महत्त्वमेषां दुःसाध्यत्वेनासाध्यत्वेन च वर्णनीयम् ॥ १ ॥

न तावन्नवानामनवानाञ्च व्याधीनां प्रतीकारसाम्यं साम्प्रतं भवति कालप्रकर्षनिकर्षतो बलाबलविशेषेणानुगतत्वादित्येवं मन्वानो भगवान् प्रागेव गम्भीरधातुगतस्य वातशोणितस्य नित्यानवत्वं प्रतिपिपादयिषुः पराभिमतमपाकरोति द्विविधमित्यादिना । एके इत्यात्रेयादयः । उत्तानं त्वङ्मांसाश्रयम्, अवगाढन्त्वन्तराश्रयम्, मांसादिगतमित्येतत् । व्याधेरस्य वातशोणितमूलत्वेऽपि वातव्याधित्वेन परिग्रहः स्वतन्त्रसिद्धान्तानुपपन्नः । नह्यसौ निपुणोऽपि कश्चिद्रोगतत्त्वमजानन् किमपि कर्तुमुत्सहते तदिह निदानोक्तमर्थं स्फुटीकृत्यावगमयन्नधिकमपि किञ्चि-

रक्तनिमित्तां वेदनां जनयतीति वातरक्तम् । तत्तु पूर्व्वं हस्तपादयोरवस्थानं कृत्वा पश्चाद्देहं व्याप्नोति । तस्य पूर्व्वरूपाणि तोद-दाह-कण्डू-शोफ-स्तम्भ-त्वक्पारुष्य-शिरास्नायु-धमनिस्पन्दन-सक्थिदौर्ब्बल्यानि श्यावरक्तमण्डलोत्पत्तिश्चाकस्मात् पाणिपादतलाङ्गुलिगुल्फप्रभृतिषु । तत्राप्रतिकारिणोऽपचारिणश्च रोगो व्यक्तस्तस्य लक्षणमुक्तम् । तत्राप्रतिकारिणो वैकल्यं भवति ॥ ३ ॥

भवति चात्र ।

प्रायशः सुकुमाराणां मिथ्याहारविहारिणाम् ।
स्थूलानां सुखिनाञ्चापि वातरक्तं प्रकुप्यति ॥ ४ ॥

तत्र प्राणमांसक्षय-पिपासा-ज्वर-मूर्च्छा-श्वास-कास-स्तम्भारोचकाविपाकविसरणसङ्कोचनैरनुपद्रुतं बलवन्तमात्मवन्तमुपकरणवन्तञ्चोपक्रमेत् ॥ ५ ॥

दुपदिदिक्षति तत्रेति । उक्तलक्षणं पित्तं तत्र दोषेषु मध्ये उक्तलक्षणस्य वायोर्म्मार्गमाहत्येति सम्बन्धः । इत्यतो वातरक्तमुच्यत इति शेषः । कार्य्यकारणयोरनन्यत्वादिति सन्दर्भः । लक्षणमुक्तं निदानस्थले इत्युन्नेयम् । तत्र व्यक्तावस्थायां वैकल्यमङ्गुलीवक्रत्वादिकमित्यर्थः । विसरणम् विसर्पणम् । प्राणो बलं, बलवन्तं प्रचुरबलं भुम्नि मतुप् ॥ २—५ ॥

तस्मादादावेव वह्नवातरुचमूनाज्ञाद्वते मार्गावरणाद्दुष्ट-शोणितमसकृदल्पाल्पमवसिञ्चेद्वातकोपभयात् । ततो वमनादिभिरुपक्रमैरुपपाद्य प्रतिसंसृष्टभक्तं वातप्रबले पुराणघृतं पाययेदजाक्षीरञ्चार्द्धतैलं, मधुकाद्ययुक्तं, मधुकाद्यसिद्धं शृगालविन्नासिद्धं वा शर्करामधुमधुरं शुण्ठीशृङ्गाटककशेरुकसिद्धं वा, श्यामा-रास्ना-सुषवी-शृगालविन्ना-पीलु-शतावरी-श्वदंष्ट्राद्विपञ्चमूलीसिद्धं वा ॥ ६ ॥

द्विपञ्चमूलीक्वाथाष्टगुणसिद्धेन च पयसा मधुक-मेषशृङ्गी-श्वदंष्ट्रा-सरल-भद्रदारु-वचा-सुरभिकल्कप्रतीवापं तैलं पाचयित्वा पानादिषूपयुञ्जीत, शतावरी-मयूरक-मधुक-क्षीरविदारी-बलातिबला-तृणपञ्चमूलीक्वाथसिद्धं वा काकोल्यादिप्रतीवापं बलातैलं शतपाकञ्चेति । वातघ्नमूलसिद्धेन च पयसा परिषेचनमर्म्मन वा कुर्व्वीत । यवमधुकैरण्डतिलवर्षाभूभिर्वा प्रदेहः कार्य्यः ॥ ७ ॥

तत्रेत्यादि । मार्गावरणात् शोणितेन वायोर्मार्गनिरोधात् । प्रतिसंसृष्टभक्तं पेयादिक्रमेणान्नं भुक्तवन्तम् । अजाक्षीरञ्चेति चकारः पक्षान्तरसूचनार्थः, अर्द्धतैलमजाक्षीरं चेत्यर्थः । यष्टः कर्ष इति पर्य्यायौ, शृगालविन्ना पृश्निपर्णी, इक्षामूलञ्च वाशब्देनाजाक्षीरमित्याकृष्यान्वेयम्, श्यामा श्याममूला त्रिवृत् सुषवी कारवेल्लकम्, सुरभिः कत्तृणम्, मयूरकोऽपामार्गः, शतपाकं बलातैलं 'चि० १५ अ०' निवेदयिष्यते । वातघ्न-

तत्र चूर्णितेषु यव-गोधूम-तिल-मुद्ग-माषेषु प्रत्येकशः काकोली-क्षीरकाकोली-जीवकर्षभक-बलातिबला-विस-मृणाल-शृगालविन्ना-मेषशृङ्गी-पियाल-शर्करा-कशेरुक-सुरभि-वृषाक-ल्कमिश्रेषूपनाहार्थं सर्पिस्तैल-वसा-मज्जदुग्धसिद्धाः पञ्च पायसा व्याख्याताः । स्नैहिकफलसारोत्कारिका वा । चूर्णितेषु यवगोधूमतिलमुद्गमाषेषु विचित्रमत्स्यपिशितवेशवारो वा । विल्वपेशिका-तगर-देवदारु-सरलरास्ना-हरेणु-कुष्ठ-शतपुष्पा-सुरादधिमस्तुयुक्त उपनाहः । मातुलुङ्गाम्लसैन्धवघृतमिश्रो मधुशिग्रुमूलमालेपे तिलकल्कश्चेति वातप्रबले ॥ ८ ॥

मूलानि दशमूलादीनि । तत्रेत्यादि, प्रत्येकशः एकमेकं कृत्वा गोधूमादिष्वित्यर्थः । यवादिविशेषणमेतत् । अत्र पाकार्थं दुग्धं शेषाणि च स्निग्धत्वसम्पादनार्थेति नेयम् । विसमत्र सूक्ष्ममृणालं मृणालन्तु तद्विपर्य्यासः । स्नैहिकेत्यादौ वा शब्देन सर्पिरादिपदं लिङ्गवचनव्यत्यासेनाकृष्यते । नानावर्णा हि मत्स्याः प्रायेण मेदुरत्वादतिस्निग्धा भवन्ति तदिदमुक्तं विचित्रेति । वेशवारोनाम "निरस्थि पिशितं पिष्टं स्विन्न गुड़ घृतान्वितम् । कृष्णा मरिच संयुक्तं वेशवारः" इत्युक्तलक्षणः । विल्वेष्वतिकोमलं विल्वपेशिका, तगराभावे शीतलीजटा देया. मधुशिग्रुस्तु शोभाञ्जनः ॥ ६—८ ॥

पित्तप्रबले द्राक्षारेवत-कटुफल-पयस्या-मधुक-चन्दन-काश्मर्य्यकषायं शर्करामधुमधुरं पाययेत् । शतावरी-मधुक-पटोल-त्रिफला-कटुरोहिणीकषायं गुडूचीकषायं वा पित्तज्वरहरचन्दनादिकषायं शर्करामधुमधुरं तिक्तकषायसिद्धं वा सर्पिः ॥ ९ ॥

विसमृणालभद्रश्रियपद्मककषायेणार्द्धक्षीरेण परिषिक्तः । क्षीरेक्षुरस-मधु-शर्करा-तण्डुलोदकैर्वा द्राक्षेक्षुकषायमिश्रैर्मस्तु-मधु-धान्याम्लैर्जीवनीयसिद्धेन वा सर्पिषाभ्यङ्गः ॥ १० ॥

शतधौतघृतेन वा काकोल्यादिकल्कविपक्वेन वा सर्पिषा शालि-षष्टिक-नल-वञ्जुल-तालीश-शृङ्गाटक-गलौड्र-गौरी-गैरिक-शैवल-पद्मक-पद्मपत्रप्रभृतिभिर्धान्याम्लपिष्टैः प्रदेहो घृतमिश्रः । वातप्रबलेऽप्येष सुखोष्णः प्रदेहः कार्य्यः । रक्तप्रबलेऽप्येवं बहुशश्च शोणितमवसेचयेत् शीततमाश्च प्रदेहाः कार्य्या इति ॥ ११ ॥

पित्तेत्यादि । आरेवत आरग्वधः, काश्मर्य्यं गाम्भारीफलम् । पित्तज्वरहर कषायं 'सू० ३९ अ०' उक्तं चन्दनादि कषायश्चेति पित्तज्वरहरचन्दनादिकषायम् । तिक्तं तिक्तवर्गं सू० ४२ अ० निरदिक्षत् । भद्रश्रियं श्वेतचन्दनम्, जीवनीयः "सू० ३८ अ०" उक्तः काकोल्यादिः वञ्जुलो वेतसः व्यवहारस्तु स्थलपद्मसमाख्यस्यैव गलौ मण्डूकमत्स्यः 'मङ्गुर' इत्याख्यायते । गोलोजपापुष्पम् गौरी हरिद्रा ॥ ९—११ ॥

श्लेष्मप्रबले त्वामलक-हरिद्राकषायं मधुमधुरं पाययेत् । त्रिफलाकषायं वा मधुक-शृङ्गवेर-हरीतकी-तिक्तारोहिणीकल्कं वा सक्षौद्रमूत्रं तोयेन गुड़हरीतकीं वा भक्षयेत् ॥ १२ ॥

तैल-मूत्र-क्षारोदक-सुरा-शुक्त-कफघ्नौषधनिःक्वाथैः परिषेकः । आरग्वधादिकषायैर्वोष्णैः । मस्तु-मूत्र-सुरा-शुक्त-मधुक-सारिवा-पद्मकसिद्धं वा घृतमभ्यङ्गः । तिल-सर्षपातसीयवचूर्णानि श्लेष्मातक-कपित्थ-मधुशिग्रुमिश्राणि क्षार-मूत्रपिष्टः प्रदेहः ॥ १३ ॥

श्वेतसर्षपकल्कः, तिलाश्वगन्धाकल्कः, पियाल-शेलु-कपित्थ-त्वक्कल्कः, मधुशिग्रु-पुनर्नवाकल्कः, व्योष-तिक्ता-पृथक्पर्णीबृहती-कल्क इत्येते पञ्च प्रदेहाः सुखोष्णाः क्षारोदकपिष्टाः ॥१४॥

शालपर्णी पृश्निपर्णी बृहत्यौ वा क्षीरपिष्टास्तर्पणमिश्राः । संसर्गे सन्निपाते च क्रियापथमुक्तं मिश्रं कुर्य्यात् ॥ १५ ॥

सर्व्वेषु गुड़हरीतकीं वा सेवेत, पिप्पलीर्वा क्षीरपिष्टा वारिपिष्टा वा पञ्चाभिवृद्ध्या दशाभिवृद्ध्या वा पिबेत् क्षीरौदनाहारो दशरात्रं भूयश्चापकर्षयेदेवं यावत् पञ्च दश चेति,

---

श्लेष्मेत्यादि । क्षारोदकं सू० ११ अ०' उक्तं कफघ्नान्यौषधानितु सू०४२अ० उक्तानि श्वेतेत्यादि शेलुः श्लेष्मातकः "नोनाआता" इत्याख्यायते । व्योषं त्रिकटुकं पृथक्पर्णी पृश्निपर्णी । शालेत्यादि, वृहत्यौ कण्टकारी-बार्त्ताकुश्च । तर्पणं यवशक्तावस्तर्पणम् । मिश्रं यथादोषं संयुक्तमित्यर्थः । सर्व्वेष्वित्यादि । पञ्चदशचेति चकारात् यावत

तदेतत् पिप्पलीवर्द्धमानकं वातशोणित-विषमज्वरारोचक-पाण्डुरोग-प्लीहोदरार्शः-कास-श्वास शोफ-शोषाग्निसाद-हृद्रोगोदराण्युपहन्ति॥ १६ ॥

जीवनीयप्रतीवापं सर्पिः पयसा पाचयित्वाभ्यञ्ज्यात्॥१७॥

सहा-सहदेवा-चन्दन-मूर्व्वा-मुस्ता-पियाल-शतावरी-काशेरु-पद्मक-मधुक-शतपुष्पा-कुष्ठानि क्षीरपिष्टः प्रदेहो घृतमण्ड-युक्तः॥ १८ ॥

सैरेयकाटरूषक-बलातिबला-जीवन्ती-सुषवीकल्को वा छागक्षीरपिष्टः॥ १९ ॥

काश्मर्य्यमधुकतर्पणकल्को वा मधुच्छिष्टमञ्जिष्ठासर्ज्जरस-सारिवाक्षीरसिद्धं पिण्डतैलमभ्यङ्गः॥ २० ॥

पञ्च यावच्च दश, तावद् भूयश्चैवापकर्षयेत् दैनन्दिनं पञ्चवा दशवा ह्रापयेदित्यर्थः। इति शब्दः समाप्त्यर्थः। अत्र सर्व्वथा नापहाय पञ्च दश वा यावदपकर्षणं पौनःपुन्येनासुखाभ्यासेरविच्छेदेनैवमासामुपयोगार्थम्। मात्राया द्वेधा परिकल्पनाच्च बलादिविशेषापेक्षविकल्पोपलक्षणमिति गम्यते, तथाच तां तामवस्थामभिसमीक्ष्यानेनानुक्रमेण पञ्चरात्रं सप्तरात्रं वा यावद्दोपशेरते तावदेवैकाद्यभिहृद्धोपयोज्यापकर्षण व्यवहारो नानुपपन्नः॥ १२ १६ ॥

जीवनीयेत्यादि। जीवनीयानि काकोल्यादीनि सहा माषपर्णी सहदेवा नागदन्ती मण्ड उपरितनोभागः शैरेयको झिण्टी सुषवी ह्रस्वकारवेल्लकः। काश्मर्य्येत्यादि। तर्पणशब्देनेह यवचूर्णमिव व्याहरन्ति कुशलाः॥

सर्व्वेषु च पुराणघृतमामलकरसविपक्वं वा पानार्थे। जीवनीयसिद्धं परिषेकार्थे काकोल्यादिक्वाथकल्कसिद्धं वा सुमनःक्वाथकल्कसिद्धं वा कारवेल्लकक्वाथमांससिद्धं वा। बलातैलं वा परिषेकावगाहनाभ्यञ्जनेषु। शालिषष्टिकयवगोधूमान्नमनवं भुञ्जीत पयसा जाङ्गलरसेन वा मुद्गयूषेण वाऽनम्लेन॥ २१॥

शोणितमोक्षणञ्चाभीक्ष्णं कुर्व्वीत। उच्छ्रितदोषे च वमनविरेचनास्थापनानुवासनकर्म्म कर्त्तव्यम्॥ २२॥

भवन्ति चात्र।

एवमाद्यैः क्रियायोगैरचिरोत्पतितं सुखम्।
वातासृक् साध्यते वैद्यैर्याप्यते तु चिरोत्थितम्॥
उपनाहपरीषेक-प्रदेहाभ्यञ्जनानि च।
शरणान्यप्रवातानि मनोज्ञानि महान्ति च॥
मृदुगण्डोपधानानि शयनानि सुखानि च।
वातरक्ते प्रशस्यन्ते मृदुसंवाहनानि च॥
व्यायामं मैथुनं कोपमुष्णाम्ललवणाशनम्।
दिवास्वप्नमभिष्यन्दि गुरु चान्नं विवर्ज्जयेत्॥ २३॥

अस्थिभग्नेन साम्द्रं तैलं पिण्डतैलम् "सिक्थे • कुम्भवती साम्द्रे × × × पिण्डः" इति शरधिः, अत्र क्षीरं चतुर्गुणं मेणापि वस्तः॥ १०—२१॥

अपतानकिनमसंस्रस्ताक्षमवक्रभ्रुवमस्तब्धमेढ्रमस्वेदनमवेपनमप्रलापिनमखट्वापातिनमबहिरायामिनञ्चोपक्रमेत् ॥ २४ ॥

तत्र प्रागेव स्नेहाभ्यक्तं स्विन्नशरीरमवपीडनेन तीक्ष्णेनोपक्रमेत शिरःशुद्ध्यर्थम्। अनन्तरञ्च विदारीगन्धादिक्वाथमांसरसक्षीरदधिपक्वं सर्पिरच्छं पाययेत्, तथा हि नातिमात्रं वायुः प्रसरति। ततो भद्रदार्व्वादिवातघ्नगणमाहृत्य सयवकोलकुलत्थमानूपौदकमांसं पञ्चवर्गमेकतः प्रक्वाथ्य तमादाय कषायमम्लक्षीरैः सहोन्मिश्र्य सर्पिस्तैलवसामज्जभिः सह विपचेन्मधुरकप्रतीवापम्। तदेतत् चै-

---

अपेत्यादि असंस्रस्ताक्षं नान्तःप्रविष्टाक्षम्, अस्तब्धमेढ्रमिति स्तब्धमेढ्रमेकान्तेनापकृष्टम्, अखट्वापातिनमशय्याशायिनमुत्थानशक्तिशालिनमिति निष्कर्षः, बहिरायामलक्षणं नि० १ अ० द्रष्टव्यम्। उपक्रमेत् "चि० ४ अ०" उक्तेन विवक्षितेन च विधिनेति शेषः विदारीत्यादि। विदारीगन्धादिः सू० ३८ अ० व्याहृतः। सर्पिरन्तानामेषां प्रत्येकशः प्रस्थं ग्राह्यम्। अच्छं निर्मलं वस्त्रपूतमित्येतत्। तत इत्यादि। भद्रदार्व्वादिः सू० ३९ अ० उपदिष्टः। पञ्चानां वर्गाणां समाहारः पञ्चवर्गम्। अत्र 'आनूपवर्गस्तु पञ्चविधः' इत्यादिस्मरणादानूपग्रहणेनैवौदकानां मत्स्यानामुपलब्धेऽप्यौदकग्रहणं विशेषेणौपयोगिकतयाऽपरैस्तुभिस्तुल्यमात्रयाऽस्य परिग्रहार्थः। अम्लानि धान्याम्लकाञ्जिकादीनि क्षीरञ्चाजं गव्यं वैलक्षीराणि। अत्राविशेषेऽप्यौपयोगिकतया वसामज्जानावानूपानामेव ग्राह्यत्याचार्याः। मधुरकोनाम सू० ४२ अ० निर्दिष्टो मधुरो वर्गः। अत्र सयवकोलकुल-

हतमपतानकिनां परिषेकावगाहाभ्यङ्गपानभोजनानुवासन-नस्येषु विदध्यात् । यथोक्तैश्च स्वेदविधानैः स्वेदयेत् । बलीयसि वाते सुखोष्णतुष-बुस-करीषपूर्णे कूपे निदध्यादा मुखात् । तप्तायां वाङ्गारचुल्ल्यां तप्तायां वा शिलायां सुरापरिषिक्तायां पलाशदलच्छन्नायां शाययेत् । कृशरावेश-वारपायसैर्वा स्वेदयेत् ॥ २५ ॥

मूलकोरुबूक-स्नुह्यर्जकार्क-शिग्रुला-शङ्खिनीस्वरसमिश्रं तैलमपतानकिनां परिषेकादिषूपयोज्यम् । अभुक्तवता पीत-मम्लं दधि-मरिच-वचायुक्तमपतानकं हन्ति तैलसर्पिर्वसाक्षौ-द्राणि च ॥ २६ ॥

एतच्चण्डवातापतानकविधानमुक्तम्; संसृष्टे संसृष्टं कर्त्तव्यम् । वेगान्तरेषु चावपीडं दद्यात् । ताम्रचूड़-कर्कट-

---

त्यानां यथालाभं भद्रदार्व्वादिद्रव्याणाञ्च चतुरः प्रस्थानानूपौदकमांसा-नाञ्च चतुरः प्रस्थानेकीकृत्याष्टगुणे जले पक्त्वा पादावशिष्टं कषायमम्ल-क्षीरयोः प्रत्येकशः चतुःप्रस्थेन सम्मिश्र्य तेन सर्पिरादीनां चतुर्णां चतुः-प्रस्थं मधुरककल्कं विपचेदित्याहुः । चिभिस्तैलादिभिर्वृतं सर्पिस्त्रैवृतं तच्चितोऽयमनन्यार्थः । यथोक्तैरिति भूतवदुपचारादुपदिश्यते चि० १२ च० चित्रवितानतिक्तान्तैरित्यर्थः । बुषं निष्फलं धान्यं कृशरा तिलकल्कः सुखोष्णमीषद् भर्ज्जितम् ॥ १४—२५ ॥

मूलकेत्यादि । मूलकमत्र बालमेवादेयम्, स्नुह्यर्जकादिस्नुक्, पर्णक-सुलसीभेदः "बाबरइ" इत्याख्यायते । एतदित्यादि । वेगान्तरेषु वेगा-

कृष्णमत्स्य-शिशुमार-वराहवसाश्चासेवेत, क्षीराणि वा वातघ्न-सिद्धानि, यव-कोल-कुलत्थ-मूलक-दधि-घृत-तैलसिद्धां वा यवागूम्। स्नेहविरेचनास्थापनानुवासनैश्चैनं दृग्ररात्राहतमेन-मुपक्रमेत्। वातव्याधिचिकित्सितञ्चावेक्षेत, रक्षाकर्म्म च कुर्य्यादिति ॥ २७ ॥

पक्षाघातोपद्रुतमम्लानगात्रं सरुजमात्मवन्तमुपकरणवन्त-ञ्चोपक्रमेत्। तत्र प्रागेव स्नेहस्वेदोपपन्नं मृदुना शोध-नेन संशोध्यानुवास्यास्थाप्य च यथाकालमाक्षेपकविधाने-नोपाचरेत्। वैशेषिकश्चात्र मास्तिष्कं शिरोवस्तिश्च शिरःशुद्ध्यर्थे अणुतैलमभ्यङ्गार्थे, शाल्वनमुपनाहार्थे, बलातैलमनुवासनार्थे। एवमतन्द्रितस्त्रींश्चतुरो वा मासान् क्रियापथमुपसेवेत ॥ २८ ॥

वर्ष्माद्युः। ताम्रचूडः कुक्कुटः, कर्कटः कुलीरः 'काकड़ा' इति प्राकृता आहुः, कृष्णमत्स्यस्तु 'वाउश' इति। वातव्याधिचिकित्सितं चि० ४ अ० यदवेक्ष्य यथायोगमुपयोक्तुमित्याकूतम्। रक्षाकर्म्म सू० ५, १८ अ० निर्दिष्टम्। पक्षेत्यादि। म्लानं मलिनं विवर्णमित्येतत्। आक्षेपकोऽत्रापतानकः। विशेष एव वैशेषिकः मस्तिष्कहितत्वान्मास्तिष्कं स्नेहपिचुधारणम्। शिरोवस्तिस्तु व्याहृतः प्रागेव। शिरःशुद्ध्यर्थे शिरसो दोषोपशान्तये इत्यर्थः "अर्थेऽव्रते च शब्दौ द्वौ तादर्थ्ये परिकीर्त्तितौ" इति कोषान्तरस्मर-णात्। एतेनातिदेशप्राप्तं शिरःशुद्ध्यर्थमवपीड़नं प्रतिषिद्धं भवति। अणु तैलं चि० ४ अ० उक्तम्। इदमत्रावधेयम्। वायुर्हि मस्तिष्कगता

अन्यासक्तेऽप्येतदेव विधानम्। विशेषतो वातश्लेष्महरै-र्नस्यै रूक्षस्वेदैश्चोपचरेत्॥ २९॥

अपतन्त्रकातुरं नापतर्पयेत्। वमनानुवासनास्थापनानि न निषेवेत। वातश्लेष्मोपरुद्धोच्छ्वासं तीक्ष्णैः प्रधमनै-र्मोक्षयेत्। तुम्बुरु-पुष्कराह्व-हिङ्ग्वम्लवेतस-पथ्या-लवणत्रयं यव-क्वाथेन पातुं प्रयच्छेत्, पथ्याशतार्द्धे सौवर्च्चलद्विपले चतु-र्गुणे पयसि सर्पिःप्रस्थं सिद्धम्। वातश्लेष्मापनुच्च कर्म्म कुर्य्यात्॥ ३०॥

अर्दितातुरं बलवन्तमुपकरणवन्तञ्च वातव्याधिविधाने-नोपचरेत्, वैशेषिकैश्च मास्तिष्क-शिरोबस्ति-नस्य-धूमोपनाह-स्नेह-नाड़ीस्वेदादिभिः। ततः सतृणं महापञ्चमूलं काको-ल्यादिं विदारिगन्धादिमौदकानूपमांसं तथैवौदककन्दांश्च संहृत्य द्विगुणोदके क्षीरद्रोणे निःक्वाथ्य पादावशिष्टमवतार्य्य

रक्तवाहिनीर्धमनीः संदूष्य ताश्च काश्चित् विपाट्य सव्यं मस्तिष्कभागं प्रपीड़यन्नपसव्यं पक्षमाहन्त्यन्यथा तु सव्यं पक्षमिति निर्णीयते शारीर-तत्त्वेन समं निदानवाक्यार्थतत्त्वमनुसन्धाय तमेवं ब्रूमः रक्तानुपयोगितया यथात्र मास्तिष्क शिरोवस्त्युपदेशेन "आक्षेपकविधानेनोपचरेत्" इत्यति देश-प्राप्तमवपीड़नमैकान्तेन प्रतिषिध्यते न तथा घृततैलाभ्यङ्गोपदेशेनातिदेशप्राप्त-मभ्यङ्गार्थं वातरक्तोपयोगि चैतत् सर्पिः। नचैतदत्रदेयं वक्ष्यमाणः परीक्षितत्वात् ॥ २६—२८ ॥

अपेत्यादि। पथ्या हरीतकी शतार्द्धं अर्द्धीकृतं पञ्चाशत्फलम्। अर्दितेत्यादि। सतृणं 'तृणपञ्चमूलसहितं महापञ्चमूलं बिल्वादिपञ्च-

परिस्राव्य तैलप्रस्थेनोन्मिश्र्य पुनरग्नावधिश्रयेत्। ततस्तैलं क्षीरानुगतमवतार्य्य शीतीभूतमभिमथ्नीयात्, तत्र यः स्नेह उत्तिष्ठेत् तमादाय मधुरौषधसङ्घात्क्षीरयुक्तं विपचेत् एतत्-क्षीरतैलमहिंतातुराणां पानाभ्यङ्गादिषुपयोज्यम् ॥ ३१ ॥

तैलक्षीरं वा क्षीरसर्पिरक्षितर्पणमिति ॥ ३२ ॥

गृध्रसी-विश्वाची-क्रोष्टुकशिरः-खञ्ज-पङ्गुल-वातकण्टक-पाददाहपादहर्षावबाहुक-बाधिर्य्य-धमनीगतवातरोगेषु यथोक्तं यथोद्देशञ्च शिराव्यधं कुर्य्यादन्यत्रावबाहुकाद्वातव्याधिचिकित्-सितञ्चावेक्षेत ॥ ३३ ॥

मूलम्, औदककन्दान् शालूकादीन्। अनन्तरं द्विगुणोदके क्षीरद्रोण इत्यनुशासनात् तृणपञ्चमूलादीनां तुलाभिनयं पाक्यं स्मरन्ति हि "द्रोणे द्रव्यतुला मता" इति। क्षीरानुगतं क्वथितोदकाभावात् क्षीरमात्रेण संसृष्टं मथ्नीयात् दधिदुग्धमन्थनन्यायेनेति शेषः। मधुरौषध-सङ्घ-क्षीर-युक्तं मधुरवर्ग-मुद्गपर्णीकल्केन क्षीरचतुर्गुणेन संमिश्रम्। तैलक्षीरमिति। तैलं विपाच्योक्तेन विधिना, पश्चात् क्षीरादुत्थितं सर्पिः पुनस्तेनैव विधिना पक्वं क्षीरसर्पिरुच्यते। अक्षितर्पणस्य विधिः 'उत्तरे १८ अ०' निवेदयिष्यते। गृध्रसीत्यादि। धमनीगतेति धमनीशब्देनेह शिराप्युपदिश्यत इत्यवगन्तव्यम् अन्यथा शिरासंश्रयिणो वातरोगविशेषस्येह परिहानमसमञ्जसं स्यात्। सम्प्रति स्वमते शिरागतत्वेन मतान्तरे च "बाहुशोषावबाहुकयो रप्येके वदन्त्यंसयोरन्तरे" इत्युक्तेनावबाहुके प्राप्तं शिराव्यधं निषेधति अन्यत्रेति ॥ ३०—३३ ॥

कर्णशूले तु शृङ्गवेररसं तैलमधुसंसृष्टं सैन्धवोपहितं सुखोष्णं कर्णे दद्यात्, बस्तमूत्रं, मधुतैलानि वा, मातुलुङ्ग-दाड़िम-तिन्तिड़ीकस्वरस-मूत्रसिद्धं तैलं शुक्त-सुरा-तक्रमूत्रलवणसिद्धं वा। नाड़ीस्वेदैश्च स्वेदयेत्। वातव्याधि-चिकित्साञ्चावेक्षेत। भूयश्चोत्तरे वक्ष्यामः ॥ ३४ ॥

तूणीप्रतितूण्योः स्नेहलवणमुष्णोदकेन पाययेत्, पिप्पल्यादि-चूर्णं वा, हिङ्गु-यवक्षार-प्रगाढ़ं वा सर्पिः। वस्तिभिश्चैन-मुपक्रमेत् ॥ ३५ ॥

आध्माने त्वपतर्पण-पाणिताप-दीपनचूर्ण-फलवर्त्तिक्रिया-पाचनीयवस्तिभिरुपचरेत्। लङ्घनानन्तरञ्चान्नकाले धान्यक-जीरकादिदीपनसिद्धान्यन्नानि ॥ ३६ ॥

प्रत्याध्माने छर्द्दनापतर्पणदीपनानि कुर्य्यात् ॥ ३७ ॥

अष्ठीला-प्रत्यष्ठीलयोर्गुल्माभ्यन्तरविद्रधिवत् क्रियाविभाग इति ॥ ३८ ॥

कर्णेत्यादि। सैन्धवोपहितं मनाक् सैन्धवेन संयुक्तं, नाड़ीस्वेदो ऽत्रैकतः प्रदीप्तेन पट्टकाष्ठेनान्येन वा बुद्धिपरिकल्पितेन देयः। उत्तरे-एकविंशत्यध्याये इति शेषः। तूणीत्यादि। स्नेहलवणं चि० ४ अ० उक्तं काण्डलवण०नाम। हिङ्गुयवक्षारप्रगाढ़ं प्रचुरहिङ्गुयवक्षारम्, "प्रगाढ़ं भृशकृच्छ्रयोः" इत्यमरः। आध्मान इत्यादि। उदरचिकित्सिते वक्ष्यमाणा मदनफलादिकृता वर्त्तिः फलवर्त्तिस्तस्याः प्रणिधानं फलवर्त्तिक्रिया।

हिङ्गु-त्रिकटु-वचा-अजमोदा-धान्याजगन्धा दाड़िम-तिन्तिड़ीक-पाठा-चित्रक-यवक्षार-सैन्धव-विड़-सौवर्चल-स्वर्जिका-पिप्पली-मूलाम्लवेतस-शटी-पुष्करमुल-हवुषा-चव्याजाजी-पथ्याश्चूर्णयित्वा मातुलुङ्गाम्लेन बहुशः परिभाव्याक्षमात्रां गुटिकां कारयेत् , ततः प्रातरेकैकां वातविकारी भक्षयेत् । अयमेष योगः कास-श्वास-गुल्मोदरारोचक-हृद्रोगाध्मान-पार्श्वोदरवस्ति-शूलानाह-मूत्रकृच्छ्र-प्लीहार्शांस्तूणीप्रतितूणीरपहन्ति ॥ ३९ ॥

भवन्ति चात्र ।

केवलो दोषयुक्तो वा धातुभिर्वावृतोऽनिलः ।
विज्ञेयो लक्षणैश्चाभ्यां चिकित्सा वाविरोधतः ॥ ४१ ॥
रुजावन्तं घनं शीतं शोफं मेदोयुतोऽनिलः ।
करोति यस्य तं वैद्यः शोथवत् समुपाचरेत् ॥ ४२ ॥
कफमेदोवृतो वायुर्यदोरू प्रतिपद्यते ।
तदाङ्गमर्दशैथिल्य-रोमहर्षरुजाज्वरैः ॥

व्यवहारस्तु "मदनं पिप्पली कुष्ठं वचा गौराश्च सर्षपाः । गुड़क्षारसमायुक्ता फलवर्त्तिः" इत्युक्तलक्षणाया एव वर्त्तेरित्यध्यवसेयम् । हिङ्ग्वित्यादि । अजमोदा यमानी, अजगन्धा वनयमानी, हवुषा नामौषधिः काष्ठविशेषः "चाउच" इति विख्यायते ॥ ३४— ३९ ॥

अनुक्तार्थसंग्रहणायाह, केवल इति । केवलो निरनुबन्धः, लक्षणानि तत्तद्दोषलिङ्गानि, तस्य शास्त्राविरोधेन तर्कश्च संशयनिराकरणम् ।

निद्रया चाहितौ स्तब्धौ शीतलावप्रचेतनौ ।
गुरुकावस्थिरावूरू न स्वाविव च मन्यते ॥
तमूरुस्तम्भमित्याहुराढ्यवातमथापरे ।
स्नेहवर्ज्जं पिबेत् तत्र चूर्णं षड्धरणं नरः ॥
हितमुष्णाम्बुना तद्वत् पिप्पल्यादिगणैः कृतम् ।
लिह्याद्वा त्रैफलं चूर्णं क्षौद्रेण कटुकान्वितम् ॥
मूत्रैर्वा गुग्गुलुं श्रेष्ठं पिबेद्वापि शिलाजतु ।
ततो हन्ति कफाक्रान्तं समेदस्कं प्रभञ्जनम् ।
हृद्रोगमरुचिं गुल्मं तथाभ्यन्तरविद्रधिम् ॥
सक्षारमूत्रस्वेदांश्च रूक्षाण्युत्सादनानि च ।
कुर्य्याद्दिह्याच्च मूत्राढ्यैः करञ्जफलसर्षपैः ॥
भोज्याः पुराणश्यामाक-कोद्रवोद्दालशालयः ।
शुष्कमूलकयूषेण पटोलस्य रसेन वा ।
जाङ्गलैरघृतैर्मांसैः शाकैश्चालवणैर्हितैः ॥

ताभ्यां लक्षणोहाभ्याम् । तुशब्दस्यानाधिष्ठानोऽयं वा शब्दः । अविरोधतः अनुबन्धाविरोधेन । नह्येतावता विनिश्चासितव्यमर्थं तत्त्वतः सर्व्वंभिषजो विज्ञास्यन्ति इति मन्वानो भगवान् निदर्शनत्वेन किञ्चिदुपदिदिक्षति रुजावन्तमित्यादिना समग्रेण ग्रन्थेन। निद्रया चाहितौ ईषत् स्पर्शानभिज्ञौ स्तब्धौ जडीभूतौ अप्रचेतनौ सर्व्वथा सुप्तौ नैव स्वाविव च मन्यत इत्याकुञ्चनाद्यवस्थामंर्थ्यादिरेति नेयम् । स्नेहवर्ज्जमिति क्रियाविशेषणं पानाभ्यङ्गादौ

यदा जातां परिक्षीणे भूयिष्ठे कफमेदसी ।
तदा स्नेहादिकं कर्म्म पुनरत्रावचारयेत् ॥ ४३ ॥
सुगन्धिः सुलघुः सूक्ष्मस्तीक्ष्णोष्णः कटुको रसे ।
कटुपाकः सरो हृद्यो गुग्गुलुः स्निग्धपिच्छिलः ॥
स नवो बृंहणो वृष्यः पुराणस्त्वपकर्षणः ।
तैक्ष्ण्यौष्ण्यात् कफवातघ्नः सरत्वान्मलपित्तनुत् ॥
सौगन्ध्यात् पूतिकोष्ठघ्नः सौक्ष्म्याच्चानलदीपनः ॥
तं प्रातस्त्रिफला-दार्व्वी-पटोल-कुशवारिभिः ।
पिवेदावाप्य वा मूत्रैः क्षारैरुष्णोदकेन वा ॥
जीर्णे यूषरसक्षीरैर्भुञ्जानो हन्ति मासतः ।
गुल्मं मेहमुदावर्त्तमुदरं सभगन्दरम् ॥
क्रिमि-कण्डूरुचि-श्वित्राण्यर्व्वुद-ग्रन्थिमेव च ।
नाड्याढ्यवात-श्वयथु-कुष्ठ-दुष्टव्रणांश्च सः ।
कोष्ठ-सन्ध्यस्थिगं वायुं वृक्षमिन्द्राशनिर्यथा ॥ ४४ ॥

स्नेहं वर्ज्जयित्वेति तात्पर्य्यम् कटुका कटुरोहिणी । सुगन्धिरित्यादि । कोष्ठस्य पक्वाशयादेः गुह्यमध्यप्रदेशस्य च पूतिर्दुर्गन्धः पूतिकोष्ठः । अर्व्वुदसहितो ग्रन्थि-रर्व्वुदग्रन्थिः । परिशिष्टमतिरोहितार्थम् । अत्र "वातोल्वणास्त्रयो दोषा रक्तेन सह मूर्च्छिताः । नतोन्नतं वक्रयन्ति पृष्ठवंशमनेकधा । नेष्टे सवेदनो जन्तुर्गन्तुं वा नमितुं सुखम् । उपेक्षितास्तु कुर्व्वन्ति व्रणं शोथपुरःसरम् । व्याधिर्वंशाऽभिघातोऽसौ बाले यूनि च दृश्यते । वातव्याधिहरं कर्म्म सर्व्वथैवोपयोजयेत् । सञ्जाते हि व्रणे यस्मात् कर्म्मणः सिद्धिरध्रुवा । प्रयतेत ततः सम्यक् न

इति सुश्रुतसंहितायां चिकित्सितस्थाने
महावातव्याधिचिकित्सितं नाम
पञ्चमोऽध्यायः ॥ ५ ॥

आयत व्रणो यथा" इति तन्त्रान्तरीया वंशाऽभिघातादयोऽप्युपदिष्टा भवन्ति विज्ञेयो लक्षणोहाभ्यामित्युक्तेः ॥ ४०—४४ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
चिकित्सितस्थाने महावातव्याधिचिकित्सितं नाम पञ्चमोऽध्यायः

षष्ठोऽध्यायः ।

अथातोऽर्शसां चिकित्सितं व्याख्यास्यामः ॥ १ ॥

चतुर्व्विधोऽर्शसां साधनोपायः । तद्यथा—भेषजं क्षारोऽग्निः शस्त्रमिति । तत्राचिरकालजातान्यल्पदोषलिङ्गोपद्रवाणि भेषजसाध्यानि । मृदुप्रसृतावगाढान्युच्छ्रितानि क्षारेण । कर्कशस्थिरपृथुकठिनान्यग्निना । तनुमूलान्युच्छ्रितानि क्लेदवन्ति च शस्त्रेण । तत्र भेषजसाध्यानामर्शसामदृश्यानाञ्च भेषजं भवति ; क्षाराग्निशस्त्रसाध्यानान्तु विधानमुच्यमानमुपधारय ॥ २ ॥

सम्प्रत्युद्देशक्रमागतमर्शसां चिकित्सितमधिकरोति अथात इत्यादिना ॥ १ ॥

चतुरित्यादि । भेषजानीह वक्ष्यमाणलेपादीनीति प्रत्येतव्यमग्निक्षारयोः पृथगुपदेशात् । प्रसृतानि विस्तृतानि, अवगाढानि गम्भीराणि, उपर्य्यणून्यन्तस्तु महान्तीति यावत् । क्षारेण "सू० ११ अ०" उपदिष्टेन साध्यानीति शेषः । स्थिराण्यन्तःकठिनानि, कठिनानि तु बाह्यतः कठोराणि सर्व्वतश्च । अत्र मृद्वादिशब्दा यथासम्भवं पित्तरक्तादिनिमित्तान्यर्शांस्युपलक्षयन्तीति परस्ताद्व्यक्तीभविष्यति । बाढमस्त्वेव चतुर्व्विधः साधनोपायः, अथादृश्येष्वर्शःसु का गतिरित्याह तत्रेति । तत्र, चतुर्विधोपायमध्ये भेषजं भवति सामान्येन साधनोपाय इति सन्दर्भः । तत्र सिद्धं

तत्र बलवन्तमातुरमर्शोभिरुपद्रुतमुपस्निग्धं परिस्विन्न-मनिलवेदनाभिवृद्धिप्रशमार्थं स्निग्धमुष्णमल्पमन्नं द्रवप्रायं भुक्तवन्तमुपवेश्य सम्भृते शुचौ देशे साधारणे, व्यभ्रे काले समे फलके शय्यायां वा प्रत्यादित्यगुदमन्यस्योत्सङ्गे निषण्णपूर्व्वकायमुत्तानं किञ्चिदुन्नतकटिकं वस्त्रकम्बलकोप-विष्टं यन्त्रशाटकेन परिक्षिप्तग्रीवासक्थं परिकर्म्मिभिः सुप-रिगृहीतमस्पन्दनशरीरं कृत्वा घृताभ्यक्तं यन्त्रमृजुगुदमुखे पायौ शनैः शनैः प्रवाहमाणस्य प्रणिधाय प्रविष्टे चार्शो वीक्ष्य शलाकयोत्पीड्य पिचुवस्त्रयोरन्यतरेण प्रमृज्य क्षारं पातयेत् । पातयित्वा च पाणिना यन्त्रद्वारं पिधाय वाक्-शतमात्रमुपेक्षेत । ततः प्रमृज्य क्षारबलं व्याधिबलञ्चा-वेक्ष्य पुनरालेपयेत् । अथार्शः पक्वजाम्बवप्रतीकाशमवसन्नमी-षन्नतञ्चाभिसमीक्ष्योपावर्त्तयेत् । क्षारं प्रक्षालयेद्धान्याम्लेन

हि शस्त्राग्निप्रधानं शस्त्रे चाग्नौ क्षारादीन्युपदिश्यन्ते तदिह क्रमं हित्वा प्रथममेतावत् क्षारादिसाध्यान्येवाधिकृत्य ब्रूम इति कृत्वाह क्षारेति । सुकारेण भेषजविधानं निबध्नाति ॥ २ ॥

तत्रेत्यादि । साधारणे नातिशीतोष्णे अन्यस्योत्सङ्गे स्वकोपाधाने वेत्युपदेशः । उत्सङ्गः क्रोडः । आकृष्टनिबद्धं, ग्रीवासक्थि यस्येति परिक्षिप्तग्रीवासक्थस्तम् । क्षारबलं व्याधिबलञ्चावेक्ष्येत्येतावता क्षारेणैता-वानंशो दग्धो भवति नैतावतैतावानित्येवं विमृश्येत्यर्थः । उपावर्त्तयेत्

दधिमस्तुशुक्तफलाम्लैर्वा। ततो यष्टीमधुकमिश्रेण सर्पिषा निर्व्वाप्य यन्त्रमपनीयोत्थाप्यातुरमुष्णोदकोपचिष्ट शीताभिरद्भिः परिषिञ्चेदशीताभिरित्येके। ततो निर्व्वातमागारं प्रवेश्याचारिकमादिशेत्, सावशेषं पुनर्दहेत्। एवं सप्तरात्रात् सप्तरात्रादेकैकमुपक्रमेत। तत्र बहुषु पूर्व्वं दक्षिणं साधयेत्, दक्षिणाद्वामं, वामात् पृष्ठजं, ततोऽग्रजमिति ॥ ३ ॥

तत्र वातश्लेष्मनिमित्तान्यग्निक्षाराभ्यां साधयेत्। क्षारेणैव मृदुना पित्तरक्तनिमित्तानि। तत्र वातानुलोम्यमन्न-

---

क्षारक्रियां निवर्त्तयेत्। उपावर्त्तनक्रममाह क्षारमिति। अत्र "पातयित्वा च" इत्यादिनैकस्मिन् दिवसे द्विस्त्रिर्वा क्षारोपयोगे विहितेऽप्यत्याभिष्यापत्तिभयादभिसमीक्ष्यैव तिस्रस्तस्रः पञ्चधावारात्रीः क्षारः प्रयुज्यते। युगपत् सर्व्वत्रोपयुक्तोऽपि क्षारो महान्तं व्रणमुत्पाद्यासहिष्णुमातुरमाशेव वियोजयति सुखसम्पर्केण तदिदानीं क्रमशः क्षारमुपयोक्तुमुपदिदिक्षति एवमित्यादिना। सप्तरात्रमतीत्येति सप्तरात्रात्। जातव्रणसंरोहात् परमित्येव हृदयम्। माभूत् सद्यःसंरूढो व्रणः क्षारात्तव्रणसंसर्गेण भूयोऽपि विकारीत्येकान्तरं द्व्यन्तरं वा क्षारं पातयितुमिदमुच्यते तत्रेति। एवञ्च दक्षिणादिक्रममिममकिञ्चित्करं सम्प्रधार्य्य यथाच रूढोव्रणोऽवसरं प्राप्य न पुनर्व्विकुरुते तथैव यतितव्यमिति सुधियः शृणुध्वम् ॥ २ ॥

तत्रेत्यसौ मृदुपक्वतैलादिना क्षारादिसाध्यार्शो निर्णायकेन ग्रन्थेन यथावत् सर्व्वाण्यर्शांसि परिपक्वीतुं शक्यन्ते नापि च दग्धे, रूढस्तीक्ष्णो मध्यमो वा क्षारः क्षारसाध्येषु मृद्वादिगुणवत्स्वर्शःस्वनत्ययमुपयोगमिति

रुचिरग्निदीप्तिर्लाघवं बलवर्णोत्पत्तिर्मनस्तुष्टिरिति सम्यग्दग्धलिङ्गानि । अतिदग्धे तु गुदावदरणं दाहो मूर्च्छा ज्वरः पिपासा शोणितातिप्रवृत्तिस्तन्निमित्ताश्चोपद्रवा भवन्ति । श्यामाल्पव्रणता कण्डूरनिलवैगुण्यमिन्द्रियाणामप्रसादो विकारश्चाशान्तिर्हीनदग्धे ॥ ४ ॥

अशांसि च प्राणवतश्छित्त्वा दहेत् । निर्गतानि चात्यर्थं दोषपूर्णानि यन्त्रादिना स्वेदाभ्यङ्गस्नेहावगाहोपनाहविस्रावणालेपक्षाराग्निशस्त्रैरुपाचरेत् । प्रवृत्तरक्तानि च रक्तपित्तविधानेन, भिन्नपुरीषाणि चातीसारविधानेन, बद्धवर्चांसि

नितरां पित्तरक्तप्रकोपित्वात्, निवेदयिष्यति च "क्षाराग्नी नाति वर्त्तन्ते तथा दृश्या गुदाङ्कुराः" इत्यतः प्राधान्यात् तेष्वर्शःसु मध्ये अग्निक्षार साध्यान्येव स्फुटीकर्त्तुमभीप्सन्नि तत्रेत्यादिना । इदमत्रावधेयम् वातनिमित्तानि कार्कश्यादिगुणयोगाद् अग्निना श्लेष्मनिमित्तानि च तद्योगात् क्षारेणाचिरं सम्यग् भवन्ति सुभिषग्भिश्चोपक्रान्तानि विपर्य्यये पुनः सुचिरमन्यथं चेति मन्वानो भगवानाहवानेति । एवं प्राप्ते अग्निक्षाराभ्यां साधयेत् यथाक्रमं "सू० १२ अ०" उक्तेनेहोक्तेन च विधिनेति शेषः । पित्तरक्तनिमित्तानि मृद्वादीनीत्यर्थः । यदाह "पित्तोत्तरा नीलमुखा स्तनवो मृदवः श्लथा" इत्यादि । एवञ्च मृदुप्रसृतेत्यादौ मृद्वादि शब्दानां प्राशुक्तानामुपलक्षणत्वं सम्यग् व्यक्तं भवति । अतिदग्ध शोणितातिप्रवृत्तिस्तु दाहोपरमपगतदग्धांशत्वेन शिरायाश्छिन्नातिदेशयोग्यायामवस्थायामेव भवतीति प्रत्येतव्यम् "सद्यश्छिन्नासु शिरासु रक्तातिप्रवृत्तिः" इति सू० २२ अ० उक्तस्मरणात् अन्यथा "तथा सम्भावयेद्ब्रह्म दाहः सङ्कोचयेत्

स्वेदपानविधानेनोदावर्त्तविधानेन वा। एष निर्व्वस्थानगतानामर्शसां दहनकल्पः ॥ ५ ॥

आसाद्य च दर्व्वीकूर्च्चशलाकानामन्यतमेन क्षारं पातयेत्। भ्रष्टगुदस्य तु विना यन्त्रेण क्षारादिकर्म्म प्रयुञ्जीत। सर्व्वेषु च शालिषष्टिकयवगोधूमान्नं सर्पिःस्निग्धमुपसेवेत पयसा निम्बयूषेण पटोलयूषेण वा यथादोषंशकैर्वास्तुक-तण्डुलीयक-जीवन्त्युपोदिकाश्ववला-बालमूलक-पालङ्कासन-चिल्ली-चुच्चु-कलायशाकैरन्यैर्वा, यच्चान्यदपि स्निग्धमग्निदीपनमर्शोघ्नं सृष्टमूत्रपुरीषञ्च तदुपसेवेत ॥ ६ ॥

सिराम्" इति सू० १४ अ० उक्ताग्निक्षारयोरक्तनिवारणत्वेनोपदेशः परिकरबन्धेन विरुध्येत। अस्याविशेषे पुनर्व्विशिनष्टि महान्तीति। दहेदग्निना क्षारेण वेत्याकूतम्। निर्गतानि न्वेति चकारो विशेषणार्थः। दोषपूर्णानि अतएव निर्गतानि तु यन्त्राद्विना यन्त्रं हित्वा स्वेदादिभिरुपाचरेत् यथायोगमित्यभिसन्धिः। अमुमेवविधिमितरत्राप्यतिदिशति एष इति। सर्व्वशब्देनेह मेढ्रादीनां परिग्रहः क्रियते अग्निक्षारदाहे शास्त्रोयोविधिर्दहनकल्पः। "कल्पः शास्त्रविधौन्याये" इति रुद्रः। सम्प्रति कर्म्मणा मेषामसुकरत्वादुक्तमर्थं पुनर्विशदयति आसाद्येत्यादिना। आसाद्य क्षारं सन्निधापयेदित्यर्थः। अन्यतमेन तत्र तत्रोपयोगिनेति तात्पर्य्यम्। कूर्चसाम्यात् कूर्चमत्र तूलशीर्षशलाकेतिनेयम्। एतेनेहोक्तः "सू० ११ अ०" शलाकामात्रेणोक्तक्षारपातनविधिश्च धिशदीकृतावित्यध्यवसेयम्। चुञ्चुः पालङ्कः पालङ्की, चिल्ली चेलवास्तुकं, वर्त्तुलकलायश्चलता कलाय बल्ली ॥ ४—६ ॥

दग्धेषु चार्शःस्वभ्यक्तोऽनलसन्धुक्षणार्थमनिलप्रकोपसंरक्षणार्थञ्च स्नेहादीनां सामान्यतो विशेषतस्तु क्रियापथमुपसेवेत। सर्पींषि च दीपनीयवातहरसिद्धानि हिङ्ग्वादिभिश्चूर्णैः प्रतिसंसृज्य पिबेत्। पित्तार्शःसु पृथक्पर्ण्यादीनां कषायेण दीपनीयप्रतीवापं, भद्रदार्व्वादि पिप्पल्यादिसर्पिश्च। शोणितार्शःसु मञ्जिष्ठासुरङ्ग्यादीनां कषाये, श्लेष्मार्शःसु च सुरसादीनां कषाये सर्पिः। उपद्रवांश्च यथास्वमुपाचरेत्॥ ७॥

परञ्च यत्नमास्थाय गुदे क्षाराग्निशस्त्राण्यवचारयेत्। तद्विभ्रमाद्धि षाण्ड्य-शोफ-दाह-मद-मूर्च्छाटोपानाहातीसारप्रवाहणानि भवन्ति मरणं वा॥ ८॥

अत ऊर्द्धं यन्त्रप्रमाणमुपदेक्ष्यामः॥ ९॥

दग्धेष्वित्यादि। सामान्यतो दोषविशेषाविमर्शेन, विशेषतो यथादोषं क्रियापथमुपयोगक्रमम्। हिङ्ग्वादिभिः चि० ५ अ० उक्तैः। प्रतिसंसृज्य दोषवशप्रातिकूल्येन संयोज्य। पृथक्पर्ण्यादीनि "सू० ३६ अ०" उक्तान्यौषधानि तेषां कषायेण प्रतिसंसृज्य दीपनीयेत्यादिनोक्तं सर्पिः पिबेदिति सम्बन्धः। "सू०३८अ०" उक्तानां पिप्पल्यादीनां कल्कोऽनेति दीपनीयप्रतीवापं भद्रेत्यादिनोक्तानां कल्ककषायेण सिद्धं सर्पिर्भद्रदार्व्वादि, एवमेव पिप्पल्यादि सर्पिश्च। शोणितेत्यादि। सुरङ्गी रक्तशोभाञ्जनस्तस्य पुष्पमिवादेयमौपयोगिकत्वादादिग्रहणेन रक्तकोविदारपुष्पादीनां रक्तहराणामादेयः। कषाये सिद्धमित्यध्याहार्य्यं सर्पिरिति परेणान्वयः। सुरसादिः सू० ३८अ०" द्रष्टव्यः। परञ्चेत्यादि। अवचारयेदित्युक्तेन "सू० १२। ५। ८। १९। २५" अध्यायोक्तेन विधिनेति शेषः। असितस्तावदशाविस्त्रावितत्वेनाभ्युपगतं

तत्र यन्त्रं लौहं दान्तं शार्ङ्गं वार्क्षं वा गोस्तनाकारं चतुरङ्गुलायतं पञ्चाङ्गुलपरिणाहं पुंसां, षडङ्गुलपरिणाहं नारीणां तलायतम्। तद्विच्छिद्रं—दर्शनार्थमेकं छिद्रम्, एकं छिद्रन्तु कर्म्मणि। एकद्वारे हि शस्त्रक्षाराग्नीनामतिक्रमो न भवति। छिद्रप्रमाणन्तु त्र्यङ्गुलायतमङ्गुष्ठोदरपरिणाहम्। यदङ्गुलमवशिष्टं तस्यार्द्धाङ्गुलमधस्तादर्द्धाङ्गुलोच्छ्रितोपरिवृत्तकर्णिकम्। एष यन्त्राकृतिसमासः॥ १०॥

अत ऊर्द्ध्वमर्शसामालेपान् वक्ष्यामः। स्नुहीक्षीरयुक्तं हरिद्राचूर्णमालेपः प्रथमः। कुक्कुटपुरीष-गुञ्जा-हरिद्रा-पिप्पली-चूर्णमिति गोमूत्रपित्तपिष्टो द्वितीयः। दन्ती-चित्रक-सुवर्चि-

---

क्षारादिविधानमिदानीन्तु तदङ्गभूतं यन्त्रमेव प्रमाणतो व्याख्येयमित्यभिसन्धाय प्रतिजानीते अत इत्यादिना। तलायतमायामतः पाणितलसम्मितम् कर्म्मण्युपयुज्यत इति शेषः। अत्र हेतुरेकेति। अतिक्रमो नामाहितान् प्रत्यभीतस्य रणे यानं तत्साम्यादतिक्रमोऽत्र वेगेन प्रसरणं, न भवति यन्त्रेणात्यर्थं मांसादीनां प्रपीड़नेन मार्गावरोधादिति भावः। एतस्य किञ्चित्कारमिवावभात्येकद्वारेणापि यन्त्रेण शस्त्रदेः चिकीर्षितार्थोपपत्तेः। अर्द्धाङ्गुलोच्छ्रितोपरिवृत्तकर्णिकमिति। कर्णिका, पद्मबीजकोषसाम्यात् तादृश प्रान्तप्रदेशोऽत्र कर्णिकोच्यते। तदयमर्थः अर्द्धाङ्गुलावच्छेदेनोच्छ्रिता भागान्तरापेक्षया प्रवृद्धपरिणाहा उपरि वृत्ता सञ्जाता कर्णिका यत्र तत् तथोक्तम्। "उच्छ्रितं त्रिषु सञ्जाते समुन्नत प्रवृद्धयोः" इति मेदिनी। परिणाहप्रवृद्धिश्चातिप्रवेशप्रतिकूलतयोपयुज्यते॥ ७—१०॥

सम्प्रति क्षारादिभयविक्लवानामनुग्रहार्थं तदतिदिष्टानालेपान् आभि-

का-लाङ्गलीकल्को वा गोपित्तपिष्टस्तृतीयः। पिप्पली-सैन्धव-कुष्ठ-शिरीषफलकल्कः स्नुहीक्षीरपिष्टोऽर्कक्षीरपिष्टो वा चतुर्थः। कासीस-हरिताल-सैन्धवाश्वमारक-विड़ङ्ग-पूतीक-कृतवेधन-जम्ब्वर्कोत्तमारणीदन्ती-चित्रकालर्क-स्नुहीपयःसु तैलं विपक्वमभ्यञ्जनेनार्शः शातयति॥ ११॥

अत ऊर्द्धं भेषजसाध्येष्वदृश्येष्वर्शःसु योगान् यापनार्थं वक्ष्यामः। प्रातः प्रातर्गुड़हरीतकीमासेवेत। ब्रह्मचारी गोमूत्रद्रोणसिद्धं वा हरीतकीशतं प्रातः प्रातर्यथाबलमुपयुञ्जीत क्षौद्रेण। अपामार्गमूलं वा तण्डुलोदकेन सक्षौद्रमहरहः। शतावरीमूलकल्कं वा क्षीरेण। चित्रकचूर्णयुक्तां वा सीधुपराद्धाम्। भल्लातचूर्णयुक्तं वा शक्तुमन्थमलवणं तक्रेण। कलशे वान्तश्चित्रकमूलकल्कावलिप्ते निषिक्तां तक्रमम्लमनम्लं वा पानभोजनेषूपयुञ्जीत। एष एव भार्गीस्फोता-यमान्यामलक-गुड़ूचीषु तक्रकल्पः॥ १२॥

क्षीयते अत इत्यादिना। सुवर्चिका सर्ज्जिकाक्षारः अर्कोऽर्कक्षीरम् उत्तमारणी भूम्यामलकी, अलर्कः श्वेतार्कः, पयःस्विति सम्बन्धः। सम्प्रति पारिशेष्याद्भेषजविधानमधिकरोति अत इत्यादिना। अत्र "भेषजसाध्यानामर्शसामदृश्यानाञ्च भेषजं भवति" इति स्थितेऽप्यदृश्येष्वेव भेषजस्य नियमेनौपयौगिकत्वं व्याजेनोपदिशन् भेषजमदृश्येष्वित्यभिलप्यतइत्यनुसन्धेयम्। अर्कांशौ द्वौ योगौ गाढ़विट्केषूपयोज्यौ। सीधुपराद्धां बलवर्णकरत्वेनार्शोहरत्वेन च सौधुश्रेष्ठं पक्वरसं नाम सीधुमिति निष्कर्षः। पराद्धैर-

पिप्पली-पिप्पलीमूल-चव्य-चित्रक-विडङ्ग-शुण्ठी-हरीतकीषु च पूर्व्ववदेव निरन्नो वा तक्रमहरहर्मासमुपसेवेत। शृङ्गवेर-पुनर्नवा-चित्रककषायसिद्धं वा पयः। कुटजमूलत्वक्फाणितं वा पिप्पल्यादिप्रतीवापं क्षौद्रेण। वातव्याध्युक्तं हिङ्ग्वादि-चूर्णमुपसेवेत तक्राहारः क्षीराहारो वा। क्षारलवणांश्चित्रक-मूलक्षारोदकसिद्धान् वा कुल्माषान् भक्षयेत्। चित्रक-मूलक्षारोदसिद्धं वा पयः। पलाशतरुक्षारसिद्धान् वा कुल्मा-षान्। पाटलापामार्ग-बृहती-पलाशक्षारं वा परिस्रुतमहरह र्घृतसंसृष्टम्। कुटज-वन्दाकमूलकल्कं वा तक्रेण। चित्र-क-पूतीक-नागरकल्कं वा पूतीकक्षारेण। क्षारोदकसिद्धं वा सर्पिः पिप्पल्यादिप्रतीवापम्। कृष्णतिलप्रसृतं प्रकुञ्चं वा प्रातः प्रातरनुसेवेत शीतोदकानुपानम्। एभिरभिवर्द्धते-ऽग्निरर्शांसि चोपशाम्यन्ति ॥ १३ ॥

वर्णास्तरणा इति रघुः। चित्रकेत्यादिनोक्तौ तु द्वौ योगौ वातश्लेष्मनिमित्ते-ष्वेवोपयोज्यौ। आस्फोता नामौषधिः 'आफोरमाली' इति विख्यायते। यवक्षारलवणाभ्यां संसृष्टान् क्षारलवणान् 'लवणाल्लुक्' पां॰ ४।४। २४। ठक्लोलुक्। कुल्माषान् अर्द्धस्विन्नान् गोधूमादीन्। क्षारोदकविधौ "स्नावयेत् षड्गुणे तोये किंचिदाहुश्चतुर्गुणे" इति स्मर्त्तव्यम्। क्षारसिद्धान् क्षारोदकसिद्धान्। वन्दाका "परगाछा" इत्याख्यायते। 'प्रसृतं पञ्चकं प्रकुञ्चं पलम्, एतत्तु रक्तार्शःस्वेवोपयोज्यम् ॥ ११ – १२ ॥

द्विपञ्चमूली-दन्ती-चित्रक-पथ्यानां तुलामाहृत्य जलचतुर्द्रोणे विपाचयेत्। ततः पादावशिष्टं कषायमादाय सुशीतं गुड़तुलया सहोन्मिश्र्य घृतभाजने निक्षिप्य मासमुपेक्षेत यवपल्ले। ततः प्रातः प्रातर्मात्रां पाययेत्। तेनार्शो-ग्रहणीदोष-पाण्डुरोगोदावर्त्तारोचका न भवन्ति। दीप्तोऽग्निश्च भवति। पिप्पली-मरिच-विड़ङ्गैलवालुक-लोध्राणां द्वे द्वे पले, इन्द्रवारुण्याः पञ्च पलानि, कपित्थमध्यस्य दश, पथ्याफलानामर्द्धप्रस्थः, प्रस्थो धात्रीफलानामेतदैकध्यं जलचतुर्द्रोणे विपाच्य पादावशेषं परिस्राव्य सुशीतं गुड़तुलाद्वयेनोन्मिश्र्य घृतभाजने निक्षिप्य पक्षमुपेक्षेत यवपल्ले। ततः प्रातः प्रातर्यथाबलमुपयुञ्जीत। एष खल्वरिष्टः प्लीहाग्निसङ्गार्शोग्रहणी-हृत्पाण्डुरोग-शोफ-कुष्ठ-गुल्मोदर-क्रिमिघ्नो बलवर्णकरश्चेति ॥ १४ ॥

तत्र वातप्रायेषु स्नेह-स्वेद-वमन-विरेचनास्थापनानुवासनमप्रतिषिद्धम्। पित्तजेषु विरेचनम्। एवं रक्तजेषु संशमनम्। कफजेषु शृङ्गवेरकुलत्थोपयोगः। सर्व्वदोषहरं यथोक्तं सर्व्वजेषु, यथास्वौषधसिद्धं वा पयः सर्व्वेष्विति ॥ १५ ॥

द्विपञ्चेत्यादि। यवपल्लः स्थूलः कुशूलको यवपल्लः इत्यदाकारं यवपूर्णं [illegible]मिति यावत्। एलवालुकं नाम स्वनामप्रसिद्धो गन्धद्रव्यभेदः ॥ १४—१५ ॥

अत ऊर्द्धं भल्लातकविधानमुपदेक्ष्यामः। भल्लातकानि परिपक्वान्यनुपहतान्याहृत्यैकमादाय द्विधा त्रिधा चतुर्द्धा वा च्छेदयित्वा कषायकल्पेन विपाच्य कषायस्य शुक्तिमनुष्णां घृताभ्यक्ततालुजिह्वौष्ठः प्रातः प्रातरुपसेवेत ततोऽपराह्णे क्षीरं सर्पिरोदनइत्याहारः। एवमेकैकं वर्द्धयेत्तावद्यावत् पञ्चेति, ततः पञ्च पञ्चाभिवर्द्धयेद्यावत् सप्ततिरिति प्राप्य च सप्ततिमपकर्षयेद्भूयः पञ्च पञ्च यावत् पञ्चेति, पञ्चभ्यश्चैकैकं यावदेकमिति। एवं भल्लातकसहस्रमुपयुज्य सर्व्वकुष्ठार्शोभिर्व्विमुक्तो बलवानरोगः शतायुर्भवति॥ १६॥

द्विव्रणीयोक्तेन विधानेन भल्लातकनिस्रुततैलं स्नेहमादाय प्रातः प्रातः शुक्तिमात्रमुपयुञ्जीत जीर्णे पूर्व्ववदाहारः फलप्रकर्षश्च। भल्लातकमज्जभ्यो वा स्नेहमादायापकृष्टदोषः प्रतिसंसृष्टभक्तो निवातमागारं प्रविश्य यथाबलं प्रसृतिं प्रकुञ्चञ्चोपयुञ्जीत। तस्मिन् जीर्णे क्षीरं सर्पिरोदन इत्याहारः। एवं मासमुपयुज्य मासत्रयमादिष्टाहारो रक्षेदात्मानम्। ततः सर्व्वोपतापानपहृत्य वर्णवान् बलवान् श्रवणग्रहणधारणशक्तिसम्पन्नो वर्षशतायुर्भवति। मासि मासि च प्रयोगे वर्षशतं वर्षशतमायुषोऽभिवृद्धिर्भवति। एवं दश मासानुपयुज्य वर्षसहस्रायुर्भवति॥ १७॥

अत इत्यादि। क्रमेणानेन प्रयोज्यानां भल्लातकानामसंख्यत्वे यथाबलमभिवर्द्धसर्पिः क्षीरोदनाहारेणोपयोगोऽप्यारोग्याय प्रभवतीति अवधानात्

भवन्ति चात्र ।

यथा सर्व्वाणि कुष्ठानि हतः खदिरवीजकौ ।
तथैवार्शांसि सर्व्वाणि वृचकारुष्करौ हतः ॥ १८ ॥
असाध्यं नातिवर्त्तन्ते प्रमेहा रजनीं यथा ।
क्षाराग्निं नातिवर्त्तन्ते तथा हश्या गुदोद्भवाः ॥ १९ ॥
घृतानि दीपनीयानि लेहायस्कृतयः सुराः ।
आसवाश्च प्रयोक्तव्या वीक्ष्य दोषसमुच्छ्रितिम् ॥ २० ॥
वेगावरोधस्त्रीपृष्ठ-यानान्युत्कटुकासनम् ।
यथास्वं दोषलञ्चान्नमर्शःसु परिवर्ज्जयेत् ॥ २१ ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने
अर्शसांचिकित्सितं नाम
षष्ठोऽध्यायः ॥ ६ ॥

शृणुध्वम् । हिरण्येत्यादि । शुक्तिः कर्षद्वयं अपकृष्टदोषोनिर्हृतदोषः । प्रतिसंसृष्टभक्तं पेयादिक्रमेणान्नं भुक्तवन्तम्, प्रसृतिः पलद्वयं प्रकुञ्चं पलम्, चकारः पक्षान्तरसूचनार्थः । मास इत्यादि स्तुत्यर्थम् । यथेति । हतो नाश्यतः । परिशिष्टं निगदव्याख्यातम् ॥ १६—२१ ॥

इति श्रीडल्हणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
चिकित्सितस्थानेऽर्शसांचिकित्सितं नाम षष्ठोऽध्याय ।

सप्तमोऽध्यायः ।

अथातोऽश्मरीचिकित्सितं व्याख्यास्यामः ॥ १ ॥

अश्मरी दारुणो व्याधिरन्तकप्रतिमो मतः ।
औषधैस्तरुणः साध्यः प्रवृद्धश्छेदमर्हति ॥
तस्य पूर्व्वेषु रूपेषु स्नेहादिक्रम इष्यते ।
तेनास्यापचयं यान्ति व्याधेर्मूलान्यशेषतः ॥ २ ॥
पाषाणभेदो वसुको वशिराश्मन्तकौ तथा ।
शतावरी श्वदंष्ट्रा च बृहती कण्टकारिका ॥
कपोतवङ्कार्त्तगलः ककुभोशीरकुब्जकः ।
वृक्षादनी भल्लुकश्च वरुणः शाकजं फलम् ॥
यवाः कुलत्थाः कोलानि कतकस्य फलानि च ।
ऊषकादिप्रतीवापमेषां क्वाथैर्घृतं कृतम् ।
भिनत्ति वातसम्भूतामश्मरीं क्षिप्रमेव तु ॥

सम्प्रत्युद्देशनिदानक्रमागतमश्मरीचिकित्सितमधिकरोति अथात इत्यादिना ॥ १ ॥

अश्मरीत्यादि । मूलान्यारम्भकादोषाः । 'पाषाणभेदोनामौषधिः "पाथरकुची" इत्याख्यायते । वसुकोवकोऽगस्त्य इति पर्य्यायाः । वशिरः सूर्य्यावर्त्तः अश्मन्तकः क्षुद्रपत्रपाषाणभेदः कपोतवङ्का ब्राह्मी, आर्त्तगलः 'खोगल' इति प्रसिद्धः, ककुभोऽर्ज्जुनः कुब्जकोगुच्छा तस्य च मूलमत्र ग्राह्यम् ।

क्षारान्, यवागूर्यूषांश्च कषायाणि पयांसि च ।
भोजनानि च कुर्व्वीत वर्गेऽस्मिन् वातनाशने ॥ ३ ॥
कुशः काशः सरो गुन्द्रा उत्कटो मोरटोऽश्मभित् ।
वरी विदारी वाराही शालिमूलत्रिकण्टकम् ॥
भल्लुकः पाटला पाठा पत्तुरोऽथ कुरुण्टिका ।
पुनर्नवा शिरीषश्च क्वथितास्तेषु साधितम् ॥
घृतं शिलाजमधुकवीजैरिन्दीवरस्य च ।
त्रपुसैर्व्वारुकादीनां वीजैश्चावापितं शुभम् ।
भिनत्ति पित्तसम्भूतामश्मरीं क्षिप्रमेव तु ॥
क्षारान् यवागूर्यूषांश्च कषायाणि पयांसि च ।
भोजनानि च कुर्व्वीत वर्गेऽस्मिन् पित्तनाशने ॥ ४ ॥
गणो वरुणकादिस्तु गुग्गुल्वेलाहरेणवः ।
कुष्ठ-भद्रादि-मरिच-चित्रकैः ससुराह्वयैः ॥

वृक्षादनी वन्दा, भल्लुकः श्योनाकः शाकः 'शेगुन' इति प्राकृताः, कतकोऽम्बुप्रसादनः फलभेदः 'निर्म्मली' इत्याख्यायते । एषां कतकान्तानाम्, ऊषकादिः सू० ३८अ० द्रष्टव्यः । क्षारादावप्यमूनि घृतोक्तानि द्रव्याण्युपयुङ्क्ते क्षारानित्यादिना । अस्मिन् पाषाणभेदादावित्यर्थः ॥ २—३ ॥

कुश इत्यादि । गुन्द्रा एड़का उत्कटःशरभेदः, "इकरवोन" इति परिचीयते । मोरट इक्षुमूलम् । वाराही कन्दभेदः व्यवहारस्तु चर्म्मकारालुकस्यैव । कुरुण्टिका पीतझिण्टी । शिलाजं शिलाजतु, शिलाजमधुकसहितानि वीजानि शिलाजमधुकवीजानि तैस्तथोक्तैः, इन्दीवरस्येत्यन्वयः । इन्दीवरं

एतैः सिद्धमजासर्पिरूषकादिगणेन च।
भिनत्ति कफसम्भूतामश्मरीं क्षिप्रमेव तु॥
क्षारान् यवागूर्यूषांश्च कषायाणि पयांसि च।
भोजनानि च कुर्व्वीत वर्गेऽस्मिन् कफनाशने॥ ५॥
पिचुकाङ्कोलकतक-शाकेन्दीवरजैः फलैः।
चूर्णितैः सगुडं तोयं शर्कराशमनं पिबेत्॥ ६॥
क्रौञ्चोष्ट्ररासभास्थीनि श्वदंष्ट्रा तालमूलिका।
अजमोदा कदम्बस्य मूलं नागरमेव च।
पीतानि शर्करां भिन्द्युः सुरयोष्णोदकेन वा॥
त्रिकण्टकस्य वीजानां चूर्णं माक्षिकसंयुतम्।
अवीक्षीरेण सप्ताहमश्मरीभेदनं पिबेत्॥ ७॥
द्रव्याणान्तु घृतोक्तानां क्षारोऽवीमूत्रगालितः।
ग्राम्यसत्त्वशकृत्क्षारैः संयुक्तः साधितः शनैः॥

नीलोत्पलम्, आदिना कुष्माण्डवीजादीनां मूत्रलशीतवीर्य्याणामादेशः। आवापः कल्कोजातोऽस्ये त्यावापितम्। क्षारानित्यादि समानं पूर्व्वेण। गण इत्यादि। एषु कुष्ठाद्युपलक्षितेषु वरुणादिगुग्गुलप्रभृतिषु ऊषकादिगणेन कल्कीकृतेनेति नेयम्। पिचुकेत्यादि। पिचुकः कार्पासः अङ्कोलोऽङ्कोठः 'तखड़ा' इति शब्द्यते केचित्तु 'पेस्ता' इति प्रसिद्धमेवं ग्राहयन्ति। क्रौञ्चो-बकः रासभोगर्द्दभः॥ ४—७॥

द्रव्याणामित्यादि। ग्राम्यसत्त्वाः 'सू० ४६ अ०' उक्ता अश्वादयः। अत्राविशेषेऽप्युक्तानां घृतत्रयाङ्गभूतानां यथालाभं पाषाणभेदादीनां क्षारप्रस्थ

तत्रोषकादिरावापः कार्य्यस्त्रिकटुकान्वितः ।
एष क्षारोऽश्मरीं गुल्मं शर्कराञ्च भिनत्त्यपि ॥
तिलापामार्ग-कदली-पलाश-यवकल्कजः ।
क्षारः पेयोऽविमूत्रेण शर्करानाशनः परः ॥ ८ ॥
पाटलाकरवीराणां क्षारमेवं समाचरेत् ॥ ९ ॥
श्वदंष्ट्रा-यष्टिका-ब्राह्मीकल्कं वाक्षसमं पिबेत् ।
सहैडकाख्यौ पेयौ वा शोभाञ्जनक-मार्कवौ ॥
कपोतवङ्कामूलं वा पिबेदम्लसुरादिभिः ।
तत्सिद्धं वा पिबेत् क्षीरं वेदनाभिरुपद्रुतः ॥
हरीतक्यादिसिद्धं वा वर्षाभूसिद्धमेव वा ।
सर्व्वथैवोपयोज्यः स्याद्गणो वीरतरादिकः ॥ १० ॥
घृतैः क्षारैः कषायैश्च क्षीरैः सोत्तरवस्तिभिः ।
यदि नोपशमं गच्छेच्छेदस्तत्रोत्तरो विधिः ॥ ११ ॥
कुशलस्यापि वैद्यस्य यतः सिद्धिरिहाध्रुवा ।
उपक्रमो जघन्योऽयमतः स परिकीर्त्तितः ॥

षड्गुणेऽवीमूत्रे परिस्राव्याष्टमांशेनाश्वादिशकृत्क्षारेण संयोज्य शनैर्मृद्वग्निना विपचेत् ततोऽर्द्धावशिष्टे मूत्रे उत्तार्य्य पुनः परिस्राव्य भूयोऽपि विपचेत् ततो यथालाभमूषकादिप्रभृतीनां पलद्वयं प्रक्षेप्यमित्युपदेष्टव्यम् ॥ ८ ॥

पाटलेत्यादि । अत्र एवं शब्देनानन्तरश्च वा शब्देनावीमूत्रेणेत्याकृष्या-न्वीयते । 'एडकाख्या' मेषी तस्या इदं मूत्रमैडकाख्यम्, तेन सहवर्त्तमानौ

अक्रियायां ध्रुवो मृत्युः क्रियायां संशयो भवेत् ।
तस्मादापृच्छ्य कर्त्तव्यमीश्वरं साधुकारिणा ॥ १२ ॥

अथ रोगान्वितमुपस्निग्धमपकृष्टदोषमीषत् कर्शितमभ्यक्तस्विन्नशरीरं भुक्तवन्तं कृतवलिमङ्गलस्वस्तिवाचनमग्रोपहरणीयोक्तेन विधानेनोपकल्पितसम्भारमाश्वास्य, ततो वलवन्तमविक्लवमाजानुसमे फलके प्रागुपवेश्य पुरुषञ्च, तस्योत्सङ्गे निषण्णपूर्वकायमुत्तानमुन्नतकटीकं वस्त्राधारकोपविष्टं सङ्कुचितजानुकूर्परमितरेण सहावबद्धं सूत्रेण शाटकैर्वा ततः स्वभ्यक्तनाभिप्रदेशस्य वामपार्श्वं विमृद्य मुष्टिनावपीडयेदधोनाभेर्यावदश्मर्य्यधः प्रपन्नेति । ततः स्नेहाभ्यक्ते कृत्तनखे वामहस्तप्रदेशिनीमध्यमे पायौ प्रणिधायानुसेवनीमासाद्य प्रयत्नबलाभ्यां पायुमेढ्रान्तरमानीय निर्व्वलीकमनायतमविषमञ्च वस्तिं सन्निवेश्य भृशमुत्पीड़येदङ्गुलिभ्यां यथा ग्रन्थिरिवोन्नतं शल्यं भवति ।

सहैड़काख्यौ "वोपसर्जनस्य" पा० सू० ६ । ३ । ८२ इत्यसभावः । 'मार्कवो भृङ्गराजः । अम्लसुरादिभिः काञ्जिकसुरारिष्टादिभिः । हरीतक्यादित्रिफला । वर्षाभूः पुनर्नवा, वीरतरादि 'सू० ३८ अ०' उक्तो वीरतर्व्वादिः । ईश्वरं स्वामिनं राजानमित्येके ॥ ८—१२ ॥

छेदकर्म्ममुपदिशति अथेति । पुरीषपूर्णे हि कोष्ठे न सुखमश्मर्य्युपलभ्यायाहर्त्तुं शक्यते कर्म्मान्ते च व्रणो विक्रियते पुरीषनिर्गमवेगेनातितरांप्रसारितत्वात्तदिदमुच्यते अथेति । अपकृष्टदोषं पूर्व्वमेव मृदुभिर्विरेचनादिना निर्हृतपुरीषमित्याह रीषत्कर्शितमिति विशेषणात् । ईषत् कर्शितं विरे-

स चेद्गृहीतशल्ये तु विवृताक्षो विचेतनः।
हतवक्षस्त्रशीर्षश्च निर्विकारो मृतोपमः॥
न तस्य निर्हरेच्छल्यं निर्हरेत् तु म्रियेत सः।
विना त्वेतेषु रूपेषु निर्हर्त्तुं समुपाचरेत्॥

सव्ये पार्श्वे सेवनीं यवमात्रेण मुक्त्वावचारयेत् शस्त्रमश्मरी प्रमाणं; दक्षिणतो वा क्रियासौकर्य्यहेतोरित्येके। यथा च न भिद्यते चूर्ण्यते वा तथा प्रयतेत चूर्णमल्पमप्यवस्थितं हि पुनः परिवृद्धिमेति तस्मात् समस्तामग्रवक्रेणादद्दीत॥१३॥

अनाद्भिना नातिलङ्घितं, भुक्तवन्तं लघ्विति शेषः। तत आतुरात्बलवन्तं बलीयांसम्। अविक्लवमव्याकुलम्। आजानुसमे आजानून्नते फलके काष्ठपट्टकृतासने। वस्त्रकृतोवलयोवस्त्रधारकः "विड़ा" इत्याख्यायते। इतरेण प्रागुपवेशितेन पुरुषेणेत्यर्थः। सेवनीमनु लक्ष्यीकृत्य प्रणिधाय प्रवेश्येत्यर्थः। आसाद्याश्मरीं प्राप्य निर्व्वलीकमसङ्कुचितम्, अनायतमाकर्षणेनादीर्घीभूतम्। अविषमं सङ्कुचाकर्षणेनाननतोन्नतञ्च यथा स्यात्तथा वस्तिं प्रविवेश्य पुष्पनेत्रसंसक्तप्रणिहितशलाकाप्रस्रुदितेन प्रमाणवतोदकेन सम्यक् स्थापयित्वा उत्पीड़येद् वहिर्मुखं प्रपीड़येदित्यर्थः। अत्राश्मरीप्रमाणं शस्त्रमवचारयेदित्युक्तोऽपि व्यापत्तिभयात्तमनागेव शस्त्रमवचार्य्याङ्गुली सञ्चारेणैव व्रणमश्मरीप्रमाणं चिकीर्षन्ति कुशलाः। दक्षिणतोवेति दक्षिणपार्श्वावलम्बिनि शस्त्रे इत्युन्नेयम्। तस्माच्च क्रियासौकर्य्यहेतोः सुखग्रहणाहरणत्वादिति सन्दर्भः। अत्र एके इति दक्षिणपार्श्वे सामान्यतश्छेदस्यायुक्तत्वेनाखरसमाख्यातुमित्यवधेयम्, एतच्च स्रोणाक्षित्यादिना परमतो व्यक्तीभविष्यति। अत्र प्रयतेतेत्येतेनानायत्ता भेदनं चूर्णनं वा नानुपपन्नमित्यवगमयति। अपभागे सर्प-

स्त्रीणान्तु वस्तिपार्श्वगतो गर्भाशयः सन्निकृष्टः तस्मात्तासामुत्सङ्गवच्छस्त्रं पातयेत्; अतोऽन्यथा खल्वासां मूत्रस्रावी व्रणो भवेत्। पुरुषस्य वा मूत्रप्रसेकक्षणनान्मूत्रक्षरणम्। अश्मरीव्रणादृते भिन्नो वस्तिरेकधा न भवति, द्विधाभिन्नवस्तिराश्मरिको न सिध्यति॥ १४॥

फणाकारं मुखमस्येत्यर्थवक्तं 'सू० ७ अ०' उक्तं सर्पफणमुखं नाम यन्त्रमिति निष्कर्षः॥ १३॥

स्त्रीणामित्यादि। तुकारेण पुमांसं व्यावर्त्तयति। वस्तिपार्श्वगतोवस्तेर्दक्षिणपार्श्वस्थः। उत्सङ्गः क्रोड़ो गर्भाशयसंसङ्गार्द्धभाग इति यावत्। तमर्हतीत्युत्सङ्गवत् "तदर्हम्" इति "पा० सू० ५। १। ११७।" वतिः। तादृशं शस्त्रं न पातयेत् गर्भाशयस्य तद्द्वारस्य च च्छेदभयादित्याकूतम्। एतदेव भङ्गीविशेषेणावगमयति अत इत्यादिना। खल्विति हेतौ "खलुहेतौ निषेधेच" इति कोषान्तरञ्च। तदयमर्थः। यस्मादृत उत्सङ्गवच्छस्त्रपातनान्मूत्रस्रावी व्रणोऽन्यथान्यप्रकारो भवेत् योनिव्रणोभयमुखप्रस्रावित्वादिति हृदयम्। एतावता वस्तेर्दक्षिणे पार्श्वे तिर्य्यक् छेदस्य नितरामात्ययिकत्वात् प्रागुक्तमेकद्व्यस्यास्वारसिकत्वं समन्वितं भवति। पुरुषस्येति वा शब्देन स्त्रीणां समुच्चयः क्रियते मूत्रप्रसेकोऽत्र मूत्रमार्गमूलसंसक्तं स्रोतःक्षणनं हिंसनं छेदनमित्येतत्। कर्म्मणश्चास्य व्यापत्तिमत्त्वात् 'शा० ६ अ०' उक्तमर्थं पुनःस्मारयन्नाह अश्मरीति। अश्मर्य्यै व्रणोयत्रेत्यश्मरीव्रणो वस्तेर्निरावरणप्रदेशस्तस्मादश्मरीव्रणादृते सावरण प्रदेश इति यावत्। एकधा न भवत्येकीभावं न गच्छति न संरोहतीति निष्कर्षः एतेनार्थाच्चिरं भवति न जीवतीति सावरणे हि वस्तिभागे व्रणितस्य मरणमशंशयं भवत्यन्तर्मूत्रविषानुप्रवेशात्। द्विधेत्यादि। वचनमिदं 'शा० ६ अ०' उक्तस्यानुवाद इति नेह पुनर्विव्रियते॥ १४॥

अश्मरीव्रणनिमित्तमेकधाभिन्नवस्तिर्जीवति क्रियाभ्यासात् शास्त्रविहितच्छेदान्निःस्यन्दपरिवृद्धत्वाच्च शल्यस्येति । उद्धृतशल्यन्तूष्णोदकद्रोण्यामवताय्यं स्वेदयेत्, तथाहि वस्तिरसृजा न पूर्य्यते । पूर्णं वा क्षीरवृक्षकषायं पुष्पनेत्रेण विदध्यात् ॥१५॥

भवति चात्र ।

क्षीरवृक्षकषायन्तु पुष्पनेत्रेण योजितम् ।

अश्मरीत्यादि । अश्मर्य्यर्थो व्रणोऽश्मरीव्रणः क्रियाभ्यासात् क्रियायाः पौनःपुन्येनोपयोगात् नन्विदमामनन्ति "हृदयं वस्तिनाभीच घ्नन्ति सद्योहतानि तु" इति "शा० ६ अ०" तत्किमिदमुच्यते जीवति क्रियाभ्यासादित्याह शास्त्रेति । शास्त्रे हि 'सव्ये पार्श्वे' इत्यादिना वस्तेर्निरावरणत्वेनानात्ययिके देशे छेदो विहितस्तस्माज्जीवतीत्याशयः । एतावता वस्तेः सावरणदेश एव विशेषेण मर्म्मेत्यायातम् । भगवन्नाद्यापि ममास्मिन्नर्थे सम्यक् प्रत्ययो जायते कथं नु खलु "प्रवृद्धश्छेदमर्हति" इति स्मरणान्निर्हर्त्तव्येन प्रवृद्धेनाश्मरीसमाख्येन शल्येनाल्पमांसशोणितत्वेनोपदिष्टतया हीनवलत्वेनोपलब्धस्य वस्तेरतितरां दूषणसम्भावनामननुसन्धाय जीवति क्रियाभ्यासादित्युपदिश्यत इत्येवं शङ्कमानस्याशिष्यान्तेवासिसमाक्रान्तं भ्रान्तिकलङ्कं सङ्केतयन्निव प्राक्प्रक्रान्तमेवाह निःस्यन्देति । निःस्यन्दनं निःस्यन्दोऽत्र मूत्रसंपृक्तो मल एव "कृदभिहितो भावो द्रव्यवत् प्रकाशते" इति हि न्यायः । तथाच शल्यस्याश्मर्य्या वस्तेरुपादानभूतं मांसशोणितमनधिष्ठाय मूत्रमलमात्रेण परिवृद्धत्वान्नास्यत्र वस्तेः शल्याभिनिर्वृत्तः स्वरूपतो दोषलेशोऽपि तस्मान्निरङ्कुशमिदमुपदिश्यते जीवति क्रियाभ्यासादित्ययमभिसन्धिः । अवताय्यं स्वेदयेत् स्वेदनार्थमवतारयेदिति तात्पर्य्यम् । पुष्पनेत्रेण उत्तरवस्त्यर्थं विवक्षितेन वस्तिनेत्रेणेत्यर्थः व्यवहारस्त्विदानीं काचादिकृतेन 'पिचकारी' इति प्रसिद्धेनैव ॥ १५ ॥

निर्हरेदश्मरीं तूर्णं रक्तं बस्तिगतञ्च यत् ॥ १६ ॥

मूत्रमार्गविशोधनार्थञ्चास्मै गुड़सौहित्यं वितरेत् । उद्धृत्य चैनां मधुघृताभ्यक्तव्रणं मूत्रविशोधनद्रव्यसिद्धामुष्णां सघृतां यवागूं पाययेदुभयकालं त्रिरात्रम् । त्रिरात्रादूर्द्धं गुड़प्रगाढ़ेन पयसा मृद्वोदनमल्पं भोजयेद्दशरात्रं मूत्रासृग्विशुद्ध्यर्थं व्रणक्लेदनार्थञ्च दशरात्रादूर्द्धं फलाम्लैर्जाङ्गलरसैरुपाचरेत् ॥ १७ ॥

ततो दशरात्रञ्चैनमप्रमत्तः स्वेदयेत् स्नेहेन द्रवस्वेदेन वा । क्षीरवृक्षकषायेण चास्य व्रणं प्रक्षालयेत् । लोध्रमधुकमञ्जिष्ठाप्रपौण्डरीककल्कैर्व्रणं प्रतिसारयेत् । एतैरेव हरिद्रायुतेषु तैलं घृतं वा विपक्वं व्रणाभ्यञ्जनमिति । स्यानशोणितञ्चोत्तरबस्तिभिरुपाचरेत् । सप्तरात्राच्च स्वमार्गमप्रतिपद्यमाने मूत्रे व्रणं यथोक्तेन विधिना दहेदग्निना । स्व-

---

क्षीरेत्यादि । अश्मरीं चूर्णितामित्युन्नेयम् । अश्मरीचूर्णमित्यपि पाठः । गुड़सौहित्यं गुड़तर्पं प्रचुरतरगुड़पानकमित्येतत् । एनामश्मरीम् । मधुघृताभ्यक्तव्रणं मधुघृताक्तप्रोतावच्छन्नव्रणमातुरमित्यर्थः । मूत्रविशोधनानि त्रपुषमूलादीनि । क्लेदो ह्यन्तर्निहितं दोषमपाकृत्य व्रणं रोपणमार्गमापादयति तदिदमुच्यते व्रणक्लेदनार्थञ्चेति । तत इत्यादि । स्नेहेन कोष्णस्नेहद्रोण्यामवगाहेन द्रवस्वेदत्वेनैवास्योपलम्भेऽपि पृथगुपादानं विशेषेणोपयोगिकत्वमुपदेष्टुम् । लोध्रेत्यादि । प्रतिसारयं मात्रार्थः । 'सुप्रतिना मात्रार्थे' इति २।१।९ पाणिनि सूत्रञ्च, तथाच लोध्रादिकल्का वस्त्रावृच्छन्नतया लेशमात्रेण रक्षन्ति भिषक्प्रमस्तैर्घर्षयेदित्यर्थः । वस्त्रावृच्छन्न रोध्रादिकल्केना-

मार्गप्रतिपन्ने चोत्तरवस्त्यास्थापनानुवासनैरुपाचरेन्मधुरकषायैरिति ॥ १८ ॥

यदृच्छया वा मूत्रमार्गप्रतिपन्नामन्तरासक्तां शुक्राश्मरीं शर्करां वा स्रोतसापहरेत् । एवञ्चाशक्ये विदार्य्य वा नाड़ीं शस्त्रेण वड़िशेनोद्धरेत् । रूढ़व्रणश्चाङ्गनाश्व-नग-नाग-रथ-द्रुमान् नारोहेत वर्षं नाप्सु प्लवेत भुञ्जीत वा गुरु ॥१९॥

मूत्रवह-शुक्रवह-मुष्कस्रोतो-मूत्रप्रसेक-सेवनी-योनि-गुद-वस्तीन् परिहरेत् । तत्र मूत्रवहच्छेदान्मरणं मूत्रपूर्णवस्तेः । शुक्रवहच्छेदान्मरणं क्लैव्यं वा । मुष्कस्रोतउपघाताद्ध्वजभङ्गः । मूत्रप्रसेकक्षणनान्मूत्रप्रक्षरणम् । सेवनीयोनिच्छेदाद्रुजः प्रादुर्भावः । वस्तिगुदविद्धलक्षणं प्रागुक्तमिति ॥ २० ॥

भवतश्चात्र ।

मर्म्माण्यष्टावसम्बुध्य स्रोतोजानि शरीरिणाम् ।

च्छादयेदिति निष्कर्षः । एतेषु रोध्रादिषु । वस्तौ संहतं शोणितमस्येति स्य.नशोणितम् । "सू० ४२ अ०" उक्तानांमधुरवर्गाणां कषायोयत्र तैर्मधुरकषायैरुत्तरवस्त्यास्थापनानुवासनैरिति सम्बन्धः ॥ १६—१८ ॥

यदृच्छयेत्यादि । अन्तरामध्यमिति पर्य्यायौ । अत्र शुक्राश्मरीमिति निर्द्देशात् प्रायेणास्या एवैवंगतिकत्वमध्यवसितव्यम् । स्रोतसा मूत्रमार्गेणापहरेदभ्यञ्जाङ्गुष्ठवपीड़नेनाधः प्रणुद्येति शेषः । नाड़ीं मेढ्रानुयायिनीमित्येव । नगः पर्व्वतः, नागो हस्ती । प्रागिति प्रत्येकमर्म्मनिर्द्देशं नामाभिव्यनक्ति । उक्तमर्थं पुनर्व्यवसायाभिवृद्धये समनुगायति मर्म्माणीत्यादिना ।

व्यापादयेद्घ्नन् मर्त्त्यान् शस्त्रकर्म्मापटुर्भिषक् ॥
सेवनी शुक्रहरणी स्रोतसी फलयोर्गुदम् ।
मूत्रसेकं मूत्रवहं योनिर्वस्तिस्तथाष्टमः ॥ २१ ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने-
ऽश्मरीचिकित्सितं नाम
सप्तमोऽध्यायः ॥ ७ ॥

स्रोतोजानीत्यनेन सेवन्यादिरूपसंस्थानविशेषेण परिणताः स्रोतोऽवयवविशेषा एव प्रत्येतव्या स्तोयजास्तरङ्गवुद्बुदादय इत्यादि सर्व्वजनीनव्यपदेशदर्शनात् । अवगतये चैतस्य स्रोतोऽधिकार मधिकुर्व्वन्तु धीमन्तः । मर्म्मत्वञ्चैषां मर्म्मलक्षणाम्नातत्वादविमतं भवति, नापिच तत्र सेवन्यादीनां केषाञ्चिदपरिगणनमात्राद्भेतव्यम्, जाग्रति हि शरणपदवीमधिष्ठायोपलक्षणं नाम । अत्र मूत्रवहशुक्रवहफलस्रोतसां प्रत्येकशोद्वित्वेऽपि धर्म्मद्वारेणैकत्वमध्यवस्याष्टावित्युपदिष्टम् । परिशिष्टं निगद व्याख्यातम् ॥ १८—२१ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
चिकित्सितस्थानेऽश्मरीचिकित्सितं नाम सप्तमोऽध्यायः ।

अष्टमोऽध्यायः ।

अथातो भगन्दराणां चिकित्सितं व्याख्यास्यामः ॥ १ ॥

पञ्च भगन्दराः ख्यातास्तेष्वसाध्यः शम्बूकावर्त्तः शल्यनिमित्तश्चेति, शेषाः कृच्छ्रसाध्याः ॥ २ ॥

तत्र, भगन्दरपिड़कोपद्रुतमातुरमपतर्पणादिविरेचनान्तेनैकादशविधेनोपक्रमेणोपक्रमेतापक्वपिड़कम् । पक्वेषु चोपस्निग्धमवगाहस्विन्नं शय्यायां सन्निवेश्यार्शसमिव यन्त्रयित्वा भगन्दरं समीक्ष्य पराचीनमवाचीनं वा वहिर्म्मुखमन्तर्म्मुखं वा ततः प्रणिधायैषणीमुन्नम्य साशयमुद्धरेच्छस्त्रेण ॥ ३ ॥

अन्तर्म्मुखे चैवं सम्यग्यन्त्रं प्रणिधाय प्रवाहमाणस्य भगन्दरमुखमासाद्यैषणीं दत्त्वा शस्त्रं पातयेत् । आसाद्य वाग्निक्षारस्त्वेतत् सामान्यं सर्व्वेषु ॥ ४ ॥

सम्प्रत्युद्देशक्रमागतत्वाद् भगन्दरचिकित्सितमधिकरोति अथात इत्यादिना ॥ १ ॥

दृश्यते हि भगन्दरेष्वसाध्यौ द्वावनवधानाच्छस्त्रेण संस्पृष्टावाश्वेवात्यर्थमनर्थमापादयतः शेषाश्चोपेक्षिता इत्यतो व्यवसायाभिवृद्धये प्रागुक्तमर्थं स्मारयन्नाह पञ्चेति । तत्रेत्यादि । अपतर्पणादीत्यतद्गुणसंविज्ञानो बहुव्रीहिरित्युपपन्नं भवत्येकादशेति । नखल्वेतावताऽपतर्पणं जिज्ञासितं भवतीति हिन्नयीयमभिसमीक्ष्याध्यवसेयम् । पराचीनं पराङ्मुखमूर्द्धमुखमिति तात्पर्य्यम् । अवाचीनन्त्वधोमुखम् । उन्नम्य शस्त्रमार्गनिरूपणार्थं

विशेषतस्तु—

नाड्यन्तरे व्रणान् कुर्य्याद्भिषक् तु शतपोनके।
ततस्तेषूपरूढ़ेषु शेषा नाड़ीरुपाचरेत् ॥
गतयोऽन्योन्यसम्बद्धावाह्यास्छेद्यास्त्वनेकधा।
नाड़ीरनभिसम्बद्धा यश्छिनत्त्येकधा भिषक् ॥
स कुर्य्याद्विवृतं जन्तोर्व्रणं गुदविदारणम्।
तस्य तद्विवृतं मार्गं विन्मूत्रमनुगच्छति ॥
आटोपगुदशूलञ्च करोति पवनो भृशम्।
तत्राधिगततन्त्रोऽपि भिषङ्मुह्येदसंशयम् ॥

प्रणिहितां तामेषणीमुन्नतां कृत्वा साशयं भगन्दराधिष्ठानभूतगुदतत् समीपवर्त्तिप्रदेशसहितम् उद्धरेन्मोचयेच्छिन्द्यादिति यावत्। अत्र साशयमिति विशेषणं व्रणरोपणप्रतिरोधिप्रसारणाकुञ्चनशक्तेरपाकरणार्थमित्यनुसन्धेयम्। सर्व्वेषु भगन्दरेष्विति शेषः। माभूच्छतपोनकसमाख्ये सर्व्वासां नाड़ीनां युगपच्छेदेनात्ययायातिमहती गुदविदीर्णिरित्युच्यते विशेषत इति। नाड्यन्तरे नाड्या व्यवहिते एकैकान्तरिते इति निष्कर्षः। व्रणान् कुर्य्याच्छेदेनेतिशेषः। तेषु व्रणेषूपरूढ़ेषु सम्यग् रूढ़लिङ्गेनोपलक्षितेष्वित्यर्थः। नहि तावदन्योन्यसम्बद्धासु नाड़ीषु नाड्यन्तरे कृतो व्रणः सर्व्वशः पूयगतेरनिराकर्त्तृत्वेन प्रभवत्यारोग्यायेति तद्व्याहत्यर्थमुक्तमेव विधिं पुनर्व्विशिनष्टि गतय इति। अनेकधेति "अधिकरणविचालेच" इति ५। ३। ४३ पा० सू० धा प्रत्ययः। "एकं राशिं पञ्चधाकुरु" इति वत्। तथाचानेकीकृत्य पृथक्कृत्येति यावत्। तुकारस्तु विवक्षितार्थावधारणानुगुण्येनैव ग्रहीतव्यः। तदयमर्थनिष्कर्षः अन्योन्यसम्बद्धाभ्यो भिन्ना अन्योन्यसम्बद्धावाह्या गतयः अनेकधा निरुक्तैकान्तरितत्वक्रमेण पृथगेव च्छेद्या-

तस्मान्न विवृतः कार्य्यो व्रणस्तु शतपोनके ।
व्याधौ तत्र बहुच्छिद्रे भिषजा वै विजानता ॥ ५ ॥
अर्द्धलाङ्गलकश्छेदः कार्य्यो लाङ्गलकोऽपि वा ।
सर्व्वतोभद्रको वापि कार्य्यो गोतीर्थकोऽपि वा ॥
द्वाभ्यां समाभ्यां पार्श्वाभ्यां छेदो लाङ्गलको मतः ।
ह्रस्वमेकतरं यत्र सोऽर्द्धलाङ्गलकः स्मृतः ॥
सेवनीं वर्ज्जयित्वा च चतुर्द्धा दारिते गुदे ।
सर्व्वतोभद्रकं छेदमाहुश्छेदविदो जनाः ॥
पार्श्वागतेन शस्त्रेण च्छेदो गोतीर्थको भवेत् ।
सर्व्वतः स्रावमार्गांस्तु दहेद्दैद्यस्तथाग्निना ॥
सुकुमारस्य भीरोर्हि दुष्करः शतपोनकः ।
रुजास्रावापहं तत्र स्वेदमाशु प्रयोजयेत् ॥
स्वेदद्रव्यैर्यथोद्दिष्टैः कृशरापायसादिभिः ।
ग्राम्यानूपौदकैर्मांसैर्लावाद्यैर्वापि विष्किरैः ॥

इति । एतदेव दोषदर्शनमुखेन विशदयति नाड़ीरिति । गुदविदारणं व्रणं कुर्य्यादकारणमित्याशयः ॥ २—५ ॥

भगवन् व्रणाकृतिविशेषेण कतमः कतमश्छेदोऽत्र कार्य्यत्वेनाभिप्रेयते इत्याह अर्द्धेति । सर्व्वत इत्यादि । अत्राग्निनेति प्राधान्येनोपदिश्यते इति गम्यते क्षारेणाप्यविकल्पं यथावदार्थोपपत्तेः । दुष्कर इति तु पौनःपुन्येन तदनर्हत्वाराग्निशस्त्रोपयोगादिना गत्यन्तराभावादित्यूनेयम् । रुजेत्यादि । तत्र शतपोनके । यथोद्दिष्टैरिति भाविनि भूतवदुपचारः

वृषादनीमयैरण्डं बिल्वादिञ्च गणं तथा ।
कषायं सुकृतं कृत्वा स्नेहकुम्भे निषेचयेत् ॥
नाड़ीस्वेदेन तेनास्य तं व्रणं स्वेदयेद्भिषक् ।
तिलैरण्डातसी-माष-यव-गोधूम-सर्षपान् ॥
लवणान्यम्लवर्गञ्च स्थाल्यामेवोपसाधयेत् ।
आतुरं स्वेदयेत् तेन तथा सिध्यति कुर्व्वतः ॥
स्विन्नञ्च पाययेदेनं कुष्ठञ्च लवणानि च ॥
वचाहिङ्ग्वजमोदञ्च समभागानि सर्पिषा ।
मार्द्वीकेनाथवाम्लेन सुरासौवीरकेण वा ॥
ततो मधुकतैलेन तस्य सिञ्चेद्भिषग्व्रणम् ।
परिषिञ्चेद्गुदञ्चास्य तैलैर्वातरुजापहैः ॥
विधिनानेन विण्मूत्रं स्वमार्गमधिगच्छति ।
अन्ये चोपद्रवास्तीव्राः सिध्यन्त्यत्र न संशयः ।
शतपोनक आख्यातः—— ॥ ६ ॥

क्रियते 'चि० ३२ अ०' वक्ष्यमाणैरित्यर्थः । विकिरैरिति सिद्धे लावाद्यैरिति विशेषणमेषु लावस्यैव विशेषेणौपयोगिकत्वमाख्यातुम् । बिल्वादिर्महत्-पञ्चमूलम्, नाड़ीस्वेदप्रकारस्तु 'चि० ३२ अ०' द्रष्टव्यः । लवणानि लवण-वर्गोपदिष्टानि, अम्ललवणवर्गौतु 'सू० ४२ अ०' निर्दिष्टौ । स्विन्नमित्यादि । स्विन्नमेनमातुरं कुष्ठादिकं कल्कीकृत्य सर्पिरादिना पाययेदित्युपदेशः । मृद्वीकाकृतं मद्यं मार्द्वीकम् । मधुकक्वाथकल्कसिद्धं तैलं मधुकतैलम् । वातरुजापहैः स्नेहैर्बलातैलादिभिः । आख्यातः प्रतीकारस्त इति शेषः ॥ ६ ॥

———————— उष्ट्रग्रीवे क्रियां शृणु।
अथोष्ट्रग्रीवमेषित्वा छित्वा क्षारं निपातयेत्॥
पूतिमांसव्यपोहार्थमग्निरत्र न पूजितः।
अथैनं घृतसंसृष्टैस्तिलैः पिष्टैः प्रलेपयेत्॥
बन्धं ततोऽनुकुर्व्वीत परिषेकन्तु सर्पिषा।
तृतीये दिवसे मुक्त्वा यथास्वं शोधयेद्भिषक्॥
ततः शुद्धं विदित्वा च रोपयेत् तु यथाक्रमम्॥ ७॥
उत्कृत्यास्रावमार्गन्तु परिस्राविणि बुद्धिमान्।
क्षारेण वा स्रावगतिं दहेद्धुतवहेन वा॥
सुखोष्णेनाणुतैलेन सेचयेद्गुदमण्डलम्।
उपनाहाः प्रदेहाश्च मूत्रक्षारसमन्विताः।
वामनीयौषधैः कार्य्याः परिषेकाश्च मात्रया॥

उष्ट्रेत्यादि। अग्निर्हि परमतैक्ष्ण्यादिगुणयोगात् पित्तमेकान्तेनाभिवर्द्धयतीत्यग्नेरपूजितत्वेनाभिधानं साम्प्रतमेव। बन्धं गोफणाख्यं कौपीनाकारं बन्धमित्येतत्। यथास्वं यथादोषं शोधयेत् 'चि० १ अ०' अभिसमीक्ष्येति शेषः। द्विव्रणीयोक्तं क्रममनतिक्रम्येति यथाक्रमम्। उत्कृत्येत्यादि उत्कृत्य शस्त्रेणच्छित्वा स्रावगतिमुत्कृत्तं तं स्रावमार्गं दहेदित्यन्वयः। अत्र वा शब्दद्वयमेकान्तेन समुच्चयशङ्कामपास्याग्निक्षारयोरुभयोरेव स्रातन्त्र्येणौपयौगिकत्वमाख्यापयतीति नापार्थकम्। अणुतैलेन चि० ४ अ०

मृदूभूतं विदित्वैनमल्पस्रावरुगन्वितम्।
गतिमन्विष्य शस्त्रेण छिन्द्यात् खर्ज्जूरपत्रकम्।
चन्द्रार्द्धं चन्द्रचक्रञ्च सूचीमुखमवाङ्मुखम्॥
छित्वाग्निना दहेत् सम्यगेवं क्षारेण वा पुनः।
ततः संशोधनैरेवं मृदुपूर्व्वैर्विशोधयेत्॥ ८॥

उक्तेन सेचयेत्, शस्त्रजनितवातवेदनायां जातायामिवेति ज्ञेयम्। वक्ष्यति हि "एषाञ्च शस्त्रपतनाद्वेदना यत्र जायते। तत्रांशुतैलेन" इत्यादि। वामनीयौषधैः सू० ३९ अ० उपदिष्टैर्मदनफलादिभिरुपनाह्यादयः परिषेकाः प्रक्षालनार्थाः क्वाथाश्च क्षारादिसमन्विताः कार्य्या इत्यर्थः। अत्रातितैक्ष्ण्यादिभयाद्दाराध्यादिवत्क्रममभिसमीक्ष्य यथायोगं 'क्षारादीन् ग्राहयितु मित्युच्यते मात्रयेत्यनुसन्धेयम्। छिन्ना हि भगन्दरनाड़ी सावशेषत्वात् प्रतीकारवैगुण्याद्वा स्रावोपप्लुतं मांसादिकं मृदूकृत्यानुप्रवेशिना निष्यन्देन नानाविधैर्गतिविशेषैर्भूयोऽपि विकरोतीति तेषां यथा स्थूलं प्रतीकारक्रममुपदिदिक्षति मृद्वित्यादिना। एनं परिस्राविणं भगन्दरं मृदूभूतं दोषदुष्टतया सञ्जातमृदुमांसत्वेनावाप्तमृदुभावम्, अल्पस्रावरुगन्वितम् प्राक्छिन्नतया दोषाणामल्पीयस्त्वेनाल्पतरस्राववेदनं विदित्वा गतिं नाड़ीमन्विष्य खर्ज्जुरपत्रादिकं छिन्द्यान्निःशेषमिति योजना। खर्ज्जुरपत्रकादीनि तु संस्थानविशेषभिन्नानां भगन्दराणां नामानि। अत्र खर्ज्जूरपत्रकमिति संज्ञायां कः, सा च काकपक्षकादिवत् सादृश्यमूला। तथाच खर्ज्जूरपत्राणि यथा नालस्योभयपार्श्वतः प्रसरन्ति तथैव प्रसृताभिर्नाड़ीभिरुपनिबद्धा प्रधाननाड़ी यत्राविर्भवति स खर्ज्जूरपत्रकोनाम भगन्दरः, चन्द्रस्यार्द्धमिवेति चन्द्रार्द्धम्, चन्द्रचक्रं चन्द्रमण्डलाकारं सूचीमुखं सूक्ष्मवक्त्रम्, अवाङ्मुखमधोमुखम्। एतावन्त्येव स्थूलमनल्पबुद्धीनां सालक्षण्यानु-

वहिरन्तर्मुखश्चापि शिशोर्यस्य भगन्दरः ।
तस्याहितं विरेकाग्नि-शस्त्रक्षारावचारणम् ॥
यद्यन्मृदु च तीक्ष्णञ्च तत्तत् तस्यावचारयेत् ॥ ९ ॥
आरग्वधनिशाकालाचूर्णं मधुघृताप्लुतम् ।
अग्रवर्त्तिप्रणिहितं व्रणानां शोधनं हितम् ॥
योगोऽयं नाशयत्याशु गतिं मेघमिवानिलः ॥ १० ॥
आगन्तुजे भिषङ्नाडीं शस्त्रेणोत्कृत्य यत्नतः ।
जम्ब्वोष्ठेनाग्निवर्णेन तप्तया वा शलाकया ॥
दहेद्यथोक्तं मतिमांस्तं व्रणं सुसमाहितः ।
कृमिघ्नञ्च विधिं कुर्य्याच्छल्यानयनमेव च ॥ ११ ॥

मानयुक्तिकुशलानामनुक्तज्ञानायेति भगवानित एव विरराम, अतः शेषेषु यथायोगं छेदः क्षारमात्रं वोपयोज्यं द्विव्रणीयञ्चावेक्ष्यमित्यनुसन्धेयम् ॥७-८॥

वहिरित्यादि । वाशब्दस्यानाधिष्ठानोऽयं च शब्दः । अहितमसह्यत्वादित्यभिसन्धिः । नन्वेवंगते का गतिः ? आह यदिति । अत्र हि मृदुत्वमत्यर्थमकिञ्चित्करं भवति तीक्ष्णमपि च नोपशेते, तदनतिमृदुतीक्ष्णान्यवचारयितुमिदमुच्यते मृदुचतीक्ष्णञ्चेति । तदेव दिङ्मात्र मुपदिशति आरग्वधेति । काला कृष्णत्रिवृत् । नातिश्लक्ष्णखरत्वेन प्रशस्तया वर्त्त्या प्रणिहितमग्रवर्त्तिप्रणिहितम् । 'पराङ्गाग्र प्राग्रहरा' इति पर्य्यायाः । अत्र मधुघृताप्लुतमिति सामान्येनोक्तेऽपि चूर्णाद्द्विगुणं मधु पक्त्वाऽतितरां तन्तुलीभूते तस्मिन् चूर्णमेतत् प्रक्षिप्य घृताक्ते ताम्रपात्रेऽवतार्य्योष्णावस्थायां वर्त्तिः कार्य्येत्युपदिशन्ति प्राञ्चः । अर्व्वाञ्चस्तु मधुघृताप्लुतेन चूर्ण-

प्रत्याख्यायैष चारभ्यो वर्ज्जश्चापि त्रिदोषजः ।
एतत् कर्म्म समाख्यातं सर्व्वेषामनुपूर्व्वशः ॥ १२ ॥
एषान्तु शस्त्रपतनाद्वेदना यत्र जायते ।
तत्राशु तैलेनोष्णेन परिषिक्तः प्रशस्यते ॥
वातघ्नौषधसम्पूर्णां स्थालीं छिद्रशराविकाम् ।
स्नेहाभ्यक्तगुदस्तप्तामध्यासीत सवाष्पिकाम् ॥
नाड्या वाष्पाहरेत् स्वेदं शयानस्य रुजापहम् ।
उष्णोदकेऽवगाढो वा तथा शाम्यति वेदना ॥
कदलीमृग-लोपाक-प्रियकाजिनसंभृतान् ।
कारयेदुपनाहांश्च शाल्वणादीन् विचक्षणः ।
कटुत्रिकं वचाहिङ्गुलवणान्यथ दीप्यकम् ।
पाययेच्चाम्लकौलत्थ-सुरासौवीरकादिभिः ॥ १३ ॥

नाक्तं वस्त्रखण्डमेव वर्त्तीकृत्योपयुञ्जन्ति । आगन्तुज इत्यादि । क्रमिघ्नं शल्यापनयनञ्च विधिं कुर्य्यात् तद्वत्येव । प्रत्याख्यायेति । चकारोऽवधारणार्थः । एष आगन्तुजः प्रत्याख्याय प्रायेणासाध्य इत्यभिधायैवारभ्य उक्तेन विधिना प्रतिकर्त्तव्यः प्रतीकर्त्तुमनुनीतेनात्मनं यशः परिरक्षतेति शेषः । वातेत्यादि । वातघ्नौषधसम्पूर्णां वातघ्नौषधक्वाथपूर्णाम् । छिद्रशराविकां छिद्रोपलक्षितशरावपिहितास्याम्, सवाष्पिकां वाष्पमुद्गमन्तीम् । नाड्या हस्तिशुण्डिकाकारयेति नेयम् । अजिनानीह आर्द्राण्येव ग्राहयन्ति कुशलास्तत्र लेपितान् अजिनसंभृतान् ॥ ८—१३ ॥

ज्योतिष्मती-लाङ्गलकी-श्यामा-दन्ती-त्रिवृत्तिलाः।
कुष्ठं शताह्वा गोलोमी तिल्वको गिरिकर्णिका।
कासीस-काञ्चनक्षीर्य्यौ वर्गः शोधन इष्यते॥
त्रिवृत्तिलानागदन्तीमञ्जिष्ठाः पयसा सह।
उत्सादनं भवेदेतत् सैन्धवक्षौद्रसंयुतम्॥
रसाञ्जनं हरिद्रे द्वे मञ्जिष्ठानिम्बपल्लवाः।
त्रिवृत्तेजोवतीदन्तीकल्को नाड़ीव्रणापहः॥
कुष्ठं त्रिवृत् तिला दन्ती मागध्यः सैन्धवं मधु।
रजनी त्रिफला तुत्थं हितं स्याद्व्रणशोधनम्॥
मागध्यो मधुकं रोध्रं कुष्ठमेला हरेणवः।
समङ्गा धातकी चैव सारिवा रजनीद्वयम्॥
प्रियङ्गवः सर्ज्जरसः पद्मकं पद्मकेशरम्।
सुधां वचां लाङ्गलकीं मधूच्छिष्टं ससैन्धवम्॥
एतत् संभृत्य सम्भारान् तैलं धीरो विपाचयेत्॥
एतद्वै गण्डमालासु मण्डलेष्वथ मेहिषु।
रोपणार्थं हितं तैलं भगन्दरविनाशनम्॥

ज्योतिष्मतीत्यादि। ज्योतिष्मती नामौषधिः 'नेफुट्की' इत्याख्यायते। गोलोमी वचा, तिल्वको लोध्रः, गिरिकर्णिका अपराजिता काञ्चनक्षीरी क्षीरिणी व्यवहारस्तु 'काँटा गाँधारी' इति प्रसिद्धस्यैव। तेजोवती चव्यम् केशरं किञ्जल्कः, सुधा स्नुहीक्षीरम्, समङ्गादिनोक्तमिदं तैलं कल्कसाध्य

न्यग्रोधादिगणश्चैव हितः शोधनरोपणे ।
तैलं घृतं वा तत् पक्वं भगन्दरविनाशनम् ॥
त्रिवृद्दन्तीहरिद्रार्कमूलं लोहाश्वमारकौ ।
विडङ्गसारं त्रिफला स्नुह्यर्कपयसी मधु ॥
मधूच्छिष्टसमायुक्तैस्तैलमेतैर्विपाचयेत् ।
भगन्दरविनाशार्थमेतद्योज्यं विशेषतः ॥
चित्रकार्कौ त्रिवृत्पाठे मलपूं हयमारकम् ।
सुधां वचां लाङ्गलकीं सप्तपर्णीं सुवर्च्चिकाम् ॥
ज्योतिष्मतीञ्च संभृत्य तैलं धीरो विपाचयेत् ।
एतद्धि स्यन्दनं तैलं भृशं दद्याद्भगन्दरे ॥
शोधनं रोपणञ्चैव सवर्णकरणं तथा ।
द्विव्रणीयमवेक्षेत व्रणावस्थासु बुद्धिमान् ॥ १४ ॥
छिद्रादूर्द्ध्वं हरेदोष्ठमर्शोयन्त्रस्य यन्त्रवित् ।
ततो भगन्दरे दद्यादेतदर्द्धेन्दुसन्निभम् ॥ १५ ॥
व्यायामं मैथुनं कोपं पृष्ठयानं गुरूणि च

मित्याहुः । न्यग्रोधादिर्गणस्तु सू० ३८ अ० द्रष्टव्यः, लोहमगुर्व्विति पर्य्यायौ । अश्वमारकः करवीरः, मलपूः काकोडुम्बरिका, क्षुद्रोडुम्बर इति यावत् । सुवर्च्चिका सर्ज्जिकाचारः । अत्रार्शसमिव यन्त्रयित्वेत्युपदेशादर्थादाक्षिप्त-मर्शोयन्त्रं हि सोष्ठत्वेन नैवोपयोगमेति गुदोष्ठाद्विच्छेद्यत्वात्तदिदमुच्यते

संवत्सरं परिहरेदुपरूढव्रणो नरः ॥ १६ ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने
भगन्दरचिकित्सितं नाम
अष्टमोऽध्यायः ॥ ८ ॥

च्छिद्रादिति। अत्र हरेदोष्ठमिति सिद्धे छिद्रादूर्द्ध्वमिति विशेषणं प्रतिपत्ति सुकरत्वायेत्यवधेयम्। परिशिष्टं निगदव्याख्यातम्॥ १४—१६ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
चिकित्सितस्थाने भगन्दरचिकित्सितं नामाष्टमोऽध्यायः।

नवमोऽध्यायः ।

अथातः कुष्ठचिकित्सितं व्याख्यास्यामः ॥ १ ॥

विरुद्धाध्यशनासात्म्यवेगविघातैः स्नेहादीनाञ्चायथारम्भैः पापक्रियया पुराकृतकर्म्मयोगाच्च त्वग्दोषो भवति ॥ २ ॥

तत्र त्वग्दोषी मांस-वसा-दुग्ध-दधि-तैल-कुलत्थ-माष-निष्पावेक्षुविकाराम्ल-विरुद्धाध्यशनाजीर्ण-विदाह्यभिष्यन्दीनि दिवास्वप्नं व्यवायञ्च परिहरेत् ॥ ३ ॥

सम्प्रति क्रमागतत्वात् कुष्ठचिकित्सितमधिकरोति अथात इत्यादिना ॥१॥

नहि किञ्चिदस्ति कुष्ठमनायाससाध्यमित्याचचक्षे, तदस्य व्याससमासाभ्यां प्रतीकारक्रममुपदिदिक्षुः प्रथमन्तावत् "संक्षेपतः क्रियायोगो निदानपरिवर्जनम्" इत्यनुशासनाज्जिहासितानि निदानानि स्मारयति विरुद्धेति। पापक्रियेयमैहिकी गरीयसी च प्रत्येतव्या प्राक्तनकर्म्मणः पृथगुपदेशात् "अत्युत्कटैः पापपुण्यैरिहैव फलमश्नुते" इति स्मरणाच्च। त्वग्दोषः कुष्ठमित्यनर्थान्तरम्। पूर्व्वं हि "आहाराचारयोः प्रोक्ता मास्थाय महतीं क्रियाम्" इत्यादि निरदिक्षत्तदिह तावुपदिशन् नितरामात्ययिकत्वादेकान्ततः परिहर्त्तव्यानि मांसादीनि प्राक् परिहरति तत्रेत्यादिना। तत्र भवति त्वग्दोषे त्वग्दोषोत्पत्त्यवस्थायामितियावत्। अत्र व्याधेरस्याङ्कुरितत्वेनाप्रबलायां तस्यामवस्थायां मांसादीनां परीहारोऽत्यर्थं दोषसञ्जननत्वमाख्यापयतीति पल्लवितत्वेन प्रबलावस्थायामप्येषां परीहारोऽर्थादा-

ततः शालि-षष्टिक-यव-गोधूम-कोरदूष-श्यामाकोद्दाल-कादीननवान् भुञ्जीत मुद्गाढ़क्योरन्यतरस्य यूषेण सूपेन वा निम्बपत्रारुष्करव्यामिश्रेण, मण्डूकपर्णी-वल्गुजाटरूषक-कूपिकापुष्पैः सर्पिःसिद्धैः सर्षपतैलसिद्धैर्वा, तिक्तवर्गेण वाभिहितेन । मांससात्म्याय वा जाङ्गलमांसममेदस्कं वितरेत् । तैलं वज्रकमभ्यङ्गार्थे । आरग्वधादिकषायमुत्सादनार्थे । पानपरिषेकावगाहादिषु च खदिरकषायमित्येष आहाराचारविभागः ॥ ४ ॥

तत्र पूर्व्वरूपेषूभयतः संशोधनमासेवेत । तत्र त्वक्-

चिष्यते । न खल्वेषां परीहारमन्तरेण किञ्चिदप्यारोग्याय प्रभविष्यतीति सम्प्रधार्य्याह तत इति । ततोमांसादीनां परीहारात् परमित्यर्थः । यूषो वस्त्रपरिस्रुतः क्वाथः सूपस्त्वपरिस्रुतः । अरुष्करं भल्लातकफलं तच्चैकतो दग्धपर्य्यन्तमेव वलावलमभिसमीक्ष्योपयोज्यम् । मण्डूकपर्णी मञ्जिष्ठा, कूपिका श्वेतार्कः अभिहितेन सू० ४२ अ० इति शेषः । वज्रकं नाम तैलं परमतः सन्तर्पणेत्यादिना निवेदयिष्यते । अभ्यङ्गार्थे अभ्यङ्गायेत्यर्थः । "अर्थेक्रते च शब्दौ द्वौ तादर्थ्ये परिकीर्त्तितौ इति कोषान्तरात् । आरग्वधादिकषायमित्यौपयौगिकत्वात् "सू० ३८ अ०" उक्तारग्वधादिकल्कमित्यर्थः । "स्वरसः कल्कः शृत शीतश्च कषायः" इति सू० ४अ० आत्रेयः । उत्सादनम् उद्वर्त्तनम् ॥ २—४ ॥

संप्राप्ते शोधनालेपनानि । शोणितप्राप्ते संशोधनालेपन-कषायपानशोणितावसेचनानि । मांसप्राप्ते संशोधनालेपन-कषाय-पानशोणितावसेचनारिष्ट-मन्थ-प्राशाः । चतुर्थं कर्म्म-गुणप्राप्तं याप्यमात्मवतः संविधानवतश्च ॥ ५ ॥

तत्र संशोधनाच्छोणितावसेचनाच्चोर्द्ध्वं भल्लात-शिलाजतु-गुग्गुल्वगुरु-तुवरक-खदिरासनायस्कृतिविधानमासेवेत । पञ्च-मं नैव चोपक्रमेत ॥ ६ ॥

तत्र प्रथममेव कुष्ठिनं स्नेहपानविधानेनोपपादयेत् । मेषशृङ्गी-श्वदंष्ट्रा-शार्ङ्गष्टा-गुडूची-द्विपञ्चमूलीसिद्धं तैलं घृतं वा वातकुष्ठिनां पानाभ्यङ्गयोर्विदध्यात् । धवाश्वकर्ण-ककुभ-पलाश-पिचुमर्द्द-पर्पटक-मधुक-रोध्र-समङ्गासिद्धं सर्पिः पित्त-कुष्ठिनाम् । पियाल-शालारग्वध-निम्ब-सप्तपर्ण-चित्रक-मरिच-वचा-कुष्ठसिद्धं श्लेष्मकुष्ठिनाम् ॥ ७ ॥

प्रधानं कर्म्मोपदिशति तत्रेत्यादिना । आलेपनकषायारिष्टादयस्त्वत्रा-मुत्र च यथावसरं वक्ष्यन्ते । अत्रारिष्टग्रहणेन मद्यासवयोरपि परिग्रहः क्रियते । माकार्षीदनित्वरं यशोऽभिषन् कदाचिदप्यसाध्यानां साधनाभि-लाष मित्यभिसन्धायासाध्यान् प्रति निदानोक्तमर्थं पुनः स्मृतिपथमानिनी-षति चतुर्थमित्यादिना । चतुर्थं मेदोगतम् , पञ्चकर्म्माभिमतां स्तां स्तान् भावानधितिष्ठन्तं कर्म्मगुणप्राप्तम् । संविधानं साधनम् । तत्रेत्यादि अत्र भल्लातकस्य गुग्गुलोस्तुवरकशिलाजतुनोश्च विधानं यथाक्रममर्शोमहावात-व्याधि मधुमेह चिकित्सितेषु द्रष्टव्यम् । शेषाणितु महाकुष्ठचिकित्सित एव ।

भल्लातकाभया-विडङ्गसिद्धं वा सर्व्वेषाम्। तुवरकतैलं भल्लातकतैलं वेति ॥ ८ ॥

सप्तपर्णारग्वधातिविषा-पाठा-कटुरोहिण्यमृता-त्रिफला-पटोल-पिचुमर्द-पर्पटक-दुरालभा-त्रायमाणा-मुस्ता-चन्दन-पद्मक-हरिद्रोपकुल्या-विशाला-मूर्व्वा-शतावरी-सारिवेन्द्रयवाटरूषक-षड्ग्रन्था-मधुक-भूनिम्ब-गृष्टिका इति समभागः कल्कः स्यात्, कल्काच्चतुर्गुणं सर्पिः प्रक्षिप्य तद्द्विगुणो धात्रीफलरसस्तच्चतुर्गुणा आपः, तदैकध्यं समालोड्य विपचेत्। एतन्महातिक्तकं नाम सर्पिः कुष्ठ-विषमज्वर-रक्तपित्त-हृद्रोगोन्मादापस्मार-गुल्म-पिड़कासृग्दर-गलगण्ड-गण्डमाला-श्लीपद-पाण्डुरोग-विसर्प-षाण्ड्य-कण्डु-पामादींश्च शमयेदिति ॥ ९ ॥

त्रिफला-पटोल-पिचुमर्द्दाटरूषक-कटुरोहिणी-दुरालभा-त्रायमाणा-पर्पटकाश्चैतेषां द्विपलिकान् भागान् जलद्रोणे प्रक्षिप्य पादावशेषं कषायमादाय कल्कपेष्याणीमानि भेष-

---

पञ्चमसप्तमगतं नैव चोपक्रान्त किमुत षष्ठं सप्तमञ्चेत्याकूतम्। तत्रेत्यादि। मेषशृङ्गी अजशृङ्गी वार्त्तिका गुञ्जा धवः स्वनामप्रसिद्धो राढ़ीयोऽप्रचः अश्वकर्णः शालभेदः ककुभोऽर्ज्जुनः समङ्गा वराहक्रान्ता व्यवहारस्तु मञ्जिष्ठायां एव। पियालो राजादनः। सप्तेत्यादि। उपकुल्या पिप्पली, विशाला इन्द्रवारुणी 'गुरुम' इत्याख्यायते। गृष्टिका वराहक्रान्ता ॥५—९॥

त्रिफलेत्यादि। कल्कार्थं इत्यादि पेषणीयानि कल्कपेष्याणि, इमानि वक्ष्यमाणानि एतानि। क्वाथसहितानि कल्कीकृतानि त्रायमाणादीनि

जान्यर्द्धपलिकानि त्रायमाणा-मुस्तेन्द्रयव-चन्दन-किराततिक्तानि पिप्पल्यश्चैतानि घृतप्रस्थे समावाप्य विपचेत्। एतत् तिक्तकं नाम सर्पिः कुष्ठ-विषमज्वर-गुल्मार्शोग्रहणीदोष-शोफ-पाण्डुरोग-विसर्प-षाण्ढ्यशमनञ्चेति ॥ १० ॥

अतोऽन्यतमेन घृतेन स्निग्धस्विन्नस्यैकां द्वे तिस्रश्चतस्रः पञ्च वा शिरा विध्येन्मण्डलानि चोत्सन्नान्यवलिखेदभीक्ष्णं प्रच्छयेद्वा। समुद्रफेन-शाक-गोजी-काकोडुम्बरिकापत्रैर्वाव-घृष्यालेपयेल्लाक्षा-सर्ज्जरस--रसाञ्जन-प्रपुन्नाडावल्गुज-तेजोवत्य-श्वमारकार्क-कुटजारेवत-मूलकल्कैर्मूत्रपिष्टैः पित्तपिष्टैर्वा[1] स्वर्ज्जिका-तुत्थ-कासीस-विडङ्गागारधूम--चित्रक--कटुक-सुधा-हरिद्रा-सैन्धवकल्कैर्वा[2]। एतान्यवावाप्य क्षारकल्पेन निस्रुते पालाशक्षारे ततो विपाच्य फाणितमिव सञ्जातमवतार्य्य लेपयेत्[3]। ज्योतिष्कफल-लाक्षा-मरिच-पिप्पली-सुमनःपत्रैर्वा[4] हरिताल-मनःशिलार्कक्षीर-तिल-शिग्रु-मरिचकल्कैर्वा[5] स्वर्ज्जि-

समावाप्य निक्षिप्येत्यर्थः। गोजी शाखोटकः 'शड़ा' इति 'शेओड़ा' इति चाख्यायते। काकोडुम्बरिका क्षुद्रोडुम्बरभेदः। प्रपुन्नाडश्चक्रमर्दः, आरेवतः शम्पाकः। पित्तमत्र गव्यमेव मुख्यमित्याहुः। स्वर्जिकेत्यादावपि मूत्रपिष्टैः पित्तपिष्टैर्वेत्यन्वीयते। एतान्येवेत्यादौ क्षारकल्पेनेति विशेषणं 'स्रावयेत् षड्गुणे तोये केचिदाहुश्चतुर्गुणे" इत्यनुसन्धानार्थम्। एतानि सन्निहितत्वात् स्वर्जिकादीनि दर्शेत्यर्थः। उभयार्थेनापि हि स्वरूपानुवादकतया प्रयोगो दृश्यते यथा अन्यथाकारं भुङ्क्ते पूर्वं

का-कुष्ठ-तुत्थ-कुटज-चित्रक-विड़ङ्ग-मरिच-मनःशिलाकल्कैर्वा[१] हरीतकी-करञ्जिका-विड़ङ्ग-सिद्धार्थक-लवण-रोचनावल्गुज-हरिद्राकल्कैर्वा[२] ।

सर्व्वे कुष्ठापहाः सिद्धा लेपाः सप्त प्रकीर्त्तिताः ।
वैशेषिकानतस्तूर्द्धं दद्रुश्वित्रेषु मे शृणु ॥ ११ ॥

लाक्षा कुष्ठं सर्षपाः श्रीनिकेतं रात्रिर्व्योषं चक्रमर्द्दस्य वीजम् ।
कृत्वैकस्थं तक्रपिष्टः प्रलेपो दद्रूघ्नो मूलकाद्वीजयुक्तः ॥
सिन्धूद्भूतं चक्रमर्द्दस्य वीजमिक्षूद्भूतं केशरं तार्क्ष्य-शैलम् ।
पिष्टो लेपोऽयं कपित्थाद्रसेन दद्रूस्तूर्णं नाशयत्येष योगः ॥
हेमक्षीरी व्याधिघातः शिरीषो निम्बः सर्ज्जो वत्सकः साजकर्णः ।
शीघ्रं तीव्रा नाशयन्तीह दद्रूः स्नानालेपोद्वर्षणेषु प्रयुक्ताः ॥ १२ ॥

भुक्ता व्रजतीत्यादि तदिदमुपपन्नं भवति आवाप्य ततो विपाच्येति । न तावत् प्रयोगाणामेषां महाभाष्येऽन्यथा समाधानादसिद्धान्त एष इत्याशङ्कितव्यम् "न यद्यनाकाङ्क्षे" इति "३।४।२३" भाष्यकृदप्रत्याख्यात पाणिनिसूत्र दर्शनात् । अतिरोहितार्थमन्यत् ॥ १०—११ ॥

लाक्षेत्यादि । श्रीनिकेतं नाम 'नवनीत खोटि' इत्याख्यायते । दद्रूदद्रुश्चेति पर्य्यायौ । सिन्धूद्भूतं सैन्धवम्, इक्षूद्भूतं गुड़ादि, केशरं नागकेशरम्, तार्क्ष्यं रसाञ्जनम्, शैलं शैलेयम्, हेमक्षीरी स्वर्णक्षीरी व्यवहारस्तु 'काँटागम्भारी' इति प्रसिद्धस्यैव, व्याधिघातः सम्याकः, भद्रै-

भद्रासंज्ञोडुम्बरीमूलतुल्यं दत्त्वा मूलं चोदयित्वा मलप्वा: ।
सिद्धं तोयं पीतमुष्णे सुखोष्णं स्फोटान् श्वित्रे पुण्डरीके च
कुर्य्यात् ॥

द्वैपं दग्धं चर्म्म मातङ्गजं वा भिन्ने स्फोटे तैलयुक्तं प्रलेपः ।
पूतिः कीटो राजवृक्षोद्भवेन क्षारेणाक्तः श्वित्रमेको निहन्ति
॥ १३ ॥

कृष्णस्य सर्पस्य मसी सुदग्धा वैभीतकं तैलमथ द्वितीयम् ।
एतत् समस्तं मृदितं प्रलेपात् श्वित्राणि सर्व्वाण्यपहन्ति
शीघ्रम् ॥

अध्यर्द्धतोये सुमतेस्रुतस्य क्षारस्य कल्पेन तु सप्तकृत्वः ।
तैलं शृतं तेन चतुर्गुणेन श्वित्रापहं श्रेष्ठमेतदग्र्याम् ॥ १४ ॥

त्यादि भद्रा अनन्ता, उडुम्बरी फल्गूडुम्बर:, मलपू: काकोडुम्बरिका चोदयित्वा सम्मिश्य, उष्णे आतपेस्थितस्येत्यर्थ: । अत्र श्वित्रे पुण्डरीके चेति सामान्येनोक्तेऽपि चित्रकशोभञ्जनादिभि र्मृदुक्षारेणवाक्त इत्याहु: . स्फोटजननानुगुणत्वात् । स्यादेतदनन्तरन्तु किं कार्य्यमित्याह द्वैपमिति । द्वीपी चित्रव्याघ्रस्तस्येदं द्वैपम् , अधोवातवत् पूतिगन्धि: कीट: पूतिकीट: । कृष्णस्येत्यादि । सर्पस्य पुटदग्धस्येत्येव, मसी कृष्णवर्णक्षार: । अध्यर्द्धेति । अधिकमर्द्धमतेत्यध्यर्द्धम् , क्षारस्येति क्षारोऽयमुक्तानुषङ्गात् कृष्णस्य सर्पस्येति नेयम् , तदयमर्थ: । कल्पेन क्षारंप्रकृत्य "स्रावयेत् षड्गुणेतोये" इत्युक्तेन विधिना सप्तकृत्व: सप्तवारान् स्रुतस्य स्रावितस्य कृष्णाहिक्षारस्य अध्यर्द्धतोये पाकात् परं क्षारापेक्षया अर्द्धाधिकैकभागे तोये सुमते "सु॰

घृतेन युक्तं प्रपुनाड़वीजं कुष्ठञ्च यष्टीमधुकञ्च पिष्ट्वा ।
श्वेताय दद्याद्गृहकुक्कुटाय चतुर्थभक्ताय वुभुक्षिताय ॥
तस्योपसंगृह्य च तत् पुरीष-मुत्पाचितं सर्व्वत एव लिम्पेत् ।
अभ्यन्तरं मासमिमं प्रयोगं प्रयोजयेच्छ्वित्रमथो निहन्ति ॥१५॥

क्षारे सुदग्धे गजलेण्डजे तु गजस्य मूत्रेण वहुस्रुते च ।
द्रोणप्रमाणे दशभागयुक्तं दत्त्वा पचेद्वीजमवल्गुजस्य ॥
एतद्यदा चिक्कणतामुपैति तदा समन्तं गुटिका विदध्यात् ।
श्वित्रं प्रलिम्पेदथ सम्प्रघृष्य तया व्रजेदाशु सवर्णभावम् ॥१६॥

काषायकल्पेन सुभावितान्तु दलत्वचं चूतहरीतकीनाम् ।
तां ताम्रदीपे प्रणिधाय धीमान् वर्त्तिं वटक्षीरसुभावितान्तु ॥

---

११ अ०" उक्तानुगमादच्छपिच्छिलत्वादिगुणवत्त्वेन सुविदिते सति चतुर्गुणेन तेन तोयेन शृतं तैलं श्वित्रापहं स्रवणम् एतदेवाग्र्यं श्रेष्ठमाहुरिति शेषः ॥ १२—१४ ॥

घृतेनेत्यादि । चतुर्थभक्ताय याम दशकमुपोषितत्वेनावाप्तचतुर्थभक्तकालाय, विशेषणस्यास्य निःसृतप्राक्तनपुरीषत्वे तात्पर्य्यम्, उत्पाचितं जलेन द्रवीकृत्य सम्यक् पाचितम्, अभ्यन्तरं गोजी पत्रादिनाऽवघृष्य शस्त्रेण विलिख्य वा अन्तरमन्तर्व्वर्त्तिमांसादिकमभिगतं यथा स्यात्तथैव प्रयोजयेदित्यर्थः । क्षार इत्यादि । लेण्डं लण्डं पुरीषमित्यनर्थान्तरम् । मूत्रेण षड्गुणेन बहुस्रुते एकविंशतिकृत्वः परिस्रुते इत्यध्यवसेयम् । सू० ११ अ०" उक्तविधिमभिसमीक्ष्य । दशभागयुक्तं दशमभागयुक्तम् अवल्गुजस्य सोमराज्या वीजं चूर्णीकृतमेव ग्राह्यम् । चिक्कणता मसृणता स्निग्ध-

आदीप्य तज्जातमसीं गृहीत्वा तास्वापि पथ्याम्भसि भावयित्वा।
संमर्च्चितं तद्बहुशः किलासं तैलेन सिक्तं कटुना प्रयाति ॥ १७ ॥
आवल्गुजं बीजमथो नदीजं काकाह्वानोडुम्बरी या च लाक्षा।
लौहं चुर्णं मागधीताप्यशैलं तुल्याः कार्य्याः कृष्णवर्णास्तिलाश्च ॥
वर्त्तिं कृत्वा तां गवां पित्तपिष्टां लेपः कार्य्यः श्वित्रिणां श्वित्रहारी।
लेपात् पित्तं शैखिनं श्वित्रहारि क्षौवेरं वा दग्धमेतेन युक्तम् ॥ १८ ॥

तेति यावत्। कषायेत्यादि। कश्चिदत्र दलसहिता त्वक् दलत्वक् तां दलत्वचमित्याचष्टे। एतत्स्वगतिकानां गतिरित्यश्रद्दधानाः "दलमुत्सेधखण्डयोः" इति कोषान्तरस्मरणात् दलत्वचं उत्सन्नां त्वचमित्याचक्षते। तथाच चूतहरीतकीनां घनां त्वचं कषायकल्पेन "भाव्यद्रव्यसमं क्वाथ्यम्" इत्याद्युक्तेन विधिना प्रकृतत्वात्तासामेव कषायेन सुभावितां सप्तकृत्वो भावितां कृत्वेति शेषः। तां दलत्वचं वर्त्तिं दीपदशाञ्चेत्यर्थः। तज्जातमसीं तद्दीपशिखासम्भूतमसीम्। संमर्च्चितं तया संयोजितम्, तत् प्रकाशं किलासमिति निष्कर्षः॥ १५—१७॥

आवल्गुजमित्यादि। नदीजं यमुनासन्निकृष्टसौवीरदेशजमञ्जनमित्यर्थः। काकाह्वानोडुम्बरी काकोडुम्बरिका शैलं शैलेयम्, शिखिन इदं शैखिनम्।

तुत्थाल-कटुका-व्योष-सिंहार्क-हयमारकाः।
कुष्ठावल्गुज-भल्लात-चोरिणी-सर्षपाः स्नुही॥
तिल्वकारिष्टपीलूनां प्रवालाश्वारवधस्य वा।
वीजं विडङ्गाश्वहन्त्रोर्हरिद्रे बृहतीद्वयम्॥
आभ्यां श्वित्राणि योगाभ्यां लेपान्नश्यन्त्यशेषतः॥ १८॥
वायसी फल्गुतिक्तानां शतं दत्त्वा पृथक् पृथक्।
द्वे लोहरजसः प्रस्थे त्रिफला त्र्याढ़कं तथा॥
त्रिद्रोणेऽपां पचेद्यावद्भागौ द्वावसनादपि।
शिष्टञ्च विपचेद्भूय एतैः श्लक्ष्णप्रपेषितैः।
कल्कैरिन्द्रयव-व्योष-त्वग्दारु-चतुरङ्गुलैः॥
पारावतपदी-दन्ती-वाकुची-केशराह्वयैः।
काण्टकार्य्या च तत्पक्वं घृतं कुष्ठिषु योजयेत्॥

लेपान्तरमुपदिशति क्षीरेरमिति। एतेन शैखिनपित्तेन। तुत्थेत्यादि। आलं हरितालम्, सिंहोरक्तशोभाञ्जनः, हयमारकः करवीरः। चोरिणी-नामौषधिः 'क्षीनो' इति प्रथयते। लेपान्तरमाशंसति तिल्वकेति। तिल्वको लोध्रः अश्वहन्ता करवीरः। वायसीत्यादि। वायसी काकमाची, फल्गुः काकोडुम्बरिका, अनयोर्मूलत्वचमेवाभिनन्दन्ति कुशलाः। तिक्ता कटुकी, आसां पृथक् पृथक् शतं पलानि, द्वे लोहरजसः प्रस्थे तथा त्रिफलाया मिलिता त्र्याढ़कम्, असनात् पीतशालादपि त्र्याढ़कं दत्त्वा अपां त्रिद्रोणे द्वौभागौ यावदवशिष्टं यावदिति निष्कर्षः। पचेदिति समन्वयः।

दोषधात्वाश्रितं पानादभ्यङ्गात् त्वग्गतं तथा ।
अप्यसाध्यं नृणां कुष्ठं नाम्ना नीलं नियच्छति ॥ २० ॥
त्रिफलात्वक् त्रिकटुका सुरसा मदयन्तिका ।
वायस्यारग्वधानाञ्च तुलां कुर्य्यात् पृथक् पृथक् ।
काकमाच्यर्कवरुणा-दन्ती-कुटज-चित्रकान् ।
दार्व्वीनिदिग्धिकाभ्यान्तु पृथग्दशपलं तथा ॥
त्रिद्रोणेऽपां पचेद्यावत् षट्प्रस्थं परिशेषितम् ।
शकृद्रसदधिक्षीरमूत्राणां पृथगाढ़कम् ॥
तद्द्घृतस्य तत् साध्यं भूनिम्बव्योषचित्रकैः ।
करञ्जफलनीलिका-श्यामावल्गुजपीलुभिः ॥
नीलिनीनिम्बकुसुमैः सिद्धं कुष्ठापहं घृतम् ।
भक्षणादङ्गसावर्ण्यं श्वित्रिणां जनयेन्नृणाम् ॥
भगन्दरं क्रमीनर्शो महानीलं नियच्छति ॥ २१ ॥

शिष्टञ्च तं क्वाथमादाय भूयोऽप्यर्थं श्लक्ष्णप्रपेषितै रेतैरनन्तरोक्तैरिन्द्रयवादिभिः कल्कैः कण्टकार्य्याच तथा प्रपेत्रितया विपचेद् घृतप्रस्थमिति तात्पर्य्यम् "अनुक्ते स्नेहमानेतु प्रस्थमात्रं प्रदीयते" इत्यनुशासनात् । अत्र पारावतपदी ज्योतिष्मती 'नैफुटकी' इत्यभिधीयते, वाकुची सोमराजी, केशराह्वो नागकेशरः । श्वित्रं नीलयति सवर्णयतीति नीलं नाम ॥ १८ —२० ॥

त्रिफलेत्यादि । मदयन्तिका वनमल्लिका, 'काठमल्लिका' इति 'बनबेली' इति चाख्यायते । शकृद्रसो गोमयस्वरसः स च द्विस्त्रिर्व्वावस्त्र पूत एव परिग्रह्यते । तद्दाढ़क मित्यर्थः । भूनिम्बादिभिः कल्कै

मूत्रं गव्यं चित्रकव्योषयुक्तं सर्पिःकुम्भे क्षौद्रयुक्तं स्थितं हि ।
पक्षादूर्द्धं श्वित्रिभिःपेयमेतत्कुर्य्याच्चास्मिन् कुष्ठदिष्टं विधानम्
॥ २२ ॥

पूतीकार्कस्नुङ्नरेन्द्रद्रुमाणां मूत्रैः पिष्टाः पल्लवाः सौमनाश्च ।
लेपःश्वित्रंहन्तिदद्रूव्रणांश्चदुष्टान्यर्शांस्येवनाड़ीव्रणांश्च ॥ २३ ॥

पक्षादूर्द्धं निःसृते दुष्टरक्ते जातप्राणं सर्पिषा स्नेहयित्वा ।
तीक्ष्णैर्योगैश्छर्दयित्वाप्रगाढ़ंपश्चाद्दोषंनिर्हरेच्चाप्रमत्तः ॥२४ ॥

दुर्व्वान्तोवा दुर्व्विरिक्तोऽथवास्यात्कुष्ठीदोषैरुद्धतैर्व्याप्तदेहः ।
निःसन्दिग्धं यात्यसाध्यत्वमाशु तस्मात् कृत्स्नान् निर्हरेत्
तस्य दोषान् ॥ २५ ॥

पक्षात्पक्षाच्छर्दनान्यभ्युपेयान्मासान्मासात्स्रंसनञ्चापिदेयम् ।
स्राव्यं रक्तं वत्सरे हि द्विरल्पं नस्यं दद्याच्च त्रिरात्रात् त्रिरा-
त्रात् ॥ २६ ॥

पथ्याव्योषं सेक्षुजातं सतैलं लीढ्वा शीघ्रं मुच्यते कुष्ठरोगात् ।

रिति शेषः। नीलिका निर्गुण्डी, नीलिनी 'नील' इति प्रसिद्धस्तस्यास्तच-मेव पाचयन्ति कुशलाः। पूतीकेत्यादि। नरेन्द्रद्रुमः सम्पाकः सुम-नाया मालत्या इमे सौमनाः। नन्वेतानि चेद्दोषप्राबल्यान्नारोग्याय कल्पन्ते तर्हि का गतिरित्याह पक्षादिति। पक्षाद्धि पञ्चोपयोगादूर्द्धं परं सप्ता-तुर्य्ये इति हृदयम्। प्राणो बलमिति पर्य्यायौ। निर्हरेद् विरेचयेत्।

धात्रीपथ्याचोपकुल्याविड़ङ्गान् चौद्राज्याभ्यामेकतो वाव-
लिह्यात् ॥
पीत्वामासं वा पलांशां हरिद्रां मूत्रेणान्तं पापरोगस्य गच्छेत् ।
एवंपेयश्चित्रकःश्लक्ष्णपिष्टःपिप्पल्योवापूर्व्ववन्मूत्रयुक्ताः ॥ २७ ॥
तद्वत्तार्च्यं मासमात्र प्रपेयंतेनाजस्रंदेहमालेपयेच्च ॥ २८ ॥
आरिष्टत्वक्सप्तपर्णौच तुल्या लाचा मुस्तं पद्ममूल्यौहरिद्रे ।
मञ्जिष्ठाचौवासको देवदारु पथ्याश्रङ्गी व्योषधात्री विड़ङ्गम् ॥
सामान्यांशंयोजयित्वाविड़ङ्गैश्चूर्णीकृत्वातत् पलोन्मानमश्नन् ।
कुष्ठाज्जन्तुर्मुच्यतेत्रैफलंवासर्पिर्द्रोणंव्योषयुक्तञ्चयुञ्जन् ॥ २९ ॥
गोमूत्राम्बुद्रोणसिद्धेऽच्चपीड़े सिद्धं सर्पिर्नाशयेच्चापि कुष्ठम् ।
आरग्वधे सप्तपर्णे पटोले सवृत्तके नक्तमाले सनिम्बे ।
जीर्णंपक्वं तद्वरिद्राद्वयेनहन्यात्कुष्ठंमुष्ककेचापिसर्पिः ॥ ३० ॥

प्रतिपक्षमतीत्येति पक्षात् पक्षात्, स्रसनं विरेचनम् । धात्रीत्यादि । उपकूल्या पिप्पली, पापरोगः कुष्ठम् । तार्च्यं रसाञ्जनम् । आरिष्टे-त्यादि । समानमेव सामान्यम् । विड़ङ्गैः समुदितचूर्णसमैरित्याहुः । त्रिफलाक्वाथकल्कसिद्धं त्रैफलम् । व्योषयुक्तं तीक्ष्णत्वादष्टांशमात्रत्रि-कटुकचूर्णनान्वितम् । युञ्जन् यथाग्निबलमित्यूह्यम् । कुष्ठान्मुच्यते इति पूर्व्वेणान्वयः ॥ २१—२९ ॥

गोमूत्रेति । अत्र "क्वाथ्याच्चतुर्गुणं वारि पादस्थं स्याच्चतुर्गुणं स्नेहात्" इत्यागमे सत्यप्यसंशयं मूत्रेणैव क्वाथोऽयं निष्पाद्यइत्यावेदयितुमिद-

रोध्रारिष्टं पद्मकं रक्तसारः सप्ताह्वाह्वौ वृक्षको बीजकाख्य ।
योज्याः स्नाने दह्यमानस्य जन्तोः पेया वा स्यात् चौद्रयुक्ता त्रिभण्डी ॥ ३१॥

खादेत्कुष्ठीमांसपातेपुराणान्मुद्गान्सिद्धान्निम्बतोयेसतैलान्।
निम्बक्काथं जातसत्त्वः पिबेद्वा क्काथं वार्कालर्कसप्तच्छदानाम् ।
जग्धेष्वङ्गेष्वश्वमारस्य मूलं लेपो युक्तः स्याद्विडङ्गैः समूत्रैः ।
मूत्रैः स्नानंसेचनेष्णोजयेच्च सर्व्वाहारान्संप्रयुक्तान्विडङ्गैः ॥ ३२ ॥

कारञ्जं वा सार्षपं वा क्षतेषु देयं तैलं शिग्रुकोशाम्रयोर्वा ।
पक्कं सर्व्वैर्वाकटूष्णैःसतिक्तैःशेषञ्चस्याद्दुष्टवत्संविधानम् ॥३३॥

सप्तपर्णकरञ्जार्क-मालतीकरवीरजम् ।

मुच्यते गोमूत्राम्बुति । गोमूत्रमेवाम्बु गोमूत्राम्बु न पुनर्द्वन्द्वः पूर्व्वनिपातस्यानिवार्य्यत्वेनाप्राप्तत्वात् । यवपीड़े यवतिक्ताक्काथे । अकल्कमिदं सर्पिः । आरग्वध इत्यादि । वृक्षकः कुटजः । अथारग्वधादीनां क्काथो हरिद्राद्वयस्य कल्कः । जीर्णं पुरातनम् । मुष्कके घण्टापारुलिक्काथे हरिद्राद्वयकल्केन चापि सिद्धं जीर्णं सर्पिः कुष्ठं हन्यादिति योजना । अरिष्टो निम्बः, रक्तसारो रक्तचन्दनम्, सप्ताह्वः सप्तपर्णः बीजको मातुलुङ्गः त्रिभण्डी त्रिवृत् । मांसपाते मांसपातावस्थायाम्, जातसत्त्वः सञ्जातक्रिमिकः । अलर्कः श्वेतार्कः । जग्धेषु क्रिमिभक्षितेषु, कोशाम्रः क्षुद्राम्रभेदः दुष्टवत् दुष्टव्रणवत् ॥ ३०—३३ ॥

स्नुहीशिरीषयोर्मूलं चित्रकास्फोतयोरपि ॥
विष-लाङ्गल-वज्राख्य-कासीसाल-मनःशिलाः।
करञ्जवीजं त्रिकटु त्रिफलां रजनीद्वयम्।
सिद्धार्थकान् विडङ्गानि प्रपुन्नाड़ञ्च संहरेत् ॥
मूत्रपिष्टैः पचेदेतैस्तैलं कुष्ठविनाशनम्।
एतद्वज्रकमभ्यङ्गान्नाड़ीदुष्टव्रणापहम् ॥ ३४ ॥
सिद्धार्थकः करञ्जौ द्वौ द्वे हरिद्रे रसाञ्जनम्।
कुटजश्च प्रपुन्नाड़सप्तपर्णौ मृगादनी ॥
लाक्षा-सर्ज्जरसोऽर्कश्च सास्फोतारग्वधौ स्नुही।
शिरीषस्तुवराख्यस्तु कुटजारुष्करी वचा ॥
कुष्ठं कृमिघ्नं मञ्जिष्ठा लाङ्गली चित्रकं तथा।
मालती कटुतुम्बी च गन्धाह्वा मूलकं तथा ॥
सैन्धवं करवीरञ्च गृहधूमं विषं तथा।
कम्पिल्लकं ससिन्दूरं तेजोह्वातुल्यकाह्वये ॥
समभागानि सर्व्वाणि कल्कपेष्याणि कारयेत्।
गोमूत्रं द्विगुणं दद्यात् तिलतैलाच्चतुर्गुणम् ॥

स्नुहीत्यादि। विषं वत्सनाभः, वज्राख्यो निष्पत्रास्नुही, अत्र पूर्व्वापर साहचर्य्यात् द्रवार्थं चतुर्गुणं मूत्रमेव ग्राहयन्त्याचार्य्याः सिद्धार्थक इत्यादि। प्रपुन्नाड़ं 'चाकुन्या' इत्यभिधीयते। मृगादनी इन्द्रवारुणी, तुवरः चि० १३ अ० निवेदयिष्यते। गन्धाह्वो गन्धकः, कम्पिल्लकं 'कमला गुड़ी' इति

कारञ्जं वा महावीर्य्यं सार्षपं वा महागुणम् ।
अभ्यङ्गात् सर्व्वकुष्ठानि गण्डमालाभगन्दरान् ॥
नाड़ीदुष्टव्रणान् घोरान् नाशयेन्नात्र संशयः ।
महावज्रकमित्येतन्नाम्ना तैलं महागुणम् ॥ ३५ ॥
पित्तावापैर्मूत्रपिष्टैस्तैलं लाक्षादिकैः कृतम् ।
संप्राह्य कटुकालाब्वां निदधीत चिकित्सकः ॥
पीतवन्तं ततो मात्रां तेनाभ्यक्तञ्च मानवम् ।
शोषयेदातपे तत्र दोषा गच्छन्ति सर्व्वशः ॥
स्रुतदोषं समुत्थाप्य स्नातं खदिरवारिणा ।
यवागूं पाययेदेनं साधितां खदिराम्बुना ॥
एवं संशोधने वर्गे कुष्ठघ्नेष्वौषधेषु च ।
कुर्य्यात् तैलानि सर्पींषि प्रदेहोद्घर्षणानि च ॥

परिचीयते । तेजोह्वा चव्यम् । तिलतैलाच्चतुर्गुणं मूत्रं द्विगुणं दद्यादे-तेनाष्टगुणं दद्यादित्यायातम् । अनेनैव विधिना कारञ्जं सार्षपं वा तैलञ्चेत् पच्यते तर्हि प्रकृष्टगुणं भवतीत्युपदिदिक्षति, कारञ्जमित्यादिना । कारञ्जं 'गोकरञ्जा' इति प्रसिद्धोऽङ्कवम् । पित्तेत्यादि । पित्तावापैः गोपित्तेनाज-पित्तेन वायुतैः, लाक्षादिभिः महावज्रकतैलाङ्गभूतैः । अत्र सन्नि-हिततैलसाहचर्य्यादद्रवार्थमष्टगुणं मूत्रं देयमित्याहुः । शोषयेत् स्वेदये-दिति तात्पर्य्यम । गच्छन्ति स्वेदरूपेण परिणम्येति शेषः । कुष्ठ-

प्रातः प्रातश्च सेवेत योगान् वैरेचनान् शुभान् ।
पञ्च षट् सप्त चाष्टौ वा यैरुत्थानं न गच्छति ॥
क्षारभं वा पिवेन्मूत्रं जीर्णे तत् क्षीरभोजनम् ।
जातसत्त्वानि कुष्ठानि मासैः षड्भिरपोहति ॥ ३६ ॥
दिहन्नुरन्तं कुष्ठघ्नं खदिरं कुष्ठपीड़ितः ।
सर्व्वथैव प्रयुञ्जीत स्नानपानाशनादिषु ॥
यथा हन्ति प्रवृद्धत्वात् कुष्ठमातुरमोजसा ।
तथा हन्त्युपयुक्तस्तु खदिरः कुष्ठमोजसा ॥ ३७ ॥
नीचरोमनखः श्रान्तो हिताश्यौषधतत्परः ।
योषिन्मांससुरावर्ज्जी कुष्ठी कुष्ठमपोहति ॥ ३८ ॥

घ्नेष्वौषधेषु निम्बादिष्वित्यर्थः । पञ्चेत्यादौ वा ऽर्थमाचक्षाणे च शब्दे सत्यपि पुनर्व्वाशब्देनार्थान्तरमाख्यापयतीति गम्यते तथाचातोऽधिकैरपि यैर्यावद्भि-र्व्विरेचनैरुत्थानमुद्भवं न गच्छति कुष्ठमिति सन्दर्भस्तावद्वैरेचनान् योगान् सेवेतेति निष्कर्षः । क्षारभं हास्तिनम् । क्षीरभोजनमिति विशेषणं जीर्णावस्थायां क्षीरान्नं भोजयितुमित्यत्रधेयम् । 'जीर्णे तन्मूत्रं व्यपोह-तीति सम्बन्धः । खदिरं स्तौति यथेति । नीचरोमनखः कृत्तरोम-नखः । औषधतत्परः यथावदौषधोपयोगपरायणः, श्रान्तोजितेन्द्रिय इति हेमचन्द्रः परिशिष्टं निगदव्याख्यातम् ॥ १४—३८ ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने-
कुष्ठचिकित्सितं नाम
नवमोऽध्यायः ॥ ९ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
चिकित्सितस्थाने कुष्ठचिकित्सितं नाम नवमोऽध्याय ।

दशमोऽध्यायः ।

अथातो महाकुष्ठचिकित्सितं व्याख्यास्यामः ॥ १ ॥

न तावत् पूर्व्वाध्यायोपदिष्टेन कुष्ठसामान्यचिकित्सितेन महाकुष्ठानि नामैकान्ततः प्रशान्तिमापद्यन्ते तदिदानीं तानि प्रकृत्य किञ्चिदधिकमर्थमुपदेष्टुं महाकुष्ठचिकित्सितमधिकरोति अथात इत्यादिना । एवञ्च चिकित्सितशब्दोऽयमविशेषप्रयुक्तोऽपि विशिष्टत्वेनावश्यं विशेषणीयः, तथाच महाकुष्ठानां विशिष्टं चिकित्सितं महाकुष्ठचिकित्सितमिति वाक्यार्थः । नन्वपार्थकोऽयं पृथगारम्भो भेषजानामेषां क्षुद्रकुष्ठेष्वप्युपयोगदर्शनादिति चेत्, उच्यते न तावदपार्थकः, भेषजान्तरासाध्यत्वेन महाकुष्ठानिदिष्टेष्वेव क्षुद्रकुष्ठेषूपयोगात् । एतेनैतदेवायातं भवति, यदिहि पृथक्त्वेनेममनारभ्य भेषजानीमानि तत्रैवोपदिश्यन्ते तर्हि महाकुष्ठवत् क्षुद्रकुष्ठेष्वप्यादित एव भेषजानामेषामुपयोगः प्रसज्येत, तत्तु नेष्यते समामनन्ति हि "स्वल्पे गदे महत्कार्य्यं क्रिया लघ्वी महागदे । इयमेतदकौशल्यं कौशल्यं युक्ति

कुष्ठेषु मेहेषु कफामयेषु सर्व्वाङ्गशोफेषु च दारुणेषु ।
क्रशत्वमिच्छत्सु च मेदुरेषु योगानिमानयामतिर्विदध्यात् ॥२॥

क्षुण्णान् यवान् निःपूतान् रात्रौ गोमूत्रपर्य्युषितान् महति किलिञ्जे शोषयेत्, एवं सप्तरात्रं भावयेत् शोषयेच्च। ततस्तान् कपालभृष्टान् शक्तून् कारयित्वा प्रातः प्रातरेव कुष्ठिनं प्रमेहिणं वा शालसारादिकषायेण कण्टकिवृक्षकषायेण वा पाययेत भल्लातकप्रपुन्नाड़ावल्गुजार्कचित्रकविड़ङ्गमुस्तचूर्णचतुर्भागयुक्तान्। एवमेव शालसारादिकषायपरिपीतानामारग्वधादिकषायपरिपीतानां वा गोशकृद्गतानां वा यवानां शक्तून् कारयित्वा भल्लातकादीनां चूर्णान्यावाप्य खदिरासननिम्बराजवृक्षरोहितकगुड़ूचीनामन्यतमस्य कषायेण शर्करामधुमधुरेण द्राक्षायुक्तेन दाड़ि-

---

पूर्व्वतः" इति। अथात्र महाकुष्ठानि प्रकृत्य चिकित्सितस्योपन्यासात् प्रागुक्तं कुष्ठचिकित्सितं क्षुद्रकुष्ठविषयत्वेनैवाध्यवसातुं न्याय्यं न पुनः कुष्ठसामान्यत्वेनेति "यदग्रे सन्दिग्धं तच्छेषात्निर्णीयते" इति न्यायादेवचेत् कश्चिद्राजिह्मीर्षेत्तर्हि इदं तावत् स देवानां प्रियः प्रष्टव्यः किन्नु खलु त्वं महाकुष्ठेष्वेकान्तेनौपयौगिकमपि तत्रोक्तं संशोधनादिकमतानुक्तत्वादनौपयौगिकमाचक्षाणआत्मनो भिषक्छद्मचरत्वं व्यक्तमाख्यापयन् गन्धमात्रेणापि न जिह्रेषि? ॥१॥

कुष्ठेष्वित्यादि। अत्र मेहादीनामुपदेशः प्रासङ्गिकः। क्षुण्णा दलिताः, निःपूतास्तुषादि विरहिताः। किलिञ्जः कटः, काष्ठफलकं वा। शालसारादिः 'सू० ३८ अ०' द्रष्टव्यः। कण्टकिवृक्षाश्चिह खदिर विकङ्कता-

मवेतसाम्लेन सैन्धवलवणान्वितेन पाययेत् । एष सर्व्व-मन्थकल्पः ॥ ३ ॥

यावकांश्च भक्ष्यान् धानालुञ्चक-कुल्माषापूप-पूर्णकोशोत्-कारिका-शष्कुलिका-कुणावी-कोणालिप्रभृतीन् सेवेत ॥ ४ ॥

यवविधानेन गोधूमवेणुयवानुपयुञ्जीत ॥ ५ ॥

अरिष्टानतोवक्ष्यामः । पूतीक-चव्य-चित्रक-सुरदारु-सारिवा-दन्ती-त्रिकटुकानां प्रत्येकं षट् पलिका भागा बदर-कुडवस्त्रिफलाकुडव इत्येतेषां चूर्णानि; ततः पिप्पली-मधुघृतैरन्तःप्रलिप्ते घृतभाजने प्राक्कृतसंस्कारे सप्तोदक-कुडवानयोरजोऽर्द्धकुडवमर्द्धतुलाञ्च गुडस्याभिहितानि चूर्णा-न्यावाप्य स्वनुगुप्तं कृत्वा यवपल्ले सप्तरात्रं वासयेत्, ततो यथाबलमुपयुञ्जीत । एषोऽरिष्टः कुष्ठमेहमेदःपाण्डु-

---

दयः करमर्द्दादयश्च प्रत्येतव्याः । चतुर्णां भागानामेकोभागश्चतुर्भागः, परि-पीतानां भावितानाम्, गोशकृत्कृतानां गोभिरत्तुवभक्षितत्वेनापरिणतगोमय रूपाणाम् । भल्लातकादीनामिष्टोक्तानां चूर्णानि चतुर्थभागानीति नैयम् प्रागुक्तसाहचर्य्यात् । रोहितकः 'पीतराज' इति प्रसिद्धः । सर्व्वेषां गोधूमा-दीनां मन्थः सर्व्वमन्थः । यावकानित्यादि । धानालुञ्चकादयो भक्ष्यप्रकारा स्तत्र धानालुञ्चकं भृष्टयवचूर्णम्, कुल्माषा इहार्द्धस्विन्नायवाः शेषास्तु पिष्टकभेदाः । वेणुयवो वंशवीजम् । अरिष्टानित्यादि । चूर्णानि कुर्य्यादिति शेषः । संस्कारः प्रतियत्नः प्रक्षालनादिना निर्म्मलीकरण-मित्येतत । अभिहितानि पूतीकेत्यादिनोक्तानि, यवपल्ले यवानां कुशूले

रोगग्रवयथूनपहन्ति। एवं शालसारादौ न्यग्रोधादावारग्वधादौ वारिष्टान् कुर्वीत ॥ ६ ॥

आसवानतोवच्यामः। पलाशभस्मपरिस्रुतस्योष्णोदकस्य शीतीभूतस्य त्रयोभागाः, द्वौ फाणितस्य, ऐकध्यमरिष्टकल्पेन विदध्यात्। एवं तिलादीनां चारेषु शालसारादौ न्यग्रोधादावारग्वधादौ मूत्रेषु चासवान् निदध्यात् ॥ ७ ॥

अथ सुरा वच्यामः। शिशंपाखदिरयोः सारमादाय उत्पीड्य चोत्तमारणीब्राह्मीकोशातकीस्तत् सर्व्वमेकतः कषायकल्पेन विपाच्योदकमाददीत मण्डोदकार्थं किण्वपिष्टमभिषुणुयाच्च यथोक्तं, एवं सुराः शालसारादौ न्यग्रोधादावारग्वधादौ च विदध्यात् ॥ ८ ॥

महति स्थापनस्थान इति यावत्। एवमित्यादि। अत्रैषां क्वाथा एवोदकार्थे नेयाः ॥ २—६ ॥

आसवानित्यादि। आसवोनाम "सीधुरिक्षुरसैः पक्वैरपक्वैरासवो भवेत्" इति माधवीयस्मरणात् असम्यक् पक्वेक्षुरसप्रधानो मद्यविशेषः, अरिष्टन्तु दन्तीचित्रकाद्यनेकविधक्वाथचूर्णानुविद्ध इत्यनयोर्भेदः। ऐकध्यमेकीकृत्येत्यर्थः। अत्र अधिकरण विचालेच इति 'पा० सू० ५।३।४३' विहितस्य धाप्रत्ययस्य ध्यमुञ्। अरिष्टकल्पेनेत्यनेन यवपल्ले सप्तरात्रमित्यतिदिश्यते। सम्प्रति पलाशभस्मोदकं हित्वान्यथासवानुपदिदिक्षति एवमिति। चारेषु चारोदकेषु, शालसारादीनाञ्च त्रयाणां क्वाथेष्विति नेयम्।

अतोऽवलेहान् वक्ष्यामः । खदिरासन-निम्ब-राजवृक्ष-शाल-सारक्वाथे तत्सारपिण्डान् श्लक्ष्णपिष्टान् प्रक्षिप्य विपचेत्, ततो नातिद्रवं नातिसान्द्रमवतार्य्य तस्य पाणितलपूर्णमप्रातराशो मधुमिश्रं लिह्यात्। एवं शालसारादौ न्यग्रोधादावारग्वधादौ च लेहान् कारयेत् ॥ ९ ॥

अतश्चूर्णक्रियां वक्ष्यामः। शालसारादीनां सारचूर्णप्रस्थमाहृत्यारग्वधादिकषायपरिपीतमनेकशः शालसारादिकषायेणैव पाययेत् । एवं न्यग्रोधादीनां फलेषु, पुष्पेषु चारग्वधादीनां. चूर्णक्रियां कारयेत् ॥ १० ॥

अथेत्यादि । शिशपा नामौषधिः 'शिशु' इत्यभिधीयते । उत्पीड्य संक्षुद्य उत्तमारणी इन्दीवरी, मण्डोदकार्थं सुरोदकार्थम्, "मण्डा सुरा" इति हारावली । षट्कं तं कषायमाददीत । यथोक्तं 'सू० ४४ अ०' उक्तानुरूपम्, किण्वपिष्टपदेनेह सुराबीजमिश्रितं तदुदकसाधितं शालितण्डुलचूर्णं मुच्यते तच्चाभिषुण्यात् षुञ् अभिषवे इति धात्वर्थस्मरणात् सुरार्थं सन्दध्यात् तेनोदकेनेति शेषः । शेषं समानम् । अत इत्यादि । स्मर्य्यते हि "कठिनात् कठिनं यच्च तत्र षोड़शिकं जलम्" इति तदेवं ब्रूमः, खदिरादीनां प्रत्येकशः शरावं गृहीत्वा जलपञ्चाढ़केऽष्टांशशेषं क्वाथयेत् ततो वस्त्रपूतं कृत्वा पुनः पाकेन घनीभूते तस्मिन् शरावसम्मितं श्लक्ष्णपिष्टं खदिरादिसारपिण्डं प्रक्षिप्य यथोपदेशं विपचेदिति । पाणितलं पूरितमनेनेति पाणितलपूर्णं पाणितलप्रपूरक मित्येतत् । अप्रातराशोऽकृतप्रातराहारः ॥ ७—१० ॥

अत ऊर्द्ध्वमयस्कृतीर्वक्ष्यामः। तीक्ष्णलौहपत्राणि तनूनि लवणवर्गप्रदिग्धानि गोमयाग्निप्रतप्तानि त्रिफलाशालसारादिकषायेण निर्व्वापयेत् षोड़शवारान्, ततः खदिराङ्गारतप्तान्युपशान्ततापानि सूक्ष्मचूर्णानि कारयेद्गाढ़तान्तवपरिस्रावितानि, ततो यथाबलं मात्रां सर्पिर्मधुभ्यां संसृज्योपयुञ्जीत। जीर्णे यथाव्याध्यनम्लमलवणमाहारं कुर्व्वीत। एवं तुलामुपयुज्य कुष्ठमेहमेदःश्वयथुपाण्डुरोगोन्मादापस्मारानपहृत्य वर्षशतं जीवति। तुलायां तुलायां वर्षशतगुणोत्कर्षः॥ ११॥

एतेन सर्व्वलोहेष्वयस्कृतयो व्याख्याताः॥ १२॥

त्रिवृच्छ्यामाग्निमन्थसप्तलाकेवुकशङ्खिनीतिल्वकत्रिफलापलाशशिंशपानां स्वरसमादाय पालाश्यां द्रोण्यामभ्यासिच्य खदिराङ्गारतप्तमयःपिण्डं त्रिसप्तकृत्वो निर्व्वाप्य तमादाय पुनरासिच्य स्थाल्यां गोमयाग्निना विपचेत्। ततश्चतुर्थभागावशिष्टमवतार्य्य परिस्राव्य भूयोऽग्नितप्तान्ययःपत्राणि

अत इत्यादि। लवणवर्गः "सू० ४६ अ०" द्रष्टव्यः निर्व्वापयेत् शस्त्रपायनान्यायेन सद्यः शीतीकुर्य्यात्। गाढ़तान्तवं दृढ़वस्त्रम्। वर्षशतगुणोत्कर्षो वर्षशतमायुः, स्तुतिरेषायस्कृतेर्वीर्य्यवत्तामाख्यापयति। लोहेषु धातुषु "सर्व्वं स्यात्तैजसं लोहम्" इत्यमरः। त्रिवृदित्यादि। केवुकः 'केँउ' इति प्रसिद्धः। स्वरसं द्रोणमितमित्याहुः। अभ्यासिच्य निक्षिप्य,

प्रक्षिपेत् । सिध्यति चास्मिन् पिप्पल्यादिचूर्णभागौ द्वौ द्वौ मधुनस्तावद्घृतस्यापि दद्यात् । ततः प्रशान्तमायसे पात्रे स्वनुगुप्तं निदध्यात् । ततो यथायोगं शुक्तिं प्रकुञ्चञ्चोपयुञ्जीत, जीर्णे यथाव्याध्याहारमुपसेवेत । एषौषधायस्कृतिरसाध्यं कुष्ठं प्रमेहं वा साधयति, स्थूलमपकर्षति, शोफमुपहन्ति, सन्नमग्निमुद्धरति, विशेषेण चोपदिश्यते राजयक्ष्मिणां, वर्षशतायुश्चानया पुरुषो भवति ॥ १३ ॥

शालसारादिक्वाथमासिच्य पालाश्यां द्रोण्यामयोघनं तप्तं निर्व्वाप्य कृतसंस्कारे कलसेऽभ्यासिच्य पिप्पल्यादिचूर्णभागं क्षौद्रं गुड़मिति च दत्त्वा स्वनुगुप्तं निदध्यात् । एतां महौषधायस्कृतिं मासमर्द्धं मासं वा स्थितां यथाबलमुपयुञ्जीत । एवं न्यग्रोधादावारेवतादिषु च विदध्यात् ॥ १४ ॥

अयाय:पिण्डं द्विप्रस्थमेव ग्राहयन्ति भिषजः स्वरसप्रमाणमभिसमीक्ष्य । तं स्वरसम् । सिध्यत्यष्टमांशावशिष्टत्वेन घनीभवति चास्मिन् स्वरसे पिप्पल्यादिः सू० ३८ अ० उक्तस्तस्य द्वौ भागौ शिष्टांशस्य तुरीयावंशावित्याहुस्तेन शरावचतुष्टयं देयमित्यायातम् । अत्राविशेषेऽपि शीतीभूत एव मधु देयम्, स्मरन्ति हि "उष्णै विरुध्यते सर्व्वं विषान्वयतयामधु ।" इति । शुक्तिरर्द्धपलम् । प्रकुञ्चन्तु पलम् । शालेत्यादि । अयांसि हन्यतेऽनेनेत्ययोघनो मुषलं लौहपिण्डमिति तात्पर्य्यम् । महौषधायस्कृतिं वीर्य्यवदौषधविशेषायस्कृतिमित्यर्थः । स्थितामायसे पात्रे सुनिगुप्तं निहितामित्यर्थः । शालसारादि क्वाथं हित्वान्यथायस्कृतौ चिकीर्षति एवमिति ॥ ॥ ११—१४ ॥

अतः खदिरविधानमुपदेक्ष्यामः। प्रशस्तदेशजातमनुपहतमध्यमवयस्कं खदिरं परितः खानयित्वा मध्यममूलं छित्त्वायोमयं कुम्भं तस्मिन्नन्तरे निदध्याद्यथा रसग्रहणसमर्थो भवति। ततस्तं गोमयमृदावलिप्तमवकीर्य्येन्धनैर्गोमयमिश्रैरादीपयेत् यथास्य दह्यमानस्य रसः स्रवत्यधस्तात्। यदा जानीयात् पूर्णं भाजनमित्यथैवमुद्धृत्य परिस्राव्य रसमन्यस्मिन् पात्रे निधायानुगुप्तं निदध्यात्। ततो यथायोगं मात्रामामलकरसमधुसर्पिर्भिः संसृज्योपयुञ्जीत, जीर्णे भल्लातकविधानवदाहारः परिहारश्च। प्रस्थे चोपयुक्ते शतं वर्षाणामायुषोऽभिवृद्धिर्भवति॥ १५॥

खदिरसारतुलामुदकद्रोणे विपाच्य षोड़शांशावशिष्टमवतार्य्यानुगुप्तं निदध्यात्। तमामलकरसमधुसर्पिर्भिः संसृज्योपयुञ्जीत। एष एव सर्व्ववृक्षसारेषु कल्पः॥ १६॥

खदिरसारचूर्णतुलां खदिरसारक्काथमात्रां वा प्रातः प्रातरुपसेवेत, खदिरसारक्काथसिद्धमाविकं वा सर्पिः। अमृत-

---

अत इत्यादि। अन्तरे गर्त्ते, निदध्यादामुखात् मृत्तिकयाच्छाद्य स्थापयेदिति सन्दर्भः। गोमयमृदावलिप्तं गोमयमिश्रया मृदा अङ्गुलोत्सेधमवलिप्तं तं कुम्भं गोमयमिश्रैः करीषमिश्रैरिन्धनैरवकीर्य्य परिवेष्ट्यादीपयेत् सम्यग्ज्वालयेदित्यर्थः। शेषमतिरोहितार्थम्। खदिरेत्यादि। निदध्यादायसे भाजन इति बोध्यमयस्कृत्यधिकारात्। सर्व्वसारेष्विति। सर्व्वशब्देनेह शालागुर्व्वसनादय एवाभिप्रेयन्ते कुष्ठोपयोगितया तेषामेवोप-

वल्लीस्वरसं क्वाथं वा तत्सिद्धं वा सर्पिः प्रातःप्रातरुपसेवेत, अपराह्णे ससर्पिष्कमोदनमामलकयूषेण भुञ्जीत। एवं मासमुपयुज्य सर्व्वकुष्ठैर्विमुच्यत इति ॥ १७ ॥

कृष्णतिलभल्लातकतैलामलकरससर्पिषां द्रोणं शालसारादिकषायस्य च, त्रिफलात्रिकटुकपरूषफलमज्जविडङ्गफलसारचित्रकावल्गुजहरिद्राद्वयत्रिवृद्दन्तीन्द्रयव-यष्टीमधुकातिविषारसाञ्जनप्रियङ्गूणां पलिकान् भागान्, तानैकध्यं स्नेहपाकविधानेन पचेत्। तत् साधु सुसिद्धमवतार्य्य परिस्राव्यानुगुप्तं निदध्यात्। तत उपसंस्कृतशरीरः प्रातःप्रातरुत्थाय पाणिशुक्तिमात्रं क्षौद्रेण प्रतिसंसृज्योपयुञ्जीत, जीर्णे मुद्गामलकयूषेणालवणेन सर्पिष्मन्तं खदिरोदकसिद्धं मृद्वोदनमश्नीयात्। खदिरोदकसेवी स्यादेवं द्रोणमुपयुज्य सर्व्वकुष्ठैर्विमुक्तः शुद्धतनुः स्मृतिमान् वर्षशतायुररोगी भवति ॥ १८ ॥

योगात्। खदिरेत्यादि। पूर्व्वं हि आचार्य्येण खदिरसारचूर्णक्वाथौ कुष्ठहरत्वेन दृष्टावनन्तरञ्च अमृतवल्लीस्वरसादिकान्यपि कुष्ठं घ्नन्तीति दिदृक्ष्यते प्रातः प्रातरुपसेवेतेति। कृष्णेत्यादि। अत्र द्रोणशब्दः प्रत्येकशः कृष्णतिलभल्लातकतैलादिभिः सम्बध्यते इतरेतरनिर्द्देशात्, न तावत्तथात्वे स्नेहापेक्षया रसक्वाथयो रल्पत्वमाशङ्कनीयं निर्द्देशसामर्थ्यात् शालसारादिकषायस्य च द्रोणमिति सम्बन्धः। ऐकध्यमेकीकृत्य, उपसंस्कृतशरीरः वमनादिना संशुद्धशरीरः, पाणिः कर्षस्तन्मात्रं शुक्तिमात्रं वेति पाणिशुक्ति-

भवति चात्र ।

सुरामन्थासवारिष्टान्लेहांश्चूर्णान्ययस्कृतीः ।
सहस्रशोऽपि कुर्व्वीत बीजेनानेन बुद्धिमान् ॥ १८ ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने
महाकुष्ठचिकित्सितं नाम
दशमोऽध्यायः ॥ १० ॥

मात्र' बलाबलादिविशेषापेक्षोऽयं मात्राविकल्पः प्रतिपत्तव्यः । परिशिष्ट' निगदव्याख्यातम् ॥ १५—१८ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये चिकित्सितस्थाने महाकुष्ठचिकित्सितं नाम दशमोऽध्यायः ।

एकादशोऽध्यायः ।

अथातः प्रमेहचिकित्सितं व्याख्यास्यामः ॥ १ ॥

द्वौ प्रमेहौ सहजोऽपथ्यनिमित्तश्च भवतः । तत्र सहजो मातृपितृबीजदोषकृतः । अहिताहारजोऽपथ्यनिमित्तः ।

क्रमागतत्वादिदानीं प्रमेहचिकित्सितमधिकरोति अथात इत्यादिना ॥ १ ॥

तयोः पूर्व्वेणोपद्रुतः कृशो रूक्षोऽल्पाशी पिपासुर्भृशं परिसरणशीलश्च भवति । उत्तरेण स्थूलो बह्वाशी स्निग्धः शय्यासनस्वप्नशीलः प्रायेणेति । तत्र कृशमन्नपानप्रतिसंस्कृताभिः क्रियाभिश्चिकित्सेत्, स्थूलमपतर्पणयुक्ताभिः ॥ २ ॥

सर्व्व एव च परिहरेयुः सौवीरक-तुषोदक-शुक्त-मैरेय-सुरासव-तोय-पयस्तैल-घृतेक्षुविकार-दधि-पिष्टान्नाम्लपानकानि ग्राम्यानूपौदकमांसानि चेति ॥ ३ ॥

ततः शालि-षष्टिक-यव-गोधूम-कोद्रवोद्दालकाननवान् भुञ्जीत चणकाढ़की-कुलत्थ-मुद्गविकल्पेन, तिक्तकषायाभ्यां शाकगणाभ्यां निकुम्भेङ्गुदीसर्षपातसीतैलसिद्धाभ्यां ; वद्धमूत्रो वा जाङ्गलैर्मांसैरपहृतमेदोभिरनम्लैरघृतैश्चेति ॥ ४ ॥

तत्रादित एव प्रमेहिणं स्निग्धमन्यतमेन तैलेन प्रियङ्ग्वादिसिद्धेन वा घृतेन वामयेत् प्रगाढ़ं विरेचयेच्च । विरेचनादनन्तरं सुरसादिकषायेणास्थापयेन्महौषधभद्रदारुमुस्तावापेन

द्वाविति । भृशं परिसरणशीलश्चञ्चलः । कार्श्यप्रतियोगिभिश्चतुर्व्विधैराहारैः सम्यग् युक्तत्वेन प्रशस्ताभिरन्नपानप्रतिसंस्कृताभिः । "संस्कृतः कृत्रिमे शस्ते" इति मेदिनी । सौवीरकादयः सू० ४५ अ० द्रष्टव्याः । शाकं हि दशविधमित्यवोचाम तदिदमुपपन्नं भवति शाकगणाभ्यामिति । निकुम्भो दन्ती ॥ २—४ ॥

तत्रेत्यादि । अन्यतमेनेति सन्निहितत्वान्निकुम्भादीनामित्येव । प्रिय-

मधुसैन्धवयुक्तेन ; दह्यमानश्च न्यग्रोधादिकषायेण निःस्नेहेन। ततः शुद्धदेहमामलकरसेन हरिद्रां मधुसंयुतां पाययेत्। त्रिफलाविशालादेवदारुमुस्तकषायं वा शालकम्पिल्लकमुष्कक-कल्कमक्षमात्रं वा मधुमधुरमामलकरसेन हरिद्रायुतम्। कुटजकपित्थरोहितकविभीतकसप्तपर्णपुष्पकल्कं वा। निम्बारग्वधसप्तपर्णमूर्व्वाकुटजसोमवृक्षपलाशानां वा त्वक्पत्रमूलफलपुष्पकषायाणि। एते पञ्च प्रयोगाः सर्व्वमेहानामपहन्तारो व्याख्याताः ॥ ५ ॥

विशेषतस्त्वात ऊर्द्धम्। तत्रोदकमेहिनं पारिजातकषायं पाययेत्। इक्षुमेहिणं वैजयन्तीकषायम्। सुरामेहिणं निम्बकषायम्। सिकतामेहिनं चित्रककषायम्। शनैर्मेहिणं खदिरकषायम्। लवणमेहिनं पाठागुरुकषायम्। पिष्टमेहिनं हरिद्रादारुहरिद्राकषायम्। सान्द्रमेहिणं सप्तपर्णकषायम्। शुक्रमेहिणं दूर्व्वा-शैवल-प्लव-हठ-करञ्ज-कशेरुकाकषायं ककुभचन्दनकषायं वा। फेनमेहिनं त्रिफलारग्वधमृद्वीका-

---

क्ष्वादिः सू० ३८ अ० लक्षणीयः। घृतेन वा स्निग्धमित्यन्वयः। प्रमाढ़मत्यर्थंतरं वामयेत् विरेचयेच्च मदनफलादिना त्रिवृदादिना चेति शेषः। निम्बेत्यादि। सोमवृक्षोनामौषधिः 'काँटा वाबला' इति प्रथते। एत आमलकरसेनेत्यादिनोक्ताः। विशेषतः इत्यादि। पारिजातः पारिभद्रः वैजयन्ती जयन्ती, शैवलः शैवालः, प्लवं कैवर्त्तमुस्तकम्, हठः कुम्भीका

कषायं मधुरं, कफजे तु मधुमधुरमिति। पैत्तिकेषु नीलमेहिनं शालसारादिकषायमश्वत्थकषायं वा पाययेत्। हरिद्रामेहिणं राजवृक्षकषायम्। अम्लमेहिनं न्यग्रोधादिकषायं मधुमिश्रम्। क्षारमेहिणं त्रिफलाकषायम्। मञ्जिष्ठामेहिनं मञ्जिष्ठाचन्दनकषायम्। शोणितमेहिनं गुडूचीतिन्दुकास्थिकाश्मर्य्यखर्ज्जुरकषायं मधुमिश्रम्॥ ६॥

अत ऊर्द्धमसाध्येष्वपि योगान् यापनार्थं वक्ष्यामः। तद्यथा-सर्पिर्मेहिणं कुष्ठकुटजपाठाहिङ्गुकटुरोहिणीकल्कं गुडूचीचित्रककषायेण पाययेत्। वसामेहिनमग्निमन्थकषायं शिंशपाकषायं वा। क्षौद्रमेहिणं खदिरक्रमुककषायम्। हस्तिमेहिनं तिन्दुककपित्थशिरीषपलाशपाठामूर्व्वादुःस्पर्शाकषायं मधुमिश्रं, हस्त्यश्वशूकरखरोष्ट्रास्थिक्षारञ्चेति। दह्यमानमौदककन्दक्वाथसिद्धां यवागूं क्षीरेक्षुरसमधुरां पाययेत्॥ ७॥

'पामा' इत्याख्यायते। ककुभोऽर्ज्जुनः, मधुरमिति सन्निहितेन त्रिफलादिकषायेण सम्बध्यते। मधुरं मधुना मधुरीकृतम्। पक्षान्तरमवतारयति कफजे इति। वाशब्दस्थानसंश्रयोऽयं तुशब्दः। कफजे कफजप्रमेहसमूहे वा मधुमधुरं सर्व्वमेवेति नेयम्। पित्तजेष्विति। तिन्दुकोनाम 'गाव' इत्यभिधीयते। औदककन्दानि शालूकादीनि॥ ५—६॥

अत इत्यादि। अग्निमन्थो गणिकारिका। क्रमुकं गुवाकमूलम्, शिंशपा नाम वङ्गेषु 'शिशु' इति प्रथते। अनन्ता अनन्तमूलम्, पथ्या, भार्गी,

ततः प्रियङ्ग्वनन्ता-यूथिका-पद्मा-त्रायन्तिका-लोहितिकाम्ब-ष्ठादाड़िमत्वक्-शालपर्णी-पद्म-तुङ्ग-केशर-धातकी-वकुल-शाल्म-ली-श्रीवेष्टक-मोचरसेष्वरिष्टानयस्कृतीर्लेहानासवांश्च कुर्व्वीत । शृङ्गाटक-गिलोड्य--मृणाल--कशेरुक--मधुकाम्रजम्ब्वसन--ति-निश-ककुभ-कट्वङ्ग-रोध्र-भल्लातक-चर्म्मिवृक्ष-गिरिकर्णिका-शी-तशिर-निचुल-दाड़िमाजकर्ण-हरिवृक्ष--राजादन--गोपघण्टा-विकङ्कतेषु वा यवान्नविकारांश्च सेवेत । यथोक्तकषायसिद्धा-श्चास्मै यवागूं प्रयच्छेत्, कषायाणि वा पातुम् । महाधनम-हिताहारमौषधद्वेषिणमीश्वरं वा पाठाभयाचित्रकप्रगाढ़मन-ल्पमाक्षिकमन्यतममासवं पाययेत्, अङ्गारशूल्यावदंशं वा माध्वीकमभीक्ष्णम् । मधुकपित्थमरिचानुविद्धानि चास्मै पानान्युपहरेत् ॥ ८ ॥

लोहितिका वराहक्रान्ता मञ्जिष्ठेति केचित् । अम्बष्ठा ब्राह्मी, तुङ्गः पुन्नागः पुरीप्रदेशे "पुनां" इत्यभिधीयते । केशरो नागकेशरः, श्रीवेष्टको गुग्गुलुः, अरिष्टादीन् कुर्व्वीत महाकुष्ठोक्तमरिष्टादिविधिमभिसमीक्ष्येत्याकूतम् । एते-ष्वेतदेवावधेयम् अरिष्टे कर्त्तव्ये एषां षट्पलिकाभागाः, आसवे एषां क्वाथस्य शीतीभूतस्य त्रयोभागाः, अयस्कृतावेषां निर्व्वापणीयः क्वाथो लेहे चैषामेव क्वाथावापावादेयौ । शृङ्गाटकेत्यादि । गिलोड्य "तालमाखना-" इति प्रसिद्धं जलजफलम् । तिनिशो नाम मथुरादौ तिनाश इत्याख्यायते । ककुभोऽर्ज्जुनः, कट्वङ्गः श्योनाकः, चर्म्मिवृक्षो भूर्ज्जवृक्षः, शितशिरोऽत्र मधु-रिका, निचुलो हिज्जलः, अजकर्णः शालभेदः, हरिवृक्षो दारुहरिद्रा, राजा-

उष्ट्राश्वतरखरपुरीषचूर्णानि चास्मै दद्यादशनेषु। हिङ्गु-सैन्धवयुक्तैर्यूषैः सार्षपैश्च रागैर्भोजयेत्॥ ९॥

अविरुद्धानि चास्मै पानभोजनान्युपहरेद्रसवन्ति॥ १०॥

प्रहृष्टमेहास्तु व्यायामनियुद्धक्रीडागजतुरगरथपदातिचर्य्या-परिक्रमणान्यस्त्रोपास्त्रे वा सेवेरन्॥ ११॥

अधनस्त्वबान्धवो वा पादत्राणातपत्रविरहितो भैक्ष्याशी ग्रामैकरात्रानुवासी मुनिरिव संयतात्मा योजनशतमधिकं वा गच्छेत्। महाधनो वा श्यामाकनीवारवृत्तिरामलक-कपित्थतिन्दुकाश्मन्तकफलाहारो मृगैः सह वसेत् तन्मूत्र-शकृद्वृत्ती सततमनुव्रजेद्गाम्। ब्राह्मणो वा शीलोञ्छवृत्ति-र्भूत्वा ब्रह्मरथमुपधारयेत्, पठेत् सततम्। इतरः खनेद्वा कूपम्। क्षयन्तु सततं रक्षेत्॥ १२॥

द्रुमः पियालः, गोपघण्टा वन्यक्षुद्रबदरः, विकङ्कतस्तु “बैंच” इत्यभिधीयते। शूलाकृतं मांसं यथानुगुणसर्व्वपद्रव्यमवेत्यङ्गारशूल्यावदंशम्॥ ७—८॥

उष्ट्रेत्यादि। रागैरनुरागसाधनैः ‘चाट्नी’ इति प्रसिद्धैश्चिकरैरिति यावत्। प्रहृष्टेत्यादि। नियुद्धं बाहुयुद्धम्। उपमितमस्त्रेणेत्युपास्त्रं गदादि। सेवेरन् खेदेन दोषानपनेतुमित्यभिसन्धिः। न तावद्धनेन बान्धवैर्वा परिहीना कथमपि विधिनानेन प्रतिकर्त्तुं शक्नुवन्तीति तान् प्रति विधि-माह अधन इति। अत्र पादत्राणेत्यादि विशेषणं भेद आदि चयकरत्वाना-शुपपन्नम्। ब्रह्मणस्तुरीयस्वरत्र; शरीरं ब्रह्मरथः “शरीरं रथमेवच” इति

भवति चात्र ।

अधनो वैद्यसन्देशादेवं कुर्व्वन्नतन्द्रितः ।
संवत्सरादन्तराद्वा प्रमेहात् प्रतिमुच्यते ॥ १३ ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने-
प्रमेहचिकित्सितं नाम
नामैकादशोऽध्यायः ॥ ११ ॥

भगवद्गीता । तथाच "वाग्वैब्रह्म" इति श्रवणाद् वेदा इति निष्कर्षः । परिशिष्टं निगदव्याख्यातम् ॥ ८—१२ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये चिकित्सितस्थाने प्रमेहचिकित्सितं नामैकादशोऽध्यायः ।

द्वादशोऽध्यायः ।

अथातः प्रमेहपिड़काचिकित्सितं व्याख्यास्यामः ॥ १ ॥

प्रमेहिणएव तस्यां तस्यामवस्थायां पिड़का जायन्ते • इत्युपादिष्टत्तदिदानीं तासां चिकित्सितमधिकरोति अथात इत्यादिना ॥ १ ॥

शराविकाद्या नव पिड़काः प्रागुक्ताः। ताः प्राणवतोऽल्पास्त्वङ्मांसप्राप्ता मृद्वोऽल्परुजः क्षिप्रपाकभेदिन्यश्च साध्याः ॥ २ ॥

ताभिरुपद्रुतं प्रमेहिणमुपचरेत्। तत्र पूर्व्वरूपेष्वपतर्पणं कषायं वस्तमूत्रञ्चोपदिशेत्। एवमकुर्व्वतस्तस्य मधुराहारस्य मूत्रं स्वेदः श्लेष्मा च मधुरीभवति, प्रमेहश्चाभिव्यक्तो भवति। तत्रोभयतः संशोधनमासेवेत। एवमकुर्व्वतस्तस्य दोषाः प्रवृद्धा मांसशोणितं प्रदूष्य शोफं जनयन्त्युपद्रवान् वा कांश्चित् । तत्रोक्तः प्रतीकारः शिरामोक्षश्च ॥ ३ ॥

एवमकुर्व्वतस्तस्य शोफो वृद्धोऽतिमात्ररुजो विदाहमापद्यते। तत्र शस्त्रप्रणिधानमुक्तं व्रणक्रियोपसेवा च ॥ ४ ॥

एवमकुर्व्वतस्तस्य पूयोऽभ्यन्तरमवदार्य्योत्सङ्गं महान्तमवकाशं कृत्वा प्रवृद्धोभवत्यसाध्यः ॥ ५ ॥

तस्मादादित एव प्रमेहिणमुपक्रमेत् ॥ ६ ॥

शराविकेत्यादि। प्रागिति प्रमेहनिदानं स्मारयति। ताभिरिति। एतेनार्थाक्षिप्तं भवति इतराभिरुपद्रुतन्तु जह्यादेवेति। उपदिशेद् यथायोगमभ्यवहर्त्तुमित्याकूतम्। अत्राविशेषेऽपि वस्तमूत्रं दोषबलादिकमभिसमीक्ष्य पलद्वयादनधिकमेव पातुं प्रयच्छन्ति कुशलाः। उपद्रवा निदानोक्तामक्षिकोपसर्पणादयः। उक्तो द्विव्रणीयोपदिष्टः। शिरामोक्षश्चेति रक्तावसेचनोपायान् उपलक्षयतीति मन्यते शक्नदेव जलौकादीनामप्युपयोगदर्शनात्। रक्तावसेचनन्तु सर्व्वथा दुर्व्वलानां प्रतिषिद्धमिति स्मर्त्तव्यम् ॥ १—६ ॥

भल्लातक-विल्वाम्बु-पिप्पलीमूलोदकीर्य्या-वर्षाभू-पुनर्नवा-चित्रक-शटी-स्नुही-वरुणक-पुष्कर-दन्ती-पथ्या दशपलोन्मिता यव-कोलकुलत्थांश्च प्रास्थिकान् सलिलद्रोणे निःक्वाथ्य चतुर्भागावशिष्टेऽवतार्य्य वचा-त्रिवृत्कम्पिल्लक-भार्गी-निचुल-शुण्ठी-गजपिप्पली-विड़ङ्ग-शिरीषाणां भागैरर्द्धपलिकैर्घृतप्रस्थं विपाचयेन्मेह-श्वयथुकुष्ठगुल्मोदरार्शःप्लीहविद्रधिपिड़कानां नाशनं, नाम्ना धान्वन्तरम्॥ ७॥

दुर्व्विरेच्या हि मधुमेहिनो भवन्ति मेदोऽभिव्याप्तशरीरत्वात्। तस्मात् तीक्ष्णमेतेषां शोधनं कुर्व्वीत। पिड़कापीड़िताः सोपद्रवाः सर्व्व एव प्रमेहा मूत्रादिमाधुर्य्ये मधुगन्धसामान्यात् पारिभाषिकीं मधुमेहतां लभन्ते। नचैतान् कथञ्चिदपि स्वेदयेत्, मेदोवहुत्वादेतेषां विशीर्य्यते देहः। स्वेदेन रसायनीनाञ्च दौर्व्वल्यान्नोर्द्ध्वमुत्तिष्ठन्ति प्रमेहिणां दोषाः; ततो मधुमेहिनामधःकाये पिड़काः प्रादुर्भवन्ति। अपक्वानां पिड़कानां शोफवत् प्रतीकारः, पक्वानां व्रणवदिति। तैलन्तु व्रणरोपणादौ कुर्व्वीत॥ ८॥

आरग्वधादिकषायमुत्सादनार्थं, शालसारादिकषायं परिषेचने, पिप्पल्यादिकषायं पानभोजनेषु, पाठाचित्रकशार्ङ्गेष्टा-

---

भल्लातकेत्यादि। उदकीर्य्या करञ्जभेदः 'उहरकरञ्जा' इत्याख्यायते। तैलन्त्वित्यादि। कुर्व्वीत हितमीयमभिसमीक्ष्येत्यभिसन्धिः। आरग्वधेत्यादि

क्षुद्रा-बृहती-शारिवा-सोमवल्क-सप्तपर्णारग्वध-कुटजमूलचूर्णानि मधुमिश्राणि प्राश्नीयात्। शालसारादिवर्गकषायं चतुर्भागावशिष्टमवतार्य्य परिस्राव्य पुनरुपनीय साधयेत्, सिध्यति चामलकरोध्रप्रियङ्गुदन्तीकृष्णायस्ताम्रचूर्णान्यावपेत्, एतदनुपदग्धंलेहीभूतमवतार्य्यानुगुप्तं निदध्यात्। ततो यथायोगमुपयुञ्जीत। एष लेहः सर्व्वमेहानां हन्ता ॥ ९ ॥

त्रिफलाचित्रकत्रिकटुविडङ्गमुस्तानां नव भागास्तावन्त एव कृष्णायश्चूर्णस्य। तत्सर्व्वमैकध्यं कृत्वा यथायोगं मात्रां सर्पिर्मधुभ्यां संसृज्योपयुञ्जीत। एतन्नवायसम्। एतेन जाठर्य्यं न भवति, सम्नोऽग्निराप्यायते, दुर्नामशोथपाण्डुकुष्ठरोगाविपाककासश्वासप्रमेहाश्च न भवन्ति ॥ १० ॥

शालसारादिनिर्य्यूहे चतुर्थांशावशेषिते।
परिस्रुते ततः शीते मधु माक्षिकमावपेत् ॥ ११ ॥
फाणितीभावमापन्नं गुड़ं शोधितमेव च।
श्लक्ष्णपिष्टानि चूर्णानि पिप्पल्यादिगणस्य च ॥
ऐकध्यमावपेत् कुम्भे संस्कृते घृतभाविते।
पिप्पलीचूर्णमधुभिः प्रलिप्तेऽन्तः शुचौ दृढ़े ॥
श्लक्ष्णानि तीक्ष्णलौहस्य तत्र पत्राणि बुद्धिमान्।

शार्ङ्गेष्टा महाघारञ्जः, क्षुद्रा कण्टकारी, सोमवल्कः श्वेतखदिरः आवपेद्दग्धमांशेनेति नेयम्।• उपनीय अग्नेरुपरि निधाय ॥ ७—१० ॥

खदिराङ्गारतप्तानि बहुशः सन्निपातयेत् ॥
सुपिधानन्तु तं कृत्वा यवपल्ले निधापयेत् ।
मासांस्त्रींश्चतुरो वापि यावद्वा लोहसंक्षयात् ॥
ततो जातरसं तन्तु प्रातः प्रातर्यथाबलम् ।
निषेवेत यथायोगमाहारश्चास्य कल्पयेत् ॥
कार्य्यकृद्दलिनामेष सन्नत्यग्नेः प्रसाधकः ।
शोफगुल्मह्रत् कुष्ठमेहपाण्डामयापहः ॥
प्लीहोदरहरः शीघ्रं विषमज्वरनाशनः ।
अभिष्यन्दापहरणो लोहारिष्टो महागुणः ॥ १२ ॥
प्रमेहिणो यदा मूत्रमपिच्छिलमनाविलम् ।
विशदं तिक्तकटुकं तदारोग्यं प्रचक्षते ॥ १३ ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने
प्रमेहपिड़काचिकित्सितं नाम
द्वादशोऽध्यायः ॥ १२ ॥

शालेत्यादि । चूर्णमाक्षिकगुड़ा अत्र क्वाथात् षोड़शाष्टमतुरीयांशा एवावाप्याः । परिशिष्ट मतिरोहितार्थम् ॥ ११ —१३ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये चिकित्सितस्थाने प्रमेहपिड़काचिकित्सितं नाम द्वादशोऽध्यायः ।

त्रयोदशोऽध्यायः ।

अथातो मधुमेहचिकित्सितं व्याख्यास्यामः ॥ १ ॥

मधुमेहित्वमापन्नं भिषग्भिः परिवर्ज्जितम् ।
योगेनानेन मतिमान् प्रमेहिणमुपाचरेत् ॥ २ ॥
मासि शुक्रे शुचौ चैव शैलाः सूर्य्यांशुतापिताः ।
जतुप्रकाशं स्वरसं शिलाभ्यः प्रस्रवन्ति हि ।
शिलाजत्विति विख्यातं सर्व्वव्याधिविनाशनम् ॥
त्रप्वादीनान्तु लोहानां षण्णामन्यतमान्वयम् ।
ज्ञेयं स्वगन्धतश्चापि षड्योनिप्रथितं क्षितौ ॥

पिड़का हि प्रायेण मधुमेहिनामेव भवन्ति तदिदानीं क्रमागतं मधुमेह-चिकित्सितमधिकरोति अथात इत्यादिना ॥ १ ॥

मध्वित्यादि । भिषग्भिः परिवर्ज्जितमिति । स्तुतिरेषा योगस्येत्यवधेयम् 'असाध्यान्नोपक्रमेत' इति स्मरणात् । योगन्तमामूलमुपदिदिक्षति मास इत्यादिना । शुक्रो ज्यैष्ठः शुचिराषाढ़ः भङ्गीविशेषेण शिलाजतुपदं निर्व्वक्ति जत्विति । जतुप्रकाशं लाक्षाकारम् शिलाभ्यो वङ्गादिधात्वनुगताभ्य इत्युक्तेयं परमतः षड्योनीति विशेषणात् । प्रस्रवन्तीत्यन्तर्निहितेन क्रिया नेयम् । निरुक्तिः स्रावच्छिलाप्रसूतं जतु शिलाजतु । उक्तमर्थं पुनर्विशदयति त्रप्वादीनामिति । त्रप्वत्र वङ्गं "त्रपुसीसकवङ्गयोः" इति मेदिनी । आदिना सीसकायस्ताम्ररजतसुवर्णानामादेश इति तु व्याख्या-

लोहाद्भवति तद्यस्माच्छिलाजतु जतुप्रभम् ।
तस्य लोहस्य तद्वीर्य्यं रसञ्चापि बिभर्त्ति तत् ॥
त्रपुसीसायसादीनि प्रधानान्युत्तरोत्तरम् ।
यथा तथा प्रयोगेऽपि श्रेष्ठे श्रेष्ठगुणाः स्मृताः ॥
तत् सर्व्वं तिक्तकटुकं कषायानुरसं सरम् ।
कटु[?]क्युष्णवीर्य्यञ्च शोषणं छेदनं तथा ॥
तेषु यत् कृष्णममलघु स्निग्धं निःशर्करञ्च यत् ।
गोमूत्रगन्धि यच्चापि तत् प्रधानं प्रचक्षते ॥ ३ ॥

भविष्यत्यनतिदूरम् । लोहानां धातूनां "सर्व्वञ्च तैजसं लोहम्" इति कोषा-न्तरञ्च । अन्यतमेन सम्बन्धोऽस्येत्यन्यतमान्वयम् । स्वगन्धत इति तस्य तस्य धातोरेवेति प्रत्येतव्यम् । तत्पुनः शिलाजतु न केवलं स्वस्वगन्धं बिभर्त्ति किन्तर्हि रसवीर्य्ये अपीत्याह लोहादिति । तत् जतुप्रभं शिलाजतु यस्मा-ल्लोहाद् भवत्युत्पद्यते तस्य लोहस्य तदप्रधानाध्यायोपदिष्टं वीर्य्यं रसञ्च तत्त-स्मात् तत्तल्लोहसम्भूतत्वादिति यावत् बिभर्त्ति कारणानुरूपं कार्य्यमिति कृत्वे-त्याकूतम् । अत्र तत्तद्वीर्य्यमेवं व्याजिहीर्षौ हिरुक्तैकदेशस्य व्यर्थत्वमिति दोषो गलहस्तः । अत्र पुनर्ज्जतुप्रभमिति विशेषणं कारणभूतानां लोहानां विभिन्नरूपत्वेऽप्यस्यानन्यरूपत्वमाख्यातुम् । प्रकर्षापकर्षतोऽपि त्रप्वादिसाम्यं दर्शयति त्रप्विति । अय एव आयसम् , प्रयोगे उपयोगे यथा त्रप्वादीन्युत्तरो-त्तरं प्रधानानि तथा उत्तरोत्तरं श्रेष्ठे श्रेष्ठसम्भूते शिलाजतुनि श्रेष्ठगुणाः स्मृता इत्यर्थः । नन्वेवंगते त्रप्वादीनां शिलाजतुनश्च गुणतो न किञ्चिद्विशेषं पश्याम इत्येवं ये प्रत्यवतिष्ठन्ते तान् पुनर्निरस्तुं संक्षिप्तं गुणमभिधत्ते तदि-ति । अन्यथाप्राधान्यं निर्द्दिदिक्षति तेष्विति निगदव्याख्यातम् ॥ २—३ ॥

तद्भावितं सारगणैर्हृतदोषो हिमोदये ।
पिबेत् सारोदकेनैव श्लक्ष्णपिष्टं यथाबलम् ।
जाङ्गलेन रसेनान्नं तस्मिन् जीर्णे तु भोजयेत् ॥ ४ ॥
उपयुज्य तुलामेवं गिरिजादमृतोपमात् ।
वपुर्वर्णबलोपेतो मधुमेहविवर्जितः ।
जीवेद्वर्षशतं पूर्णमजरोऽमरसन्निभः ॥
शतं शतं तुलायान्तु सहस्रं दशतौलिके ।
भल्लातकविधानेन परिहारविधिः स्मृतः ॥
मेहं कुष्ठमपस्मारमुन्मादं श्लीपदं गरम् ।
शोषं शोफार्शसी गुल्मं पाण्डुतां विषमज्वरम् ॥
अपोहत्यचिरात् कालाच्छिलाजतु निषेवितम् ।
न सोऽस्ति रोगो यञ्चापि निहन्यान्न शिलाजतु ॥
शर्करां चिरसम्भूतां भिनत्ति च तथाश्मरीम् ।
भावनालोडने चास्य कर्त्तव्ये भेषजैर्हितैः ॥ ५ ॥
एवञ्च माक्षिकं धातुं तापीजममृतोपमम् ॥
मधुरं काञ्चनाभासमम्लं वा रजतप्रभम् ।
पिबन् हन्ति जराकुष्ठमेहपाण्ड्वामयक्षयान् ॥ ६ ॥

तदित्यादि । सारगणाः शालसारादयः । हृतदोषो वमनादिना संशुद्धः । सारोदकेन शालसारादिक्वाथेन । तुलायामुपयुक्तायामिति शेषः । दशतौलिके दशतुलासम्मिते शिलाजतुन्युपयुक्ते इत्यर्थः । भल्लातकविधिः चि० ६ अ० द्रष्टव्यः । हितैः स्मृत तत्रोपयुक्तैः विधिमिमं स्वर्णमाक्षिकेऽतिदिशति

तत्रावितः कपोतांश्च कुलत्थांश्च विवर्ज्जयेत् ॥ ७ ॥
पञ्चकर्म्मगुणातीतं अवावन्तं जिजीविषुम् ।
योगेनानेन मतिमान् साधयेत् कुष्ठिनं नरम् ।
तुवरकास्तु ये वृक्षाः पश्चिमार्णवभूमिषु ॥
वीचीतरङ्गविक्षेप-मारुतोद्धतपल्लवाः ।
तेषां फलानि गृह्णीयात् सुपक्वान्यम्बुदागमे ॥
मज्जा तेभ्योऽपि संहृत्य शोषयित्वा विचूर्ण्य च ।
तिलवत् पीडयेद्‌द्रोण्यां क्वाथयेद्वा कुसुम्भवत् ॥
तत्तैलं संहृतं भूयः पचेदातोयसंक्षयात् ।
अवतार्य्य करीषे च पक्षमात्रं निधापयेत् ॥
स्निग्धः स्विन्नो हृतमलः पश्चादूर्द्ध्वं प्रयत्नवान् ।
चतुर्थभक्तान्तरितः शुक्लादौ दिवसे शुभे ॥ ८ ॥
मन्त्रपूतस्य तैलस्य पिवेन्मात्रां यथाबलम् ।
तत्र मन्त्रं प्रवक्ष्यामि येनेदमभिमन्त्रते ॥
मज्जसार महावीर्य्य सर्व्वान् धातून् विशोधय ।
शङ्खचक्रगदापाणिस्त्वामाज्ञापयतेऽच्युतः ॥
तेनास्योर्द्ध्वमधश्चापि दोषा यान्त्यसकृत् ततः ।

एवमिति । तापीनाम विन्ध्याचलस्था पश्चिमवाहिनी काचिन्नदी । तत्राविता स्नानप्राप्तः पीतसर्षमाक्षिक इति यावत् ॥ ४—७ ॥

अत्र साधयेत् कुष्ठिनं नव मित्युक्तेऽपि प्रमेहहरत्वमस्य प्रज्ञातत्वात् मेह-

अल्पस्नेहलवणां सायं यवागूं शीतलां पिबेत् ॥
पञ्चाहं प्रपिबेत् तैलमनेन विधिना नरः ।
पथ्यं परिहरेच्चापि मुद्गयूषौदनाशनः ॥
पञ्चभिर्दिवसैरेवं सर्व्वकुष्ठैर्विमुच्यते ।
तदेव खदिरक्वाथे त्रिगुणे साधु साधितम् ॥
निहन्ति पूर्व्ववत् पक्वं पिबेन्मासमतन्द्रितः ।
तेनाभ्यक्तशरीरश्च कुर्व्वीताहारमीरितम् ॥
भिन्नस्वरं रक्तनेत्रं विशीर्णं क्रिमिभक्षितम् ।
अनेनाशु प्रयोगेण साधयेत् कुष्ठिनं नरम् ॥
सर्पिर्मधुयुतं पीतं तदेव खदिराम्बुना ।
पक्षिमांसरसाहारं करोति द्विशतायुषम् ॥
तदेव नस्ये पञ्चाशद्दिवसानुपयोजितम् ।
वपुष्मन्तं श्रुतिधरं करोति त्रिशतायुषम् ॥ ९ ॥
शोधयन्ति नरं पीता मज्जानस्तस्य मात्रया ।
महावीर्य्यस्तुवरकः कुष्ठमेहापहः परः ॥ १० ॥
सान्तर्धूमस्तस्य मज्जा तु दग्धः क्षिप्तस्तैले सैन्धवक्षाञ्जनस्य ।
ऐन्मीं हन्यादक्ष्म नक्तान्ध्यकाचान् नीलीरोगं तैमिरञ्चा-
ञ्जनेन ॥ ११ ॥

नरः पर इति वक्ष्यमाणत्वाद्बोध्यम् । पञ्चेत्यादि । पञ्चकर्म्मगुणातीतं पञ्च-
कर्म्मगुणैर्हीनम् । चतुर्थभक्तान्तरितश्चतुर्थभक्तेन तिरस्कृतश्चतुःसन्ध्याभोजनरहित

इति सुश्रुतसंहितायां चिकित्सितस्थाने
मधुमेहचिकित्सितं नाम
त्रयोदशोऽध्यायः ॥ १३ ॥

इति निष्कर्षः। ईर्ष्योव्रणस्त्वितोऽयमनन्यार्थः। अर्म्मादयो मेध रोग भेदाः। परिशिष्टमतिरोहितार्थम् ॥ ८—११ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये चिकित्सितस्थाने मधुमेहचिकित्सितं नाम त्रयोदशोऽध्यायः।

चतुर्द्दशोऽध्यायः।

अथात उदराणां चिकित्सितं व्याख्यास्यामः ॥ १ ॥

अष्टावुदराणि पूर्व्वमुद्दिष्टानि तेष्वसाध्यं बद्धगुदं परिस्रावि चावशिष्टानि कृच्छ्रसाध्यानि, सर्व्वाण्येव च प्रत्याख्यायोपक्रमेत। तेष्वाद्यश्चतुर्व्वर्गो भेषजसाध्यः। कालप्रकर्षात् सर्व्वाण्यत्र शस्त्रसाध्यानि वर्ज्जयितव्यानि वा ॥ २ ॥

सम्प्रति क्रमागतमुदराणां चिकित्सितमधिकरोति अथात इत्यादिना ॥१॥

अष्टावित्यादि। चतुर्णां दोषजानां समूहश्चतुर्व्वर्गः। अभिव्यक्तीनि

उदरी तु गुर्व्वभिष्यन्दि-रूक्ष-विदाहि-स्निग्ध-पिशित-परिषेकावगाहान् परिहरेत् । शालि षष्टिक-यव-गोधूम-नीवारान् नित्यमश्नीयात् ॥ ३ ॥

तत्र वातोदरिणं विदारिगन्धादिसिद्धेन सर्पिषा स्नेहयित्वा तिल्वकविपक्वेनानुलोम्य चित्राफलतैलप्रगाढ़ेन विदारिगन्धादिकषायेणास्थापयेदनुवासयेच्च शाल्वणेन चोपनाहयेदुदरम् । भोजयेच्चैनं विदारिगन्धादिसिद्धेन क्षीरेण जाङ्गलरसेन चाभीक्ष्णं स्वेदयेत् ॥ ४ ॥

पित्तोदरिणन्तु मधुरगणविपक्वेन सर्पिषा स्नेहयित्वा श्यामात्रिफलात्रिवृद्विपक्वेनानुलोम्य शर्करामधुघृतप्रगाढ़ेन न्यग्रोधादिकषायेणास्थापयेदनुवासयेच्च, पायसेनोपनाहयेदुदरं, भोजयेच्चैनं विदारिगन्धादिसिद्धेन पयसा ॥ ५ ॥

श्लेष्मोदरिणं पिप्पल्यादिकषायसिद्धेन सर्पिषोपस्नेह्य स्नुहीक्षीरविपक्वेनानुलोम्य त्रिकटुक-मूत्र-क्षार-तैलप्रगाढ़ेन मुष्ककादिकषायेणास्थापयेदनुवासयेच्च शणातसी-धातकी-किण्व-सर्षप-मूलकवीजकल्केनोपनाहयेदुदरं, भोजयेच्चैनं त्रिकटुकप्रगाढ़ेन कुलत्थयूषेण पायसेन वा स्वेदयेच्चाभीक्ष्णम् ॥ ६ ॥

पिष्टकादीनि ।• विदाहीनि धान्याम्लादीनि । चित्रा दन्ती शाल्वण: "चि० ४ अ०" द्रष्टव्य: ।• मधुरगणो मधुरवर्ग: सच सू० ४२ अ० मुष्ककादिस्तु "सू० ३८ अ०" उपदिष्ट: । किण्वं सुरावीजं व्यवहारस्तु सुरासिक्थकस्यैव ॥२—६॥

दूष्योदरिणन्तु प्रत्याख्याय सप्तलाशङ्खिनीस्वरससिद्धेन सर्पिषा विरेचयेन्मासमर्द्धमासं वा, महावृक्षक्षीर-सुरा-गोमूत्र-सिद्धेन वा; शुद्धकोष्ठन्तु मद्येनाश्वमारक-गुञ्जा-काकादनीमूल-कल्कं पाययेत्। इक्षुकाण्डानि वा कृष्णसर्पेण दंशयित्वा भक्षयेत्, वल्लीफलानि वा; मूलजं कन्दजं वा विषम् आसेवयेत्। तेनागदो भवत्यन्यं वा भावमापद्यते ॥ ७ ॥

भवति चात्र ।

कुपितानिलमूलत्वात् सञ्चयित्वान्मलस्य च ।

सर्व्वोदरेषु शंसन्ति बहुशस्त्वनुलोमनम् ॥ ८ ॥

अत ऊर्द्धं सामान्ययोगान् वक्ष्यामः । तद्यथा ।—एरण्ड-तैलमर्द्धमासं मासं द्वौ वा केवलमूत्रयुक्तं क्षीरयुक्तं वा सेवेतोद-कवर्ज्जी माहिषं वा मूत्रं क्षीरेण निराहारः सप्तरात्रम्। उष्ट्रीक्षीराहारो वाम्बवारिवर्ज्जी, पिप्पलीं वा मासं पूर्व्वोक्तेन विधानेनासेवेत । सैन्धवाजमोदायुक्तं वा निकुम्भतैलम्। आर्द्रकशृङ्गवेररसपात्रशतसिद्धं वा वातशूलेऽवचार्य्यम्। शृङ्ग-वेररसविपक्वं क्षीरमासेवेत। चव्यशृङ्गवेरकल्कं वा पयसा

दूष्येत्यादि। दूष्योदरिणं त्रिदोषोदरिणम्। सप्तला चर्म्मकसा बहु-फेनवसरा चेति पर्य्याया:। शङ्खिनीह यवतिक्ता 'कालमेघ' इत्याख्यायते। महावृक्ष: स्नुही। श्वेता गुञ्जेह काकादनी। वल्लीफलानि कर्कटी प्रभृतीनि वा शब्दात् कृष्णसर्पेण दंशयित्वेति सम्बन्ध: अत इत्यादि। पूर्व्वोक्तेन वि०

सरलदेवदारुचित्रकमेव वा। सुरङ्गीशालपर्णीश्यामापुनर्नवा-कल्कं वा। ज्योतिष्कफलतैलं वा क्षीरेण स्वर्जिकाहिङ्गु-मिश्रं पिबेत् ॥ ९ ॥

गुड़द्वितीयां वा हरीतकीं भक्षयेत्। स्नुहीक्षीरभावितानां वा पिप्पलीनां सहस्रं कालेन, पथ्याकृष्णाचूर्णं वा स्नुहीभावितामुत्कारिकां पक्वां दापयेत् ॥ १० ॥

हरीतकीचूर्णप्रस्थमाढ़के घृतस्याङ्गारेष्वभिविलाप्य खजेनाभिमथ्यानुगुप्तं कृत्वार्द्धमासं यवपल्ले वासयेत्। तत उद्धृत्य परिस्राव्य हरीतकीक्वाथाम्लदधीन्यावाप्य विपचेत्। तद्यथायोगं मासमर्द्धमासं वा पाययेत् ॥ ११ ॥

गव्ये पयसि महावृक्षक्षीरमावाप्य विपचेत्। विपक्वञ्चावतार्य्य शीतीभूतं मन्थानेनाभिमथ्य नवनीतमादाय भूयो महावृक्षक्षीरेणैव विपचेत्, तद्यथायोगं मासं मासार्द्धं वा पाययेत् ॥ १२ ॥

चव्य-चित्रक-दन्त्यतिविषा-कुष्ठ-सारिवा-त्रिफलाजमोदा-हरि-

---

५ अ० व्याहृतेन। निकुम्भं दन्तीबीजम्। पार्द्रकेत्यादौ वा शब्देन निकुम्भतैलमित्याकृष्यान्वेयम्। 'सरलादीनि पयसेत्येव। सुरङ्गी रक्तशोभाञ्जनः, ज्योतिष्कश्चिलकः। स्नुहीत्यादौ कालेनेति विशेषणं चि० ५ अ० उक्तं विधिं स्मारयति। उत्कारिकेह तण्डुलकल्केनैव कारयितव्येत्याहुः ॥ ७—१० ॥

हरीतकीत्यादि। अभिविलाप्य द्रवीकृत्य पक्वः कुशूलको हृद्दाकारं

द्रा-शङ्खिनी-त्रिवृत्त्रिकटुकानामर्द्धकार्षिका भागाः, राजवृक्ष-फलमज्जानामष्टौ कर्षाः, महावृक्षक्षीरपले द्वे, गवां क्षीरमूत्रयो-रष्टावष्टौ पलानि ; एतत् सर्व्वं घृतप्रस्थे समावाप्य विपचेत्। तद्यथायोगं मासमर्द्धमासं वा पाययेत ॥ १३ ॥

एतानि तिल्वकघृतचतुर्थानि सर्पींष्युदरगुल्मविद्रध्यष्ठी-लानाहकुष्ठोन्मादापस्मारेषूपयोज्यानि विरेचनार्थम् ॥ १४ ॥

मूत्रासवारिष्टसुराश्चाभीक्ष्णं महावृक्षक्षीरसंभृताः सेवेत। विरेचनद्रव्यकषायं वा शृङ्गवेरदेवदारुप्रगाढ़म्। वमनविरे-चनद्रव्याणां पालिका भागाः पिप्पल्यादि-वचादि-हरिद्रादि-परिपठितानाञ्च द्रव्याणां श्लक्ष्णपिष्टानां यथोक्तानाञ्च लवणा-नाम्। तत् सर्व्वं मूत्रगणे प्रक्षिप्य महावृक्षक्षीरप्रस्थञ्च मृद्व-ग्निना घट्टयन् विपचेदप्रदग्धकल्कम्। तत् साधुसिद्धमवतार्य्य शीतीभूतमक्षमात्रां गुटिकां वर्त्तयेत्। तासामेकां द्वे तिस्रो वा गुटिका बलापेक्षया मासांस्त्रींश्चतुरो वा सेवेत। एषा-नाहवर्त्तिक्रिया विशेषेण महाव्याधिषूपयुज्यते, कोष्ठजांश्च क्रमीनपहन्ति, कासश्वासक्रमिकुष्ठप्रतिश्यायारोचकाविपाको-दावर्त्तांश्च नाशयति ॥ १५ ॥

धान्यादिस्थापनपात्रमित्येतत्। मासमर्द्धं मासमित्यारोग्यकालमुपलक्षयतीत्यनु सन्धेयम्। एतानीत्यादि। एतानि हरीतक्यादिनोक्तानि तिल्वकघृतं चि० ४ अ० व्याहृतम्। वमनेत्यादि। पिप्पल्यादयस्त्रयो गणाः सू० ३७ अ०

मदनफलमज्ज-कुटज-जीमूतकेच्वाकुधामार्गवचित्रकत्रिकटु-सर्षपलवणानि महावृक्षक्षीरमूत्रयोरन्यतरेण पिष्ट्वाङ्गुष्ठमात्रां वर्त्तिं कृत्वोदरिणः आनाहे तैललवणाभ्यक्तगुदस्यैकां द्वे वा पायौ निदध्यात्। एषानाहवर्त्तिक्रिया वातमूत्रपुरीषोदावर्त्ताध्मानानाहेषु विधेया ॥ १६ ॥

प्लीहोदरिणः स्निग्धस्विन्नस्य दध्ना भुक्तवतो वामबाहौ कूर्पराभ्यन्तरतः शिरां विध्येद्विमर्द्दयेत् पाणिना प्लीहानं रुधिरस्यन्दनार्थम्। ततः संशुद्धदेहं समुद्रशुक्तिकाक्षारं पयसा पाययेत। हिङ्गुसौवर्च्चिकाक्षारेण स्रुतेन पलाशक्षारेण वा यवक्षारम्। पारिजातकेक्षुरकापामार्गक्षारं वा तैल-संसृष्टम्। शोभाञ्जनकषायं वा पिप्पलीसैन्धवचित्रकयुक्तम्। पूतिकरञ्जक्षारं वाम्लस्रुतं विड्लवणपिप्पलीप्रगाढ़म् ॥१७॥

पिप्पली-पिप्पलीमूल-चित्रक-शृङ्गवेर-यवक्षार-सैन्धवानां पालिका भागा घृतप्रस्थं तत्तुल्यं क्षीरं तद्द्वैकध्यं विपाचयेत्। एतत् षट्पलकं नाम सर्पिः प्लीहाग्निसङ्गगुल्मोदरोदावर्त्त-श्वयथु-पाण्डुरोग-कास-श्वास-प्रतिश्यायोर्द्ध्ववात-विषमज्वरान-

---

द्रष्टव्याः। गणानामेषां लवणानाञ्च पलिकाभागा इत्यनेनान्वयः। मूत्र-गणे यथालाभं मूत्रवर्गं चतुर्गुणमित्युन्नेयम् ॥ ११—१६ ॥

प्लीहेत्यादि। समुद्रजा शुद्रा शुक्तिः समुद्रशुक्तिका। शुक्तिस्तु 'झिनुक' इत्यभिधीयते। इक्षुरकः कोकिलाक्षः। पूतिकरञ्जा 'नाटाकरञ्जा' इति

पश्यन्ति। मन्दाग्निर्वा हिङ्ग्वादिकं चूर्णमुपयुञ्जीत। यकृ-द्दाल्ब्येऽप्येष एव क्रियाविभागः। विशेषतस्तु दक्षिणबाहौ शिराव्यधः ॥ १८ ॥

मणिबन्धं सक्रम्याम्य वामाङ्गुष्ठसमीरिताम्।
दहेच्छिरां शरेणाशु प्लीह्नो वैद्यः प्रशान्तये ॥ १९ ॥

बद्धगुदे परिस्राविणि च स्निग्धस्विन्नस्याभ्यक्तस्याधो नाभे-र्वामतश्चतुरङ्गुलमपहाय रोमराज्या उदरं पाटयित्वा चतुर-ङ्गुलप्रमाणमन्त्राणि निष्कृष्य निरीक्ष्य बद्धगुदस्यान्त्रप्रतिरोध-करमश्मानं वालं वापोह्य मलजातं वा ततो मधुसर्पिर्भ्याम-भ्यज्यान्त्राणि यथास्थानं स्थापयित्वा बाह्यं व्रणमुदरस्य सीव्येत् ॥ २० ॥

परिचीयते। अम्लोऽत्र मातुलुङ्गरस इत्याहुः। हिङ्ग्वादिकं चूर्णं चि० ५ अ० उपदिष्टहिङ्ग्वादिगुडिकावयवभूतम्। मणिबन्धं सक्रम्याम्येति 'एकस्य सकच्च' इति ४।५।१९ कृत्वसुचोऽपवादे पाणिनि सूत्रे सत्यपि अव्ययानामने-कार्थत्वेनाभ्युपगमादन्तर्गूढाङ्गुष्ठकृतमुष्टे न्युब्जीकृतत्वेनोन्नमय्येति व्याख्यते। वामाङ्गुष्ठे उत्थापितां वामाङ्गुष्ठसमीरिताम्। दाहेमात्राः प्लीह्नः प्रशान्तिः प्रभावकृतेत्यालोचयामः ॥ १७—१९ ॥

बद्धेत्यादि। वामतो वामांशे रोमराज्या रोमराजीतश्चतुरङ्गुलमप-हाय चतुरङ्गुलप्रमाणमुदरं पाटयित्वाऽन्त्राणि निकृष्येत्यन्वयः। अत्र चतु-रङ्गुलप्रमाणान्यन्त्राणि निकृष्येति भिषक्छ्रवराभिमतः पाठश्चतुरङ्गुल-प्रमाणेषु अन्त्रेषु निकृष्टेष्वन्त्रगतसमस्तवालादेर्निरीक्षणनिर्हरणासम्भवात्तरक-विरुद्धत्वाच्च। अत्र "बाह्यं व्रणमुदरस्य सीव्येत्" इत्यनेन यदर्थादायाति न

परिस्राविण्यप्येवमेव शल्यमुद्धृत्यास्रस्रावान् संशोध्य तच्छिद्रमान्त्रं समाधाय कृष्णपिपीलिकाभिर्दंशयेत् । दष्टे च तासां कायानपहरेन्न शिरांसि । ततः पूर्ववत् सीव्येत् । सन्धानञ्च यथोक्तं कारयेत् । यष्टिमधुकमिश्रया च कृष्ण-मृदावलिप्य बन्धेनोपचरेत् । ततो निवातमागारं प्रवेश्याचा-रिकमुपदिशेद्वासयेच्चैनं तैलद्रोण्यां सर्पिद्रोण्यां वा पयोवृत्ति-मिति ॥ २१ ॥

उदकोदरिणस्तु वातहरतैलाभ्यक्तस्योष्णोदकस्विन्नस्य स्थि-तस्याप्तैः सुपरिगृहीतस्याकक्षात् परिवेष्टितस्याधो नाभेर्वाम-तश्चतुरङ्गुलमपहाय रोमराज्या व्रीहिमुखेनाङ्गुष्ठोदरप्रमाण-मवगाढं विध्येत् ॥ २२ ॥

पुनरन्त्रगतं व्रणमिति तत्रत्यौयव्रणविषयमिति बुद्धिविषयमारोहति संयोजनमन्तरेण महतो व्रणस्य सन्धानानुपपत्तेः, तस्मान्महान्तमन्त्रगतं व्रणं यौगिकत्वाद्वक्ष्यमाणेन विधिना कृष्णपिपीलिकाभिस्तदभावे स्नायु-वालेन वा यत् परिविवेविषन्ति कुशला स्तन्नानुपपन्नम् । स्यादेतत् परि-स्राविणि त्वन्त्राणि निकृष्य किं कार्य्यमित्याह परीति । समाधाय यथावत् संयोज्येत्यर्थः । पूर्ववत् सीव्येद् वाह्यं व्रणमिति शेषः । अत्र यथोक्त-मित्यनेनायोपहरणीयोक्तं सद्योव्रणोक्तञ्च विधिं स्मारयति । यष्टिमधुक मिश्रयाचेति वाशब्दस्थानारूढोऽयं चशब्दः । उपदिशेद्बृणितोपासनीयमभि समीक्ष्येति शेषम् ॥ २०—२१ ॥

उदकेत्यादि । अत्र वातहरतैलाभ्यञ्जनादिकं वातपित्तोपद्रवशान्त्यर्थम् ।

तत्र त्रप्वादीनामन्यतमस्य नाड़ीं द्विद्वारां पक्षनाड़ीं वा संयोज्य दोषोदकमवसिञ्चेत्। ततो नाड़ीमपहृत्य तैललवणेनाभ्यज्य व्रणं बन्धेनोपचरेत्। नचैकस्मिन्नेव दिवसे सर्व्वं दोषोदकमपहरेत्; सहसा ह्यपहृते तृष्णाज्वराङ्गमर्द्दातिसारश्वासपाददाहा उत्पद्येरन्नापूर्य्यते वा भूयतरमुदरमसञ्जातप्राणस्य तस्मात् तृतीयचतुर्थपञ्चमषष्ठाष्टमदशमद्वादशषोड़शरात्राणामन्यतममन्तरीकृत्य दोषोदकमल्पाल्पमवसिञ्चेत्। निःसृते च दोषे गाढ़तरमाविककौशेयचर्म्मणामन्यतमेन परिवेष्टयेदुदरम्। तथा नाध्मापयति वायुः। षण्मासांश्च पयसा भोजयेज्जाङ्गलरसेन वा। ततस्त्रीन् मासानर्द्धोदकेन पयसा फलाम्लेन जाङ्गलरसेन वावशिष्टं मासत्रयमन्नं लघु हितं वा सेवेत। एवं संव्वत्सरेणागदी भवति ॥ २३ ॥

पाकत्वात् परिवेष्टितस्येत्यकस्माद्दोषोदकस्याधो नयनावसेचनाभ्यां लब्धावकाशेन वायुनोत्पिप्लितां तामत्ययशङ्कामपाकरोत्येकान्तेनेति यक्ततोऽवस्थात् परिवेष्टनेनैवाभीष्टसिद्धेऽप्याकस्मादित्युपपन्नमेव। नाभेश्चतुरङ्गुलमपहायेति शिरासन्निकर्षपरिहारार्थमिति बुद्धिविषयमारोहत्येव च सुकरत्वात् यद्वयमातुरं क्षीरं पाययित्वा यथोक्तं वस्त्रेण परिवेष्ट्यान्येन पृष्ठतोऽवस्थितेन पुरुषेण शनैः शनैराकर्षणार्थं वस्त्रान्तद्वयं ग्राहयित्वोपविष्टस्य नाभेरधोद्व्यङ्गुले त्र्यङ्गुले वा द्विद्वारया नाड्यानुविद्धेन व्रीहिमुखेन विद्ध्वा नाड़ीं छित्वा शस्त्रमाहृत्य तयैव नाड्या दोषोदकं विस्रावयामस्तदपि साम्प्रतमेव।

भवति चात्र ।

आस्थापने चैव विरेचने च पाने तथाहारविधिक्रियासु ।
सर्व्वोदरिभ्यः कुशलैः प्रयोज्यं क्षीरं शृतं जाङ्गलजो रसो वा ॥२४॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने-
उदरचिकित्सितं नाम
चतुर्दशोऽध्यायः ॥ १४ ॥

जाङ्गलरसेनेति जाङ्गलानां रसमत्र कश्चिंचिद्घटे कुट्टितं पक्वमरिचाजाजीलिप्तं मांसं विन्यस्य शरावेण मुखं पिधाय सामित्रेन च दृढं प्रलिप्याकण्ठं दोला-कारेण स्थाल्यन्तरस्थे सलिले निधाय यामं पक्वीकृत्य शीतीभूते वस्त्रपूतं पाययन्ति कुशलाः । आस्थापन इत्यादि । अत्रापि जाङ्गलजो रसः प्राग्वदेव बोद्धव्यः । परिशिष्टं निगदव्याख्यातम् ॥ २४ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये चिकित्सितस्थाने उदरचिकित्सितं नामचतुर्दशोऽध्यायः ।

पञ्चदशोऽध्यायः ।

अथातो मूढ़गर्भचिकित्सितं व्याख्यास्यामः ॥ १ ॥

सम्प्रति क्रमागतत्वान्मूढ़गर्भचिकित्सितमधिकरोति अथात इत्यादिना ॥१

नातः कष्टतममस्ति यथा मूढ़गर्भशल्योद्धरणम् । अत्र हि योनियकृत्प्लीहान्त्रविवरगर्भाशयानां मध्ये कर्म्म कर्त्तव्यं स्पर्शेन । उत्कर्षणापकर्षणस्थानापवर्त्तनोत्कर्त्तनभेदनच्छेदनपीड़नर्जुकरणदारणानि चैकहस्तेन गर्भं गर्भिणीं वा हिंसता । तस्मादधिपतिमापृच्छ्य परञ्च यत्नमास्थायोपक्रमेत । तत्र समासेनाष्टविधा मूढ़गर्भगतिर्निर्द्दिष्टा, स्वभावगता अपि त्रयः सङ्गा भवन्ति, शिरसो वैगुण्याद्ंसयोर्जघनस्य वा । जीवति तु गर्भे सूतिका गर्भनिर्हरणे प्रयतेत । निर्हर्त्तुमशक्ये च्यवनान् मन्त्रानुपशृणुयात् तान् वक्ष्यामः ॥ २ ॥

इहामृतञ्च सोमश्च चित्रभानुश्च भामिनि ।
उच्चैःश्रवाश्च तुरगो मन्दिरे निवसन्तु ते ॥

नात इति । कष्टतमत्वं स्फोरयति अत्रेति । यकृत्प्लीहानावत्र विक्रत्या परिवृद्धत्वेन योनिसन्निधिगतावेव प्रत्येतव्यौ, तावेव हि योनेरवकाशं निरुध्य गर्भशल्योद्धरणं प्रति प्रतिपक्षौ भवत स्तदिह योनितोऽविक्रतयोर्यकृत्प्लीह्नोः सुदूरवर्त्तित्वेऽपि नानुपपत्तिः । गर्भाशयोनाम योनेस्तृतीय आवर्त्तः, आमनन्ति हि "शा० ५अ०" "तस्यास्तृतीये आवर्त्ते गर्भशय्या प्रतिष्ठिता" इत्येवञ्च योनेरुपदेशेनैवास्योपलम्भेऽपि पृथगुपादानं प्रपञ्चार्थम् । नन्वश्मर्य्याऽऽहरणादिषु स्पर्शाभिनिर्वृत्तेषु सुदुष्करेष्वितरेषु कर्म्मस्ववस्थितेषु किमिदमुच्यते "नातः कष्टतममस्ति" इत्येवं विवक्षूनपाकुर्व्वन् पुनर्व्विशिनष्टि उत्कर्षणेति । अत्र उत्कर्षणं बलेनोन्नयनम्, अपकर्षणन्तु तद्विपर्य्यासः, स्थानापवर्त्तनं नाम निर्हरणानुगुण्येनापत्यावस्थापनम्, उत्कर्त्तनन्तु क्रियासौकर्य्यादध-

इदममृतमपां समुद्धृतं वै तव लघुगर्भमिमं प्रमुञ्चतु स्त्रि ।
तदनलपवनार्कवासवास्ते सह लवणाम्बुधरैर्दिशन्तु शान्तिम् ॥
मुक्ताः पशोर्विपाशाश्च मुक्ताः सूर्य्येण रश्मयः ।
मुक्तः सर्व्वभयाद्गर्भ एह्येहि विरमावितः ॥ ३ ॥

औषधानि च विदध्याद्यथोक्तानि । मृते चोत्तानाया आभुग्नसक्थ्या वस्त्राधारकोन्नमितकट्या धन्वनशाल्मलिकशाल्मलीमृत्स्नघृताभ्यां म्रक्षयित्वा हस्तं योनौ प्रवेश्य गर्भमुपहरेत् ॥ ४ ॥

तत्र सक्थिभ्यामागतमनुलोममेवाञ्छेत् । एकसक्था प्रपन्नस्येतरसक्थि प्रसार्य्यापहरेत् । स्फिग्देशेनागतस्य स्फिग्देशं प्रपीड्योर्द्ध्वमुत्क्षिप्य सक्थिनी प्रसार्य्यापहरेत् । तिर्य्य-

---

स्तादूर्द्ध्वं प्रस्रावधारणम् । गर्भं गर्भिणीं वा हिंसता कर्त्तव्यानि इति शेषः । इदमत्रावधेयम् इदमासन्नो हि गर्भश्छित्त्वा खण्डशो निर्हर्त्तव्य एतत्तु धूलिधुसरितचरणेन हालिकेनाप्यवबुध्यत इत्यत्र नेह किञ्चिद्वक्तव्यं मस्ति, आचार्य्यास्तु निसर्गत एव द्वारस्य सौक्ष्म्यादितः खण्डशोऽपि यथाकालं निर्हर्त्तुमशक्यं गर्भं गर्भिण्या जीवनसंशयमाख्यायोदरं विपाट्य निर्हर्त्तुमुपदिशन्तीति युक्तमुक्तं गर्भं गर्भिणीं वा हिंसतेति । हिंसा चात्र प्राणिवधयोग्यो व्यापारः । प्रकृतमनुसरति तत्रेति । उद्दिष्टाः संक्षेपेणाऽभिहिता "नि० ८ अ०" इति शेषः ॥ २—३ ॥

औषधानीति । यथोक्तानि शा० १० अ० गर्भसङ्गे तु धूपयेदित्यादिनोक्तानीत्यर्थः । आभुग्नसक्थ्या ऊर्द्ध्वजानुकत्वेन कुटिलीकृतसक्थ्याः । वस्त्रेति । वस्त्राधारको वस्त्रवलयः वस्त्रनिर्म्मितोऽन्तःशुषिरो 'बिंडा' इति प्रसिद्धो गोल

गागतस्य परिघस्येव तिरश्चीनस्य पश्चार्द्धमूर्द्धमुत्क्षिप्य पूर्व्वार्द्धमपत्यपथं प्रत्यार्ज्जवमानीयापहरेत् । पार्श्वापवृत्तशिरसमंसं प्रपीड्योर्द्धमुत्क्षिप्य शिरोऽपत्यपथमानीयापहरेत् । बाहुद्वयप्रतिपन्नस्योर्द्धमुत्पीड्यांसौ शिरोऽनुलोममानीयापहरेत् । द्वावन्त्यावसाध्यौ मूढ़गर्भौ । एवमशक्ये शस्त्रमवचारयेत् ॥५॥

सचेतनञ्च शस्त्रेण न कथञ्चन दारयेत् ।
दार्य्यमाणो हि जननीमात्मानञ्चैव घातयेत् ॥

तत्र स्त्रियमाश्वास्य मण्डलाग्रेणाङ्गुलीशस्त्रेण वा शिरो

इति यावत् । तेन उन्नमिता कटिर्यस्याः सा तथोक्ता तस्याः, उन्नतकटित्वेन वस्त्रधारकोपरिशयानाया इत्यर्थः । शाल्मलीषु मध्ये मरुदेशीयपर्व्वतस्था हि नितरां पिच्छिलनिर्य्यासा भवति तदिदमुच्यते धन्वेति । धन्वा मरुदेशः स्तत्स्थमत्र पिच्छिलो भागः । "विविक्त' स्तत्स्थञ्च" इत्योजो लक्षणञ्च । तन्त्रान्तरेऽप्युक्तम् "हस्तमभ्यज्य योनिञ्च साज्यशाल्मलिपिच्छया' इति । तत्रेत्यादि । तिरश्चीनस्तिर्य्यग्भूतः । अपरमर्द्धं पश्चार्द्धं शेषार्द्धमित्येतत् । पूर्व्वार्द्धं बाहुशिरः प्रभृतिभागं प्रत्यार्जवं ऋजुभावं लक्ष्यीकृत्य ऋजूकृत्येति यावत् पार्श्वापवृत्तशिरसं पार्श्वाभिमुखशिरसम् । बाहुद्वयप्रतिपन्नस्य बाहुद्वयमात्रेण निर्गतस्य उत्पीड्योत्क्षिप्य, अन्त्यौ 'नि० ८ अ०' कश्चिदाभुग्नमध्य इत्यादिनोपदिष्टावित्यर्थः ॥ ४—५ ॥

सचेतन मित्यादि । सह चेतनया वर्त्तमानं सचेतनं विभावितचैतन्यमप्राप्तमोहमिति यावत् । आह्रयतात्रात्र साहायकमासादयितुम् "चेतनाचेतनविभागश्रवणं विभावनाऽविभावनाभ्यां चैतन्यस्य शक्यत एव योजयितुम् इति (२ । १ । ६ । शारीरकभाष्ये) श्रीमच्छङ्करभगवत्पादवचनम् । जननीं घातयेच्छस्त्रजनित दुःखासहिष्णुत्वेन हस्तपादादेर्विषमविक्षेपादित्यभिसन्धिः ।

विदार्य्य शिरःकपालान्याहृत्य शङ्कुना गृहीत्वोरसि कक्षायां वापहरेत् । अभिन्ने शिरसि चाचिकूटे गण्डे वा, अंससंसक्तस्यांसदेशे बाहुं छित्त्वा, दृतिमिवाततं वातपूर्णोदरं वा विदार्य्य निरस्यान्त्राणि शिथिलीभूतमाहरेत् । जघनसक्तस्य वा जघनकपालानीति ॥ ६ ॥

यद्यद्वा गर्भस्य तत्र सजति तद्भिषक् ।
सम्यग्विनिर्हरेच्छित्त्वा रक्षेन्नारीञ्च यत्नतः ॥ ७ ॥
गर्भस्य गतयश्चित्रा जायन्तेऽनिलकोपतः ।
तत्रानल्पमतिर्वैद्यो वर्त्तेत विधिपूर्व्वकम् ॥ ८ ॥
नोपेक्षेत मृतं गर्भं मुहूर्त्तमपि पण्डितः ।
स ह्याशु जननीं हन्ति निरुच्छ्वासं पशुं यथा ॥

तथाचापानवैगुण्यविशेषेण क्लेशातिशयवशात् प्राप्तमोहं जीवन्तमपि गर्भं दारयेदित्याकूतम् । छिन्द्यात् गर्भं न जीवन्तमित्यादि तन्त्रान्तरीयवचनन्तु इत्थोत्तु वाचमप्यमूमेव सरणिम् , अन्यथा गर्भं हिंसतेति उपक्रमोक्तं दुरुपपदं स्यात् । *अङ्गुलिनिहित शास्त्रं अङ्गुलिशस्त्रम् । अभिन्ने शस्त्रावकाशविरहितत्वाच्छेदनेन विनाकृत इत्यर्थः । अचिकूटे चक्षुर्गोलके गण्डे वा शङ्कुना गृहीत्वेति सम्बन्धः । एतेनैवांसदेश इत्यपि व्याख्यातप्रायम् ॥ ६ ॥

उक्तमर्थमुपसंहरति यदिति । आशुहननं दृष्टान्तेन स्फोरयति । निरुच्छ्वासमिति । अन्तर्मुखश्वासस्याभावो निरुच्छ्वासम् ऊर्द्ध्वश्वास इति यावत् । पशुं जीवममूम् "अपाश्नेतश्रादिपदवेदनीयो जीवात्मा पशुः" इति माहेश्वर दर्शनम् । एवमेव "अ० २ पा० २ सू० ३७" शारीरकभाष्यव्याख्यायां तत्रभवान् वाचस्पतिमिश्रो भगवदानन्दश्च । अथ चेत् वुभित्से पशुशब्दस्य

मण्डलाग्रेण कर्त्तव्यं छेद्यमन्तर्विजानता।
वृद्धिपत्रं हि तीक्ष्णाग्रं नारीं हिंस्यात् कदाचन ॥ ९ ॥
अथापतन्तीमपरां पातयेत् पूर्व्ववद्भिषक्।
हस्तेनापहरेद्वापि पार्श्वाभ्यां परिपीड्य वा ॥
धुनुयाच्च मुहुर्नारीं पीड़येद्वासपिण्डिकाम्।
तैलाक्तयोनेरेवं तां पातयेन्मतिमान् भिषक् ॥ १० ॥
एवं निर्हृतशल्यान्तु सिञ्चेदुष्णेन वारिणा।
ततोऽभ्यक्तशरीरायाः योनौ स्नेहं निधापयेत् ॥
एवं मृद्वी भवेद्योनिस्तच्छूलञ्चोपशाम्यति ॥ ११ ॥
कृष्णातन्मूलशुण्ठ्येला-हिङ्गुभार्गीः सदीप्यकाः।
वचामतिविषां रास्नां चव्यं सञ्चूर्ण्यपाययेत् ॥
स्नेहेन दोषस्यन्दार्थं वेदनोपशमाय च।
क्वाथञ्चैषां तथा कल्कं चूर्णं वा स्नेहवर्ज्जितम् ॥

प्रसिद्धार्थ एवावरुध्यति नहि गर्भोऽयमाक्षप्रतिबन्धं जननीं हन्तीति दृष्टान्ते-नावगमयन् पशुशब्दं प्रायुङ्क्तेति सोपानम्। पशवो हि सर्व्वथा निरुपाया इति हृदयम्। छेद्यं छेदः। अपराऽमराचेति पर्य्यायौ। पूर्व्वं गर्भिणी-व्याकरणोक्तं विधिमर्हतीति पूर्व्ववत्। "तदर्हम्" ५।१।११७ पा० सू० वतिः। पार्श्वाभ्यां परिपीड्य तैलाक्तहस्ताभ्यां नाभेरधः सव्यापसव्ययो रंशयोः परिपीड़नेनेत्यर्थः। पीड़येन्मर्द्दयेत्। सपिण्डिकामपरासन्निहित मांसपिण्डिकासहितामपरामित्यर्थः ॥ ७—१० ॥

एव मित्यादि। स्नेहोऽत्र प्राधान्याद् वक्ष्यमाणं बलातैलमित्यवगन्तव्यम्, 'योनिसन्तर्पणे' इत्याद्यनन्तरोक्तस्मरणात्। दीप्यको यमानी,

शाकत्वग्घिङ्गतिविषा-पाठाकटुकरोहिणीः ।
तथा तेजोवतीञ्चापि पाययेत् पूर्व्ववद्भिषक् ॥
त्रिरात्रं पञ्चसप्ताहं ततः स्नेहं पुनः पिबेत् ।
पाययेदासवं नक्तमरिष्टं वा सुसंस्कृतम् ॥
शिरीषककुभाभ्याञ्च तोयमाचमने हितम् ।
उपद्रवाश्च येऽन्ये स्युस्तान् यथास्वमुपाचरेत् ॥
सर्व्वतः परिशुद्धा च स्निग्धपथ्याल्पभोजना ।
स्वेदाभ्यङ्गपरा नित्यं भवेत् क्रोधविवर्ज्जिता ॥
पयो वातहरैः सिद्धं दशाहं भोजने हितम् ।
रसं दशाहं शेषे तु यथायोगमुपाचरेत् ॥ १२ ॥
व्युपद्रवां विशुद्धाञ्च ज्ञात्वा च बलवर्णिनीम् ।
ऊर्द्ध्वं चतुर्थ्यो मासेभ्यो विसृजेत् परिहारतः ॥ १३ ॥
योनिसन्तर्पणेऽभ्यङ्गे पाने वस्तिषु भोजने ।
बलातैलमिदं वाग्र्यं दद्यादनिलवारणम् ॥
बलामूलकषायस्य दशमूलीकृतस्य च ।
यवकोलकुलत्थानां क्राथस्य पयसस्तथा ।
अष्टावष्टौ शुभाभागास्तैलादेकस्तदेकतः ॥

पाययेदित्यादि परेणान्वयः । शाकोनामौषधिः 'शेगुन' इत्याख्यायते । तेजोवती चव्यम्, ककुभोऽर्ज्जुनः, आचमनं प्रक्षालनम् । रसमत्र विष्किराणामेव विशेषेणोपदिशन्त्याचार्य्याः ॥ ११—१२ ॥

पचेदावाप्य मधुरं गणं सैन्धवसंयुतम् ।
तथागुरुं सर्ज्जरसं सरलं देवदारु च ॥
मञ्जिष्ठां चन्दनं कुष्ठमेलां कालानुसारिवाम् ।
मांसीं शैलेयकं पत्रं तगरं शारिवां वचाम् ॥
शतावरीमश्वगन्धां शतपुष्पां पुनर्णवाम् ।
तत् साधुसिद्धं सौवर्णे राजते मृन्मयेऽपि वा ॥
प्रक्षिप्य कलसे सम्यक् स्वनुगुप्तं निधापयेत् ।
बलातैलमिदं ख्यातं सर्व्ववातविकारनुत् ॥
यथाबलमतो मात्रां सूतिकायै प्रदापयेत् ॥
या च गर्भार्थिनी नारी क्षीणशुक्रश्च यः पुमान् ॥
वातक्षीणे मर्म्महते मथितेऽभिहते तथा ।
भग्ने श्रमाभिपन्ने च सर्व्वथैवोपयुज्यते ॥
एतदाक्षेपकादीन् वै वातव्याधीनपोहति ।
हिक्कां कासमधीमन्थं गुल्मं श्वासञ्च दुस्तरम् ॥
षण्मासानुपयुज्यैतदन्त्रवृद्धिमपोहति ।
प्रत्यग्रधातुः पुरुषो भवेच्च स्थिरयौवनः ॥
राज्ञामेतद्धि कर्त्तव्यं राजमात्राश्च ये नराः ।
सुखिनः सुकुमाराश्च धनिनश्चापि ये नराः ॥ १४ ॥

योनीत्यादि । मधुरोगणः सू० ३८ अ० उक्तः काकोल्यादिर्गणः । कालानुसारिवा तगरम् , अस्य द्वौ भागौ देयौ पुनस्तगरशब्दोपादानात् । प्रत्यग्रः संवृद्धः ॥ १४ ॥

बलाकषायपीतेभ्य स्तिलेभ्यो वाप्यनेकशः ।
तैलमुत्पाद्य तत्क्वाथशतपाककृतं शुभम् ॥
निवाते निभृतागारे प्रयुञ्जीत यथाबलम् ॥
जीर्णेऽस्मिन् पयसा स्निग्धमश्नीयात् षष्टिकौदनम् ॥
अनेन विधिना द्रोणमुपयुज्यान्नमीरितम् ।
भुञ्जीत द्विगुणं कालं बलवर्णान्वितस्ततः ॥
सर्व्वपापैर्विनिर्म्मुक्तः शतायुः पुरुषो भवेत् ।
शतं शतं तथोत्कर्षो द्रोणे द्रोणे प्रकीर्त्तितः ॥ १५ ॥
बलाकल्पेनातिबला-गुडूच्यादित्यपर्णिषु ।
सैरेयके वीरतरौ शतावर्य्यां त्रिकण्टके ॥
तैलानि मधुके कुर्य्यात् प्रसारण्याञ्च बुद्धिमान् ॥ १६ ॥
नीलोत्पलं वरीमूलं गव्ये क्षीरे विपाचयेत् ॥
शतपाकं ततस्तेन तिलतैलं पचेद्भिषक् ।
बलातैलस्य कल्कांस्तु सुपिष्टांस्तत्र दापयेत् ॥
सर्व्वेषामेव जानीयादुपयोगं चिकित्सकः ।
बलातैलवदेतेषां गुणांश्चैव विशेषतः ॥ १७ ॥

बलेति । प्रयुञ्जीत पाययेत । द्रोणे द्रोणे प्रतिद्रोणं तैले प्रयुक्ते शतं-शतं उत्कर्षः परिवृद्धिरायुष इति शेषः बलातैलकल्पमतिबलादावतिदिशति बलातैलेनेति । सैरेयको झिण्टी, वीरतरुरर्ज्जुनः मधुरे मधुरगणे । परिशिष्टमतिरोहितार्थम् ॥ १५—१७ ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने
मूढ़गर्भचिकित्सितं नाम
पञ्चदशोऽध्यायः ॥ १५ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये चिकित्सितस्थाने मूढ़गर्भचिकित्सितं नाम पञ्चदशोऽध्यायः ।

षोड़शोऽध्यायः ।

अथातो विद्रधीनां चिकित्सितं व्याख्यास्यामः ॥ १ ॥

उक्ता विद्रधयः षड् ये तेष्वसाध्यस्तु सर्व्वजः ।
शेषेष्वामेषु कर्त्तव्या त्वरितं शोफवत् क्रिया ॥ २ ॥
सुरङ्गीमूलकल्कैस्तु घृततैलवसायुतैः ।
सुखोष्णो बहलो लेपः प्रयोज्यो वातविद्रधौ ॥

सम्प्रत्यनुक्रमागतं विद्रधीनां चिकित्सितमधिकरोति अथात इत्यादिना ॥१॥

माकार्षीदनित्वरं यत्नोऽभीप्सन् क्वचिदप्यसाध्यानामुपक्रममित्यभिसन्धाय सर्व्वजानां प्रागुक्तमसाध्यत्वं स्मृतिपथमास्थापयति उक्ता इत्यादिना । उक्ताः 'नि० ९अ०' इति शेषः । शोफमर्हतीति शोफवत् "तदर्हम" ५ । १। ११७ पा० सू० वति । द्विव्रणीयोक्ता शोफक्रियेत्यर्थः । सुरङ्गी रक्तशोभाञ्जनः ।

सानूपौदकमांसस्तु काकोल्यादिः सतर्पणः ।
स्नेहाम्लसिद्धो लवणः प्रयोज्यश्चोपनाहने ॥
वेशवारैः सकृशरैः पयोभिः पायसैस्तथा ।
स्वेदयेत् सततञ्चापि निर्हरेच्चापि शोणितम् ॥ ३ ॥
स चेदेवमुपक्रान्तः पाकायाभिमुखो यदि ।
तं पाचयित्वा शस्त्रेण भिन्द्याच्छिन्नञ्च शोधयेत् ॥ ४ ॥
पञ्चमूलकषायेण प्रक्षाल्य लवणोत्तरैः ।
तैलैर्भद्रादिमधुकसंयुक्तैः प्रतिपूरयेत् ॥ ५ ॥
वैरेचनिकयुक्तेन चैवृतेन विशोध्य च ।
पृथक्पर्ण्यादिसिद्धेन चैवृतेन च रोपयेत् ॥ ६ ॥
पैत्तिकं शर्करालाजामधुकैः सारिवायुतैः ।

सानूपेत्यादावानूपगणपरिपठितानामप्यौदकानां पृथगुपादानं विशेषेणोपयौगिकत्वमाख्यातुमित्यध्यवस्येषां द्विधान् भागान् पाठयन्ति कुशलाः । लवणेन संसृष्टो लवणः । "लवणाल्लुक्" इति ४ । ४ । २४ पा० सू० ठको-लुक् । वेशवारैः "निरस्थि पिशितं पिष्टम्" इत्यादिना व्याहृतैः । भद्रादिः "सू० ३८ अ०" उक्तो भद्रदार्व्वादिर्नाम । अत्र लवणोत्तमैरिति विशेषणात् बलाबलमभिसमीक्ष्य पादिकं पादार्द्धञ्च लवणं कल्कत्वेनादेयम् , समधृतयो-र्मधुकभद्रदार्व्वोस्तु चतुर्गुणः क्वाथः । तैलैरिति बहुवचनन्तु यौगिकत्वेन तिलोमासर्षपतैलान्यवबोधयतीत्याहुः । वैरेचनिकानि 'सू० ४१ अ०' उक्तानि त्रिवृतादीनि, त्रिभिर्घृतवसामज्जभिर्हतं तैलं त्रैवृतम् , तद्वितोऽय-मनन्यार्थः । पृथक्पर्ण्यादीनि सू० मिश्रकोक्तानि । पैत्तिक मित्यादि ।

प्रदिह्यात् क्षीरपिष्टैर्वा पयस्योशीरचन्दनैः ॥
पाक्यैः शीतकषायैर्वा क्षीरैरिक्षुरसैस्तथा ।
जीवनीयघृतैर्वापि सेचयेच्छर्करायुतैः ॥ ७ ॥
त्रिवृद्धरीतकीनाञ्च चूर्णं लिह्यान्मधुद्रवम् ।
जलौकोभिर्हरेच्चासृक् , ——— ॥ ८ ॥
पक्वञ्चापास्य बुद्धिमान्—
क्षीरिवृक्षकषायेण प्रक्ष्याल्यौदकजेन वा ॥
तिलैः सयष्टिमधुकैः सक्षौद्रैः सर्पिषा युतैः ।
उपदिह्य प्रतनुना वाससावेष्टयेद्व्रणम् ॥ ९ ॥
प्रपौण्डरीकमञ्जिष्ठा-मधुकोशीरपद्मकैः ।
सहरिद्रैः कृतं सर्पिः सक्षीरं व्रणरोपणम् ॥ १० ॥
क्षीरशुक्लापृथक्पर्णी-समङ्गारोध्रचन्दनैः ॥

अत्र वा शब्देन क्षीरपिष्टैरित्यनुकृष्य पयस्येत्यादावन्वेयम् । पयस्या क्षीर-काकोली क्षीरविदारीति केचित् । पाक्यैः सद्यः पाकेन निवृत्तैः सन्निहित-त्वाच्छर्करादीनां पयस्यादीनाञ्च सद्यःसृतैःशीतैः शीतसमाख्यैरित्यर्थः । जीव-नीयानि सू० ३८ अ० उक्तानि काकोल्यादीनि यथालाभं तैः सिद्धानि गव्याजमाहिषानि घृतानीह जीवनीयघृतानीति प्राञ्चः ॥ २—८ ॥

पक्वमित्यादि । च शब्देन पक्वं पुनर्विशिनष्टि पक्वन्त्वित्यर्थः । क्षीरि-वृक्षा वटादयः । औदकानि पद्मोत्पलशृङ्गाटकादीनि उपदिह्य प्रदिह्य । क्षीरेत्यादि । क्षीरशुक्ला क्षीरविदारी समङ्गा वराहक्रान्ता व्यवहारस्तु मञ्जि-ष्ठाया एव । अत्रैषां कल्कोन्यग्रोधादिप्रवालानां तेषां त्वचाञ्च पचतः क्वाथो ।

न्यग्रोधादिप्रवालेषु तेषां तद्वयथवा क्कतम् ।
नक्तमालस्य पत्राणि तरुणानि फलानि च ॥
सुमनायाश्च पत्राणि पटोलारिष्टयोस्तथा ।
द्वे हरिद्रे मधूच्छिष्टं मधुकं तिक्तरोहिणी ॥
प्रियङ्गुः कुशमूलञ्च निचुलस्य त्वगेव च ।
मञ्जिष्ठाचन्दनोशीरमुत्पलं सारिवा त्रिवृत् ॥
एतेषां कार्षिकैर्भागैर्घृतप्रस्थं विपाचयेत् ।
दुष्टव्रणप्रशमनं नाड़ीव्रणविशोधनम् ॥
सद्यश्छिन्नव्रणानाञ्च करञ्जाद्यमिदं शुभम् ।
दुष्टव्रणाश्च ये केचिद् ये चोत्सृष्टक्रिया व्रणाः ॥
नाड्यो गम्भीरिका याश्च सद्यश्छिन्नास्तथैव च ।
अग्निचारकृताश्चैव ये व्रणा दारुणा अपि ।
करञ्जाद्येन हविषा प्रशाम्यन्ति न संशयः ॥ ११ ॥
इष्टकासिकतालोह-गोशकृत्तुषपांशुभिः ।
मूत्रैरुष्णैश्च सततं स्वेदयेत् श्लेष्मविद्रधिम् ॥
कषायपानैर्वमनैरालेपैरुपनाहनैः ।

तेषामिति तदा बुद्ध्या समाकृष्टतया उपसर्ज्जनीभूतानां न्यग्रोधादीनां परामर्शः क्रियते । नक्तेत्यादि । कल्कसाध्यमिदमित्यनुषञ्जेयम् । द्रवार्थं जलमत्र चतुर्गुणं देयम् । नक्तमालः करञ्जः ॥ ८—११ ॥

इष्टकेत्यादि । लोहशब्देनेह कूटोपरि पौनःपुन्येनाहन्यमानात्पतनाय:-

हरेद्दोषानभीक्ष्णञ्चाप्यलाव्वासृक् तथैव च ॥ १२ ॥
आरग्वधकषायेण पक्वञ्चापाव्य धावयेत् ॥
हरिद्राचित्रताश्वत्थतिलैर्मधुसमायुतैः ।
पूरयित्वा व्रणं सम्यग्वध्नीयात् कीर्त्तितं यथा ॥
ततः कुलत्थिकादन्ती-त्रिवृच्छ्यामार्कतिल्वकैः ।
कुर्य्यात् तैलं सगोमूत्रं हितं तत्र ससैन्धवम् ॥ १३ ॥
पित्तविद्रधिवत् सर्व्वाः क्रिया निरवशेषतः ।
विद्रध्योः कुशलः कुर्य्याद्रक्तागन्तुनिमित्तयोः ॥ १४ ॥
वरुणादिगणक्वाथमपक्वेऽभ्यन्तरोत्थिते ।
ऊषकादिप्रतीवापं पिवेद्विद्रधिशान्तये ॥ १५ ॥
अनयोर्वर्गयोः सिद्धं सर्पिर्वैरेचनेन च ।
अचिराद्विद्रधिं हन्ति प्रातः प्रातर्निषेवितम् ॥ १६ ॥
एभिरेव गणैश्चापि संसिद्धं स्नेहसंयुतम् ।
कार्य्यमास्थापनं क्षिप्रं तथैवाप्यनुवासनम् ॥ १७ ॥

पिण्डाविस्तृतः 'चटा' इति प्रसिद्धो लोहावयव विशेष एव प्रत्येतव्यः। अश्वालाव्वासृग्हरेदित्युक्तेऽपि जलौकादिव्यवहारोनानुपपन्नः "सर्व्वाणि सर्व्वैर्व्वा" इति 'सू० १३ अ०' उक्तस्मरणात्। अश्वत्थत्वगामयवचूर्णम्। कीर्त्तितं सू० १८ अ०' इति शेषः। तत इत्यादि। अत्र कुलत्थिकादीनां सैन्धवस्य च कल्कः गोमूत्रं चतुर्गुणम्। श्यामा श्याममूलात्रिवृत्, शारिवेति केचित्। परमतो निवेदयिष्यति हि "नोपगच्छेद्यथापाकं प्रयतेत तथा" इत्यतो भूयोऽप्याममेवाधिकृत्याभिधत्ते वरुणेत्यादिना। वरुणाद्यूषकादी 'सू०

पानालेपनभोज्येषु मधुशिग्रुद्रुमोऽपि वा ।
दत्तावापो यथादोषमपक्वं हन्ति विद्रधिम् ॥
तोयधान्याम्लमूत्रैस्तु पेयो वापि सुरादिभिः ॥ १८ ॥
यथादोषगणक्वाथैः पिबेद्वापि शिलाजतु ।
प्रधानं गुग्गुलुञ्चापि शुण्ठीञ्च सुरदारु च ॥ १९ ॥
स्नेहोपनाहौ कुर्य्याच्च सदा चाप्यनुलोमनम् ॥ २० ॥
यथोद्दिष्टां शिरां विध्येत् कफजे विद्रधौ भिषक् ।
रक्तपित्तानिलोत्थेषु केचिदाहौ वदन्ति तु ॥ २१ ॥
पक्वं वा बहिरुन्नद्धं भित्त्वा व्रणवदाचरेत् ।

---

३८ अ०' द्रष्टव्यौ । वैरेचनेन "सू० ३९ अ०" उक्तेन कल्कीकृतेन त्रिवृतादिनेत्यर्थः । एभि र्वैरेचनान्तैरित्यर्थः । आस्थापनमास्थापनक्वाथः । यथादोषं दत्तावापः दोषप्रतियोगिद्रव्यानुविद्धः । मधुशिग्रुरक्तशोभाञ्जनः । तोयेत्यादि । अत्र तुकारेण मधुशिग्रुद्रुम इत्यनुकृष्यते । तोयादिभिरुपयोगस्त्वस्य दोषप्रत्यणीकत्वेनेति नेयम् । तथाच तोयेन पित्तजे मूत्रेण कफजे, शेषैस्तु वातजे विद्रधौमधुशिग्रुत्वक्क्वाथः पेय इत्यध्यवसितव्यम् ॥ १२—१८ ॥

यथेत्यादि । गणाः 'सू० ३८ अ०' उक्ता वरुणादिप्रभृतय स्तांश्च दोषप्रातिकूल्येनोपयोक्तुमिदमुच्यते यथादोषेति । प्रधानं कनकाख्यं यदाह प्रयोगामृतम् "मणिकाख्यो महानीलः कुमुदः पद्म इत्यपि हिरण्यः पञ्चमो ज्ञेयो गुग्गुलुः पञ्चजातयः" इत्युपक्रम्य "विशेषेण मनुष्याणां कनकः परिकीर्त्तितः" इति सच स्वर्णवर्णः इत्युन्नेयम् "हिरण्याख्यस्तु हेमाभः" इति स्मरणात् । यथोद्दिष्टामित्यनेन "वामपार्श्वे कक्षास्तनयोरन्तरेऽन्तर्व्विद्रधौ" इति 'शा० ८ अ०' उक्तां स्मारयति । न तावत् सर्व्वेषां कफजानां रक्तादिजानां वा विद्र-

स्रुतेषूर्द्धमधो वापि मैरेयाम्लसुरासवैः ॥
पियेत्यष्टकादिस्तु मधुशिग्रुद्रुमोऽपि वा ।
शिग्रुमूलजले सिद्धं ससिद्धार्थकमोदनम् ॥
यवकोलकुलत्थानां यूषैर्भुञ्जीत मानवः ।
प्रातः प्रातश्च सेवेत मात्रया तैल्वकं घृतम् ॥
त्रिवृतादिगणक्काथसिद्धं वाप्युपशान्तये ॥ २२ ॥
नोपगच्छेद्यथा पाकं प्रयतेत तथा भिषक् ॥
पर्य्यागते विद्रधौ तु सिद्धिर्नैकान्तिकी स्मृता ॥ २३ ॥
प्रत्याख्यायतु कुर्व्वीत मज्जजातन्तु विद्रधिम् ।
स्नेहस्वेदोपपन्नानां कुर्य्याद्रक्तावसेचनम् ।
विद्रध्युक्तां क्रियां कुर्य्यात् पक्वे वास्थि तु भेदयेत् ॥
निःशल्यमथ विज्ञाय कर्त्तव्यं व्रणशोधनम् ।
धावेत् तिक्तकषायेण तिक्तं सर्पिस्तथा हितम् ॥
यदि मज्जपरिस्रावो न निवर्त्तेत देहिनः ।
कुर्य्यात् संशोधनीयानि कषायादीनि बुद्धिमान् ॥ २४ ॥

धीनां प्रशमनायोपदिष्टोऽयं शिराव्यधविधिरवज्ञेयः प्लीह्नः प्रशमाय कनिष्ठिकानामिकयोर्मध्ये शिराव्यधफलदर्शनात् । अथ पक्वोऽयमन्तर्विद्रधिश्चेत् स्वयमेवोन्नमते तर्हि किं कुर्म्म इत्याह पक्वमिति । भित्वा बाह्यविद्रधिवदित्याकूतम् । स्रुतेषु स्वयमन्तर्भिन्नत्वेनेतिशेषः । शिग्रुमूलजले शोभाञ्जनमूलक्काथे । तैल्वकं घृतं 'चि० ४ अ०' उक्तं तिल्वकसर्पिः । इदमन्त-

प्रियङ्गुधातकीरोध्र-कट्फलं तिनिसैन्धवम्।
एतैस्तैलं विपक्तव्यं विद्रधिव्रणरोपणम् ॥ २५ ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने
विद्रधिचिकित्सितं नाम
षोड़शोऽध्यायः ॥ १६ ॥

शेषाञ्च सर्पिर्गाढ़त्वित्केचिन्नैवोपयोगमेनीत्यध्यवसेयम्। अस्थिगतविद्रधि-चिकित्सितमधिकरोति प्रत्याख्यायेति। अस्थिगतोहि विद्रधिर्मज्जन्येवाऽभिव्यज्यते तदिद मुक्तं मज्जजातमिति। कथं प्रतिकुर्वीतेत्याह स्नेहेति। तिनिस्तिनिशः "तिनाश" इति "सादन" इति चाख्यायते। परिशिष्टमति रोहितार्थम् ॥ १८—२५ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये
चिकित्सितस्थाने विद्रधिचिकित्सितं नाम षोड़शोऽध्यायः।

सप्तदशोऽध्यायः।

अथातो विसर्प-नाड़ी-स्तनरोगचिकित्सितं व्याख्यास्यामः ॥१॥

सम्प्रति निदान प्रक्रमोपस्थितं विसर्पादिचिकित्सितमधिकरोति अथात इत्यादिना ॥ १ ॥

साध्या विसर्पास्त्रय आदितो ये न सन्निपातक्षतजौ हि साध्यौ।
साध्येषु तत्पथ्यगणैर्विदध्याद् तानि सेकांश्च तथोपदेहान् ॥ २ ॥
मुस्ता शताह्वा सुरदारु कुष्ठं वाराहिकुस्तुम्बुरुकृष्णगन्धाः ।
वातात्मके चोष्णगणाः प्रयोज्याः सेकेषु लेपेषु तथा घृतेषु ॥
यत् पञ्चमूलं खलु कण्टकाख्यमल्पं महच्चाप्यथ वल्लिजञ्च ।
तच्चोपयोज्यं भिषजा प्रदेहे सेके घृते चापि तथैव तैले ॥३॥
कशेरु-शृङ्गाटक-पद्म-गुन्द्राः सशैवलाः सोत्पलकर्द्दमाश्च ।
वस्त्रान्तराः पित्तकृते विसर्पे लेपा विधेयाः सघृताः सुशीताः ॥
ह्रीवेर-लामज्जक-चन्दनानि स्रोतोज-मुक्ता-मणि-गैरिकाश्च ।
क्षीरेण पिष्टाः सघृताः सुशीता लेपाः प्रयोज्यास्तनवः सुखाय॥४
प्रपौण्डरीकं मधुकं पयस्या मञ्जिष्ठिका पद्मकचन्दने च ।
सुगन्धिका चेति सुखाय लेपाः पैत्ते विसर्पे भिषजा प्रयोज्याः ॥
न्यग्रोधवर्गः परिषेचनञ्च घृतञ्च कुर्य्यात् स्वरसेन तस्य ।

साध्या इत्यादि। समान मिदं पूर्व्वेणेति पौनरुक्तं परिहृतं भवति। उष्णगणाः 'सू० ३८ अ०' उक्तेषु गणेषूष्णवीर्य्या मत्स्यादयश्च। वाराही नाम मानकन्दाकारः कन्दविशेषः कामाख्या प्रदेशे प्रचुरं दृश्यते तदभावे तु चर्म्म-कारालुकमेवादेयम्। कृष्णगन्धा शोभाञ्जनः कण्टकाख्यादयश्चत्वारः पञ्च-मूलभेदाः 'सू० ३८ अ०' द्रष्टव्याः। गुन्द्रा एरका लामज्जकमुशीरम्, स्रोतोजं सौवीरमञ्जनम्। वहलो हि लेपोऽतितरां रोमकूपानि पिधायोष्माणं निरु-ध्य दाहञ्चापादयति तदिदमुच्यते तनव इति। प्रपौण्डरीकं स्वनाम प्रसिद्धं व्यवहारस्तु हरिचन्दनस्यैव चन्दनशब्देनेह श्वेतचन्दनमेवोपदिश्यते। सुगन्धिका

शीतैः पयोभिश्च मधूदकैश्च सशर्करैरिक्षुरसैश्च सेकान् ॥ ५ ॥
घृतस्य गौरीमधुकारविन्दरोध्राम्बुराजादनगैरिकेषु।
तथार्षभे पद्मकसारिवासु काकोलिमेदाकुमुदोत्पलेषु ॥
सचन्दनायां मधुशर्करायां द्राक्षास्थिरापृश्निशताह्वयासु।
कल्कीकृतासूदकमत्र दत्त्वा न्यग्रोधवर्गस्य तथा स्थिरादेः ॥
गणस्य बिल्वादिकपञ्चमूल्याश्चतुर्गुणं क्षीरमथापि तद्वत्।
प्रस्थं विपक्वं परिषेचनेन पैत्तीर्निहन्यात् तु विसर्पनाडीः ॥
विस्फोटदुष्टव्रणशीर्षरोगान् पाकं तथास्यस्य निहन्ति पानात्।
ग्रहार्दिते शोषिणि चापि बाले
घृतं हि गौर्य्यादिकमेतदिष्टम् ॥ ६ ॥
अजाश्वगन्धे सरला सकाला सैकैषिका चाप्यथवाजशृङ्गी।
गोमूत्रपिष्टो विहितः प्रदेहो हन्याद्विसर्पं कफजं सुशीघ्रम् ॥

उशीरम्। पयोभिः 'सू० ४५ अ०' उक्ताभिरष्टाभिः। सममधुमिश्राणि कौपाद्युदकानि मधूदकानि ॥ २—५ ॥

गौर्य्यादिघृतमुपदिदिक्षति घृतस्येति। घृतस्य प्रस्थमिति परेणान्वयः। गौरी हरिद्रा अरविन्दं पद्मपुष्प राजादनः पियाल स्तदभावे द्राक्षा देया ऋषभाभावेतु वंशलोचनेत्याहुः। मधुजाताशर्करा मधुशर्करा "मधुजा मधुशर्करा" इति राजनिर्घण्टश्च। उदकशब्देनेह क्वाथ एव प्रत्येतव्यो न्यग्रोधादिपदसान्निध्यात्। स्थिरादिः स्वल्पपञ्चमूलम्। अत्र गौर्य्यादीनां शताह्वयान्तानां कल्कः, न्यग्रोधादीनां मिलितानां त्रयाणां गणानां

कालानुसार्य्यागुरुचोचशुक्ता रास्नाश्चाशीतशिवेन्द्रपर्ण्यः ।
पालिन्दिमुञ्जातमहीकदम्बा हिता विसर्पेषु कफात्मकेषु ॥ ७ ॥
गणस्तु योज्यो वरुणप्रवृत्तः क्रियासु सर्व्वासु विचक्षणेन ।
संशोधनं शोणितमोक्षणञ्च श्रेष्ठं विसर्पेषु चिकित्सितं हि ॥
सर्व्वांश्च पक्वान् परिशोध्य धीमान् व्रणक्रमेणोपचरेद्यथोक्तम् ॥ ८
नाड़ीत्रिदोषप्रभवा न सिध्येच्छेषाश्चतस्रः प्रतियत्नसाध्याः ॥ ९ ॥
तत्रानिलोत्थामुपनाह्य पूर्व्वमशेषतः पूयगतिं विदार्य्य ।
तिलैरपामार्गफलैश्च पिष्ट्वा ससैन्धवैर्बन्धनमत्र कुर्य्यात् ॥ १० ॥

चतुर्गुणः क्वाथः क्षीरमपि चतुर्गुणं देयमित्यवधेयम् । अजेत्यादि अजगन्धा श्वगन्धाचेत्यजाश्वगन्धे, सरला कृष्णा त्रिवृत्, कालः कासमर्द्दः 'कालकासुन्दी' इति परिचीयते । एकैषिका अरुणमूला त्रिवृत्, अजशृङ्गी नाम 'गाड़ोल शिङ्गा' इत्याख्यायते । कालानुसार्य्या तगरम् । चोचं गुड़त्वक्, शित-शिवं सैन्धवं, इन्द्रपुष्पी "ईशलाङ्गली" इत्यभिधीयते । पालिन्दी श्यामालता च्छन्दोनुरोधाद्ध्रस्वः । मुञ्जातः 'मुज' इति प्रसिद्धो रज्जुसाधनस्तृणभेदः । महीकदम्बो मुण्डितिका 'मुण्डेरी' इत्याभाष्यते । वरुणप्रवृत्तो वरुणादिः 'सू० ३८ अ०' द्रष्टव्यः । यथोक्तं द्विव्रणीय इति शेष ॥ ६—८ ॥

नाड़ीव्रणचिकित्सितमधिकरोति नाड़ीमित्यादिना । शेषाः पृथक् दोषजाः शल्यनिमित्ता च । प्रतिरूपो यत्नः प्रतियत्नोऽनन्तरोक्तानां क्रियाणा-मुद्योग इति सन्दर्भः । तत्रेत्यादि । पूयगतिं नाड़ीं पूर्व्वमुपनाह्य पच्य-मानांशपाचनार्थं तिलादिभि स्तैस्तैर्वातव्रणोपयोगिभिः प्रदिह्येत्यर्थः । पिष्ट्वा 'सू० ५ अ०' उक्तेनाच्छ्येति शेषः । बन्धनं कुर्य्यात् 'सू० १८ अ०' अभि-

प्रक्षालने चापि सदा व्रणस्य योज्यं महद्यत् खलु पञ्चमूलम् ।

हिंस्रां हरिद्रां कटुकां बलाञ्च
गोजिह्विकाञ्चापि सबिल्वमूलाम् ॥
संहृत्य तैलं विपचेद्व्रणस्य संशोधनं पूरणरोपणञ्च ॥ ११ ॥

पित्तात्मिकां प्रागुपनाह्य धीमा-
नुत्कारिकाभिः सपयोघृताभिः ॥
निपात्य शस्त्रं तिलनागदन्ती-
यष्ट्याह्वकल्कैः परिपूरयेत् ताम् ॥ १२ ॥

प्रक्षालने चापि ससोमनिम्बा निशा प्रयोज्या कुशलेन नित्यम् ॥
श्यामात्रिभण्डीत्रिफलासु सिद्धं हरिद्रयो रोध्रकवृक्षयोश्च ।
घृतं सदुग्धं व्रणतर्पणेन हन्याद्गतिं कोष्ठगतापि या स्यात् ॥१३
नाडीं कफोत्थामुपनाह्य सम्यक् कुलत्थसिद्धार्थकशक्तुकिण्वैः ।
मृदूकृतामेष्यगतिं विदित्वा निपातयेच्छस्त्रमशेषकारी ॥

समीक्ष्येत्याकूतम् । हिंस्रेत्यादि । हिंस्रानामौषधिः 'कालाकोड़ा' 'काटागर' इति च प्रथते । गोजिह्वा शाकभेदः 'गोजिया' इति 'दारिया' इति चोच्यते । पूरणेन रोपणं पूरणरोपणम् । कल्कसाध्यमित्यवगन्तव्यम् । पित्तात्मिका मित्यादि । उत्कारिका तिलतण्डुलकल्कः । सोमं काञ्जिकम्' इति कोषान्तरम् । व्यवहारस्तु धान्याम्लस्यैव । अत्र सोमः सोमलतेति व्याख्यातुकामस्य कपोतकृते महिषबलिसमर्पणमिति किं ब्रूमः । निशा हरिद्रा । श्यामेति । श्यामा श्याममूला त्रिवृत् , त्रिभण्डीत्वरुणमूले-

दद्याद्व्रणे निम्बतिलान् सुपिष्टान्
सुराष्ट्रजान् सैन्धवसम्प्रयुक्तान् ।
प्रक्षालने चास्य करञ्ज-निम्ब-जात्यक्ष-पीलुस्वरसाः प्रयोज्याः ॥
सुवर्च्चिका-सैन्धव-चित्रकेषु निकुम्भ-ताली-नल-रूपिकासु ।
फलेष्वपामार्गभवेषु चैव कुर्य्यात् समूत्रेषु हिताय तैलम् ॥१४॥
नाड़ीन्तु शल्यप्रभवां विदार्य्य निर्हृत्य शल्यं प्रविशोध्य मार्गम् ।
संशोधयेत् क्षौद्रघृतप्रगाढ़ैस्तिलैस्ततो रोपणमस्य कुर्य्यात् ॥
कुम्भीक-खर्ज्जूर-कपित्थ-विल्व-वनस्पतीनाञ्च शलाटुवर्गैः ।
कृत्वा कषायं विपचेत् तु तैलमावाप्य मुस्तासरलाप्रियङ्गूः ॥
सुगन्धिका मोचरसाहिपुष्प' रोध्रं विदध्यादपि धातकीञ्च ।
एतेन शल्यप्रभवा च नाड़ी
रोहेद्व्रणी वा सुखमाशु चैव ॥ १५ ॥

त्यनयोर्विशेषः । वृक्षो वृक्षकः कुटज इत्यनर्थान्तरम् । अत्र श्यामादीनां कल्कः, दुग्धं चतुर्गुणम् तावदेव जलमपि देयम् "क्षीरमस्त्वारणालाद्यैः पाकोयत्रेरितः क्वचित् । जलं चतुर्गुणन्तत्र वीर्य्याधानार्थमावपेत्" इत्यनुशासनात् । अत्रानन्तरञ्चानुक्तमपि बन्धनमूह्य' नितरामौपयौगिकत्वात् । नाड़ीमित्यादि । मृदूकृतां प्रदुष्टांशपरिपाचनेन परिहृतकठोरभावामित्यर्थः । सुराष्ट्रजो नाम 'फटकिरी' इति शब्द्यते । जाती मालती अक्षो विभीतकः, पीलुः कोङ्कनदेश प्रसिद्धो गुड़फलोवृक्षः .निकुम्भोदन्ती, ताली-तालमूली, रूपिका त्वर्कः । अत्र गोमूत्रं चतुर्गुणं शेषाः कल्कः । सुगन्धिका उशीरम् , अहिपुष्पी नागदन्ती ॥ ८—१५ ॥

कृशदुर्व्वलभीरूणां नाड़ी मर्म्माश्रिता च या ।
क्षारसूत्रेण तां छिन्द्यान्नतु शस्त्रेण बुद्धिमान् ॥
एषण्या गतिमन्विष्य क्षारसूत्रानुसारिणीम् ।
सूचीं निदध्याद्गत्यन्ते तथोन्नम्याशु निर्हरेत् ॥
सूत्रस्यान्तं समानीय गाढ़बन्धं समाचरेत् ।
ततः क्षारबलं वीक्ष्य सूत्रमन्यत् प्रवेशयेत् ॥
क्षाराक्तं मतिमान् वैद्यो यावन्न छिद्यते गतिः ।
भगन्दरेऽप्येष विधिः कार्य्यो वैद्येन जानता ॥
अर्व्वुदादिषु चोत्क्षिप्य मूले सूचं निधापयेत् ।
सूचीभिर्यववक्त्राभिराचितं वा समन्ततः ।
मूले सूत्रेण वध्नीयाच्छिन्ने चोपचरेद्व्रणम् ॥ १६ ॥

कृशेत्यादि । चशब्दः समुच्चयार्थः, अकृशादीनामपि वा नाड़ी मर्म्माश्रितेत्यर्थः । क्षारसूत्रेण च्छेदनप्रकारमुपदिदिक्षति एषण्येति । 'सू० ११ अ०' उक्तं क्षारसूत्रमनुसारयतीति क्षारसूत्रानुसारिणी । गत्यन्ते नाड़ीसीमायामुन्नम्यान्मुखीकृत्य निर्हरेद्बहिराहरेत् । क्षारबलं सूत्रोपहितक्षारदौर्व्वल्यम् । अत्र सूचीं निदध्याद्गत्यन्त इति सामान्येनोक्तेऽप्यत्यायतायां नाड्यां विशालव्रणभयादन्तरान्तरा क्षारसूत्रेण च्छेत्तुमुपदिशन्त्याचार्य्या यथेतरत्र तथाविधामायतां नाड़ीं शस्त्रेणेति सुधियः शृणुध्वम् । भगन्दर इति । भगन्दरोऽत्र न्याय्यतया कृशादीनामेव प्रत्येतव्यः । प्रसङ्गाद्विधिमिममर्व्वुदाधिमांसप्रभृतिष्वतिदिशति अर्व्वुदादिष्विति । वा शब्दोयमवधारणार्थः । च शब्देनेह विशिनष्टि उत्क्षिप्येति । उत्क्षिप्य दाहातिक्रमभयान्मनागुन्न-

या द्विव्रणीयेऽभिहितास्तु वर्त्त्यस्ताः
सर्व्वनाड़ीषु भिषग्विदध्यात् ॥ १७ ॥

घोण्टाफलत्वग्लवणानि लाक्षा पूगीफलं वा लवणञ्च पत्रम् ॥
स्नुह्यर्कदुग्धेन तु कल्क एष वर्त्तीकृतो हन्त्यचिरेण नाड़ीः ॥१८
विभीतकाम्रास्थिवटप्रवाला हरेणुकाशङ्खिनिवीजभस्म।
वाराहिकन्दश्च तथा प्रदेया नाड़ीषु तैलेन च मिश्रयित्वा ॥१९

धुस्तूरजं मदनकोद्रवजञ्च वीजं
कोशातकी शुकनसा मृगभोजनी च।
अङ्कोटवीजकुसुमं गतिषु प्रयोज्यं
लाक्षोदकाह्वमलासु विकृत्य चूर्णम् ॥ २० ॥

मय्य चालिताभिर्यववक्त्राभिः सुष्ठुस्थूलसूत्रानुसरणार्थं यवाकारमुखाभिः सूचीभिर्मूले मूलावच्छेदेन समन्ततः आचितं ग्रथितं यथा स्यात्तथैव सूत्रं प्रसुतं क्षारसूत्रं निधापयेत् प्रवेशयेदित्यर्थः। सूत्रेण तेनैव बध्नीयादावेष्ट्य गाढ़ मित्याकूतम्। अथातुरश्चेत् क्षारसूत्रजनितदुःखमपि कथञ्चिदपि सोढ़ुं न शक्येत तर्हि कागतिरित्याह्रयाहति। घोण्टेत्यादि। वा शब्दोऽयं लाक्षान्तं पत्रान्तञ्च योगौ विभजते। अत्र 'घोण्टातु पूगः' इति कोषान्तरे सत्यप्यनन्तरं पूगीफलोपयोगात् साधारणशब्दविशेषाच्च घोण्टाफलपदेन पूगीफलमेवाभिप्रेयन इत्याहुः। तथाच कृस्वगुवाकफलञ्च गुड़त्वक् च सैन्धवञ्चेति घोण्टाफलत्वग्लवणानि। नेह घोण्टा वदरीति केनचिदुक्तं युक्त-मनुपयोगात्। विभीतकेत्यादि। अत्र विभीतकादिभस्मानुषङ्गाद्वाराही-कन्दोऽपि भस्मीकृत एवादीयते। शङ्खिनी यवतिक्ता, व्यस्तसमस्तानामेवैषा-

चूर्णीकृतैरथ विमिश्रितमेभिरेव
तैलं प्रयुक्तमचिरेण गतिं निहन्ति ।
एष्वेव मूत्रसहितेषु विधाय तैलं
तत्साधितां गतिमपोहति सप्तरात्रात् ॥ २१ ॥
पिण्डीतकस्य तु वराहविभावितस्य
मूलेषु कन्दशकलेषु च सौवहेषु ।
तैलं कृतं गतिमपोहति शीघ्रमेतत्
कन्देषु चामरवरायुधसाह्वयेषु ॥ २२ ॥
भल्लातकार्कमरिचैर्लवणोत्तमेन
सिद्धं विडङ्गरजनीद्वयचित्रकैश्च ।

मुपयोगः साधिष्ठः । धुस्तूरेत्यादि । कोद्रवो धान्यभेदः "कोदो" इति प्राकृताः कथयन्ति । शुकनासा श्योनाकः, मृगभोजनी इन्द्रवारुणी अङ्कोठोनाम 'ओकड़ा' इत्यभिधीयते । चूर्णमिति क्रियाविशेषणात् चूर्णं विकृत्य चूर्णीकृत्येत्यर्थः । एष्वित्यादि । एषु धुस्तूरवीजादिषु तैलं विधाय तत् साधितां लाचोदकशोधितामित्यर्थः । "साधितः शोधितोऽपिच' इति शब्द-रत्नावली । अत्र धुस्तूरवीजादीनां कल्को गोमूत्रं चतुर्गुणं देयमित्यु-पदेशः ॥ १६—२१ ॥

तैलत्रितयमुपदिदिक्षति पिण्डीतकस्येत्यादिना । पिण्डीतको मदनः वराहस्तु वाराहीकन्दः । सुवहानामौषधिः 'गोयालिया' इति परिचीयते । तस्या एतानि सौवहानि । अत्र कन्दशकलेष्विति निर्देशात् पादिकं कल्कत्वेन गृहीतं कन्दं खण्डशश्छित्त्वा तैले विभक्ष्यिषन्ति कुशलाः । एतेनैव शेषः श्लोकपादोऽपि व्याख्यातप्रायः । वज्रेण समान आह्वयो येषां ते अमर-

स्यान्मार्कवस्य च रसेन निहन्ति तैलं
नाडीं कफानिलकृतामपचीं व्रणांश्च ॥ २३ ॥
स्तन्ये गते विकृतिमाशु भिषक् तु धात्रीं
पीतां घृतं परिणतेऽहनि वामयेत् तु ।
निम्बोदकेन मधुमागधिकायुतेन
वान्तागतेऽहनि च मुद्गरसाशना स्यात् ॥ २४ ॥
एवं त्र्यहं चतुरहं षडहं वमेद्वा
सर्पिः पिबेत् त्रिफलया सह संयुतं वा ॥ २५ ॥
भार्गीं वचामतिविषां सुरदारु पाठां
मुस्तादिकं मधुरसां कटुरोहिणीञ्च ।
धात्री पिबेत् तु पयसः परिशोधनार्थ-
मारग्वधादिषु वरं मधुना कषायम् ॥ २६ ॥
सामान्यमेतदुपदिष्टमतो विशेषाद्-
दोषान् पयोनिपतितान् शमयेद् यथास्वम् ।
रोगं स्तनोत्थितमवेक्ष्य भिषग्विदध्यात्
यद्विद्रधावभिहितं बहुशो विधानम् ॥ २७ ॥

वरायुधसाह्वया स्ते च काष्ठालुकेभ्यो न भिद्यन्ते तदभावेतु 'शाकरकन्द' इति समाख्यस्यैव व्यवहारोदृश्यते। भल्लातकेत्यादि। यत्तैलं सिद्धं स्यात्तद्धन्तीति योजना। अत्र भल्लातकादीनां पित्तकान्तानां कल्कः, मार्कवो भृङ्गराज-स्तस्य रसस्तु चतुर्गुणः। स्तन्य इत्यादि। वान्तमागतं यत्र तस्मिन् वान्तागते।

सम्पच्यमानमपि तन्तु विनोपनाहैः
सम्भोजनेन खलु पाचयितुं यतेत।
शीघ्रं स्तनो हि मृदुमांसतयोपनद्धः
सर्व्वं प्रकोथमुपयात्यवदीर्य्यते च ॥ २८ ॥
पक्के च दुग्धहरिणीः परिहृत्य नाड़ीः
कृष्णञ्च चूचुकयुगं विदधीत शस्त्रम्।
आमे विदह्यति तथैव गते च पाकं
धात्र्याः स्तनौ सततमेव च निर्द्दुहीत ॥ २९ ॥

इति सुश्रुतसंहितायां चिकित्सितस्थाने-
विसर्प-नाड़ीस्तनरोगचिकित्सितं नाम
सप्तदशोऽध्यायः ॥ १७ ॥

मुस्तादिरारग्वधादिश्च सू० ३८ अ० द्रष्टव्यौ। वरमभीष्टं बलाबलविशेषा-च्छीतं क्वाथं शृतं वेति यावत्। उपनद्धो मिश्रकोक्तैः पाचनौषधैः प्रलिप्तः। दुग्धहरिणीः स्तन्याभिवाहिनीः परिहृत्य ऋजुशस्त्रोपयोगेनेति शेषः। परि-शिष्टं निगदव्याख्यातम् ॥ २२—२९ ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये चिकित्सितस्थाने विसर्पनाड़ीस्तनरोगचिकित्सितं नामसप्तदशोऽध्यायः।

अष्टादशोऽध्यायः ।

अथातो ग्रन्थ्यपच्यर्व्वुदगलगण्डचिकित्सितं व्याख्यास्यामः ॥१

ग्रन्थिष्वथामेषु भिषग्विदध्याच्छोफक्रियायां विहितं विधिज्ञः ।
रक्षेद्बलस्यापि नरस्य नित्यं तद्रक्षितं व्याधिबलं निहन्ति ॥ २ ॥
तैलं पिबेत् सर्पिरथो द्वयं वा दत्त्वा वसां वा त्रिवृतं विदध्यात् ।
अपेहिवातादशमूलसिद्धं वैद्यश्चतुःस्नेहमथो द्वयं वा ॥ ३ ॥

सम्प्रति क्रमागतं ग्रन्थ्यादिचिकित्सितमधिकरोति अथात इत्यादिना ॥ १ ॥

ग्रन्थिष्वित्यादि । शोफक्रियायां; द्विव्रणीयोक्तामशोफचिकित्सायामित्यर्थः । नन्वामावस्थायां प्रतिक्रतास्तेन्न विलीयन्ते तर्हि का गतिरित्याह तैलमिति । अथो इति निपातः पक्षान्तरमाशंसति, सर्पिर्व्वेत्यर्थः । वृतेः क्विप् वृत् त्रिभिरवयवैर्वर्त्तते इति त्रिवृच्छब्दो ह्यायुर्व्वेदे मिलितस्नेहत्रितयमभिधत्ते यथा "तासां त्रिवृतमेकैकां करोति" इति श्रुतौ मिलितं तेजोजलान्नं तदिदं साम्प्रतमुक्तं दत्त्वेति । नह्यञ्जसा शुद्धः स्नेहः प्रभवति परिकरबन्धेन बलवन्तं वातमुपशमयितुमित्यौषधसिद्धं स्नेहमुपयुङ्क्ते अपेहीति । अपेहि वात ! इत्येवं यामवाप्य भिषजो भाषन्ते सा प्रसारणपरपर्य्याया अपेहिवाता नाम, अपेहिद्वितीयेत्यादिवत् मयूरव्यंसकादिषु द्रष्टव्या । तया दशमूलेन च सिद्धमपेहिवातादशमूलसिद्धम् । अत्र वा शब्देनौपयौगिकतया त्रिवृतं स्मृतिपथमारोहयति ॥ २—३ ॥

हिंस्राथ रोहिण्यमृताथ भार्गी श्योनाकबिल्वागुरुकृष्णगन्धाः ।
गोजी च पिष्टा सह तालपत्र्या ग्रन्थौ विधेयोऽनिलजे प्रलेपः ॥
स्वेदोपनाहान् विविधांश्च कुर्य्यात् तथा प्रसिद्धानपरांश्च लेपान् ।
विदार्य्य वा पक्वमपोह्य पूयं प्रक्षाल्य बिल्वार्कनरेन्द्रतोयैः ॥
तिलैः सपञ्चाङ्गुलपत्रमिश्रैः संशोधयेत् सैन्धवसम्प्रयुक्तैः ।
शुद्धं व्रणं वाप्युपरोपयेयुस्तैलेन रास्नासरलान्वितेन ॥
विडङ्गयष्टीमधुकामृताभिः सिद्धेन वा क्षीरसमन्वितेन ॥ ४ ॥
जलौकसः पित्तकृते हितास्तु क्षीरोदकाभ्यां परिषेचनञ्च ।
काकोलिवर्गस्य च शीतलानि पिबेत् कषायाणि सशर्कराणि ॥
द्राक्षारसेनेक्षुरसेन वापि चूर्णं पिबेच्चापि हरीतकीनाम् ।
मधूकजम्ब्वर्ज्जुनवेतसानां त्वग्भिः प्रदेहानवचारयेत ॥
सशर्करैर्वा तृणशून्यकन्दैर्दिह्यादभीक्ष्णं मुचुकुन्दजैर्वा ॥ ५ ॥
विदार्य्य वा पक्वमपोह्य पूयं धावेत् कषायेण वनस्पतीनाम् ।
तिलैः सयष्टीमधुकैर्विशोध्य सर्पिः प्रयोज्यं मधुरैर्विपक्वम् ॥६॥

हिंस्रेत्यादि । हिंस्रानामौषधिः "काँटागर" इत्यभिधीयते । कृष्णगन्धा-शोभाञ्जनः । गोजीह शाखोटकः, तालपत्री तालमूली । स्वेदेत्यादि । कुर्य्या-द्विव्रणीयमभिसमीक्ष्य तिलोमाप्रभृतिभिरित्याकूतम् । प्रसिद्धानिति । मिश्रको-क्तत्वेनेत्येव । नरेन्द्रः सम्याकस्तस्य पत्रमत्र ग्राह्यम् । पञ्चाङ्गुल एरण्डः । पित्तजानधिकरोति जलौकस इति । क्षीरोदकाभ्यां समधृताभ्यामेव । तृणशून्यं मल्लिका वनस्पतयोऽत्र प्राधान्यात् क्षीरिद्रुमा एव प्रत्येतव्याः । मधुरैः

हृतेषु दोषेषु यथानुपूर्व्या ग्रन्थौ भिषक् श्लेष्मसमुत्थिते तु ।
स्विन्नस्य विम्लापनमेव कुर्य्यादङ्गुष्ठ-लोहोपल-वेणुदण्डैः ॥
विकङ्कतारग्वधकाकनन्तीकाकादनीतापसवृक्षमूलैः ।
आलेपयेत् पिण्डफलार्कभार्गीकरञ्जकालामदनैश्च विद्वान् ॥७॥
अमर्म्मजातं सममप्रयातमपक्वमेवापहरेद्विदार्य्य ।
दहेत् स्थिते वासृजि सिद्धकर्म्मा सद्यःक्षतोक्तञ्च विधिं विदध्यात्॥
या मांसकन्द्यः कठिना बृहत्यस्ताश्चैव योज्यश्च विधिर्विधिज्ञैः ।
शस्त्रेण वापाट्य सुपक्वमाशु प्रक्षालयेत् पथ्यतमैः कषायैः ॥८॥
संशोधनैस्तञ्च विशोधयेयुः क्षारोत्तरैः क्षौद्रघृतप्रगाढैः ।
शुद्धे च तैलन्त्ववचारणीयं विडङ्गपाठारजनीविपक्वम् ॥ ९ ॥
मेदःसमुत्थे तिलकल्कदिग्धं दत्त्वोपरिष्टाद्द्विगुणं पटान्तम् ।
हुताशतप्तेन मुहुः प्रमृज्याल्लोहेन धीमान् दहनं हिताय ॥

सू० ४२ अ० उक्तैर्मधुरवर्गैरित्यर्थः । हृतेष्वित्यादि । विकङ्कतो नाम 'बैचि' इति 'बाँफल' इति चाख्यायते । काकनन्ती गुञ्जा, काकादनी तु श्वेतगुञ्जा तापसवृक्षस्त्विङ्गुदी, पिण्डफला कटुतुम्बी, काला कृष्णत्रिवृत् ॥४-७॥

अमर्म्मेत्यादि । स्वल्पाः कन्दाः कन्द्यः बृहत्यो महत्यश्चेत्यर्थः । पथ्यतमैर्व्रणोपगत्वेन तैस्तैरारग्वधादिगणजातजातैरित्यभिसन्धिः । क्षारोत्तरैः सू० ११ अ० उपदिष्टमृदुक्षारानुविद्धैः, संशोधनैर्मिश्रकोक्तैः संशोधनौषधैश्चेत्यर्थः । विडङ्गादितैलमिदं कल्कमात्रसाध्यमित्याहुः । मेदोजं पुनः प्रतीकारतो

प्रलिप्य दार्व्वीमथ लाक्षया वा प्रतप्तया स्वेदनमत्र कार्य्यम्।
निपात्य वा शस्त्रमपोह्य मेदो दहेत् सुपक्वान्यथवा विदार्य्य॥
प्रक्षाल्य मूत्रेण तिलैः सुपिष्टैः सुवर्च्चिकाद्यैर्हरितालमिश्रैः।
ससैन्धवैः क्षौद्रयुतप्रगाढ़ैः क्षारोत्तरैरेनमभिप्रशोध्य॥ १०॥
तैलं विदध्याद्धिकरञ्जगुञ्जावंशावलेखेङ्गुदमूत्रसिद्धम्॥ ११॥
जीमूतकैः कोषवतीफलैश्च दन्तीद्रवन्तीत्रिवृतासु चैव।
सर्पिः कृतं हन्त्यपचीं प्रवृद्धां द्विधाप्रवृत्तं तदुदारवीर्य्यम्॥१२॥
निर्गुण्डिजातीवरिच्छिष्टयुक्तं जीमूतकं माक्षिकसैन्धवाढ्यम्।
अभिप्रतप्तं वमनं प्रगाढ़ं दुष्टापचीषूत्तममादिशन्ति॥ १३॥

विशिनष्टि। मेद इत्यादि। दिग्धं लिप्तं द्विगुणं द्वाभ्यां गुणितं तिलकल्कस्यो-पर्य्यधस्ताच्च विन्यस्तं द्विकमित्येतत्। पटान्तं वस्त्रखण्डं अन्तोऽवयवश्चेति पर्य्यायौ। दहनं हितायेति वाक्यभेदाच्चकारोऽध्याहार्य्यः, न तावदध्याहारोऽयमदृष्टचरत्वेन न्यूनतामाशंसतीत्याशङ्कितव्यम्। शस्त्रदेव पार्व्वणाभितापादौ पित्तादिनाम्नः परं तथा दर्शनात्। तथाच हिताय दहनञ्चकुर्य्यादिति योजना। अत्राविशेषेऽपि क्षुद्रे ग्रन्थ्युक्तेन विधिना प्रमृज्यात् महति च तस-लौहानुषङ्गात्तेनैव दहनं कुर्य्यादित्यवधेयम्। सुवर्च्चिकाद्यैः सू० ४६ अ० उक्तैः स्वर्जिकाक्षारादिभिः। अभि सर्व्वतोभावेनेत्यर्थः। वंशावलेखो वंशत्वक्। अत्र मूत्रं चतुर्गुणं शिष्टानि तु कल्क एव। जीमूतकं घोषकभेदः 'धूमा' इति परिचीयते। कोषवती घोषकः। द्विधाप्रवृत्तं बाह्याभ्यन्तरतः प्रयुक्तम्। निर्गुण्डीत्यादि। वरिच्छिष्टो मधूच्छिष्टः क्षौद्रमित्यमर्थान्तरम्॥ ८—१३॥

कैटर्य्यनिम्बीकरवीरसिद्धं तैलं हितं मूर्द्धविरेचनञ्च।
शाखोटकस्य स्वरसेन सिद्धं तैलं हितं नस्यविरेचनेषु॥ १४॥
मधूकसारश्च हितोऽववोड़े फलानि शिग्रोः खरमञ्जरेर्वा॥१५॥
ग्रन्थीनमर्म्मप्रभवानपक्वानुद्धृत्य चाग्निं विदधीत पश्चात्।
क्षारेण वापि प्रतिसारयेत् तु संलिख्य शस्त्रेण यथोपदेशम्॥१६
पार्ष्णिं प्रतिद्वादशचाङ्गुलानि मित्वेन्द्रवस्तिं परिवर्ज्य धीमान्।
विदार्य्य मत्स्याण्डनिभानि वैद्यो निष्कृष्य जालान्यनलं विदध्यात्१७
आगुल्फकर्णात् सुमितस्य जन्तोस्तस्याष्टभागं खुड़काद्विभज्य।
घोणार्ज्जवेऽधः सुरराजवस्तेर्हित्वाचिमात्रन्त्वपरे वदन्ति॥ १८॥

कैटर्य्येत्यादि। कैटर्य्यो निम्ब। शाखोटकः 'शेओड़ा' इत्युपदिश्यते। खरमञ्जरिरपामार्गः। पार्ष्णिमित्यादि। पार्ष्णिं गुल्फस्याधोभागं प्रति लक्ष्यीकृत्य पार्ष्णित इति यावत्। द्वादशचाङ्गुलानीति। अत्र विभक्त्यर्थः परिमाणं तत्राभेदसम्बन्धेन प्रकृत्यर्थस्यान्वयः, तच्च परिच्छेद्यपरिच्छेदकभावसम्बन्धेन विशेष्ये अन्वेति। तथाच स्वस्वद्वादशाङ्गुलरूपं यत्परिमाणं तत्परिच्छिन्नं देशमिति शाब्दबोधः। मित्वा परिहर्त्तुं परिमाय, धीमान् मर्म्मपरिरक्षणकुशलः कथञ्चिच्छिन्नेषु मर्म्मसु बन्धने लघुहस्तो वैद्य इन्द्रवस्तिं मांसपिण्डिकाभ्यन्तरस्थं गम्भीरानुगतं मर्म्मसमाख्यं देशविशेषं परिवर्ज्य शस्त्रेणास्पृष्ट्वा अधस्तात् संरक्ष्येति यावत्, विदार्य्य क्रियासौकर्य्यात् तस्माद्द्वादशाङ्गुलादूर्ध्वं प्रायस्त्र्यङ्गुलमितं मांसपिण्डिकालकाग्रं विपाट्येत्यर्थः। अनलं विदध्यात् पुनर्वृद्धिभयादित्यभिसन्धिः। वाग्भटस्तु कर्म्मेदं व्यत्यासेन सम्पादयितुम् "मुक्तेन्द्रवस्तिञ्च गदान्यपार्श्वे" इत्याह तत्तु पुनर्निपुणं चिन्त्य-

मणिबन्धोपरिष्टाद्वा कुर्य्याद्रेखात्रयं भिषक् ।
अङ्गुल्यन्तरितं सम्यगपचीनां निवृत्तये ॥ १९ ॥
चूर्णस्य काले प्रचलाककाकगोधाहिकूर्म्मप्रभवां मसीन्तु ।
दद्याच्च तैलेन सहेङ्गुदीनां यद्वच्यते श्लीपदिनाञ्च तैलम् ॥
विरेचनं धूममुपाददीत भवेच्च नित्यं यवमुद्गभोजी । २० ॥

मेव । यत्राविशेषेऽपि विधिरयं वङ्क्षणगतास्वेवापचीषूपयोगमितीत्यध्यवसितव्यम् । पश्चान्तरमुपन्यसति आगुल्फेति । तुकारेण विदारणस्थानं विशिनष्टि । तथाच गुल्फं कर्णञ्चाभिव्याप्येत्यागुल्फकर्णात् सुमितस्य सम्यङ्मापितस्य तस्य जन्तोरातुरस्याष्टभागमष्टमभागं खुड़कादगुल्फात् न चार्थोऽयमप्रसिद्धः "वातकण्टक इत्येष विज्ञेयःखुड़काश्रितः" इति तदर्थे प्रयोगदर्शनात् । विभज्य परित्यज्य पुनः परिमाय नासाया आर्ज्जवमिवार्ज्जवमस्येति घोनार्ज्जवं मांसपिण्डिका जानुसन्धेरधःपृष्ठगतोन्नतप्रदेश इति यावत् । तस्मिन् घोनार्ज्जवे सुरराजवस्तेरिन्द्रवस्तेरधोऽच्छिमात्रं "द्वाङ्गुलं सर्व्वतः सार्द्धं भिषङ्नयनबुद्बुदम्" इत्यनागताविक्षणात् सार्द्धं द्वाङ्गुलमात्रं छित्वा अपरे वदन्ति प्रकृतत्वात् विदार्य्य मत्स्याण्डनिभानि जालानि निष्क्रष्यानलं विदध्यादित्येवेति नेयम् । घोणर्ज्जुवेध इति पाठेतु सुरराजवस्तितोऽच्छिमात्रं छित्वा घोणासाम्यात् घोणा मांसपिण्डिका तत्र ऋजुवेधः कार्य्यः इत्येवं व्याख्येयम् । मणीत्यादि । कुर्य्याद्ग्नितप्तया शलाकयेति शेषः । अपचीनां ग्रीवादिगतानामित्येव ।' चूर्णस्येत्यादि । चूर्णस्य काले चि० १ अ० समानां स्थिरमांसानामित्यादिनोक्तायां चूर्णोपयोगावस्थायामित्यर्थः । प्रचलाकः शिखण्डकोमयूरपिच्छमित्यनर्थान्तरम् । काकस्त्वत्र स्वयं मृत एवा-

कर्कारुकैर्व्वारुकनारिकेलपियालपञ्चाङ्गुलवीजचूर्णैः ॥ २१ ॥
वातार्व्वुदं क्षीरघृताम्बुसिद्धैरुष्णैः सतैलैरुपनाहयेत् तु ।
कुर्य्याच्च मुख्यान्युपनाहनानि सिद्धैश्च मांसैरथ वेशवारैः ॥२२॥
स्वेदं विदध्यात् कुशलस्तु नाड्या शृङ्गेण रक्तं बहुशो हरेच्च ।
वातघ्ननिर्य्यूहपयोऽम्लभागैः सिद्धं शताख्यं त्रिवृतं पिवेद्वा ॥२३
स्वेदोपनाहा मृदवस्तु पथ्याः पित्तार्व्वुदे कायविरेचनञ्च ।
विघृष्य चोडुम्बरशाकगोजीपत्रैर्भृशं क्षौद्रयुतैः प्रलिम्पेत् ॥
सूक्ष्मीकृतैः सर्ज्जरसप्रियङ्गुपत्तङ्गरोध्राञ्जनयष्टिकाह्वैः ॥ २४ ॥
विस्राव्य चारग्वधगोजिसोमाः
श्यामा च योज्याः कुशलेन लेपे ॥ २५ ॥

देयो वाग्भट संवादमनुनिशम्य । यत्तैलं वक्ष्यते तेनापि सहेत्यर्थः विरेचनं धूमं वैरेचनिकं धूमं तदुपयोगविधिस्तु चि० ४० अ० निवेदयिष्यते ॥१४–२०॥

एतावन्तोह्यलमनल्पवुद्धीनामनुक्तज्ञानायेतरेषाञ्च व्यवहारायेति भगवान् सम्प्रधार्य्येत एव प्रक्रान्तमर्व्वुदचिकित्सितमधिकरोति कर्कारुकेत्यादिना । कर्कारुकं कुष्माण्डफलं एर्व्वारुकं कर्कटीफलम् । वीजशब्दः प्रत्येकमभिसम्बध्यते । तथाच नारिकेलवीजपदेन यदङ्कुरे जायमाने "फोँपड़ा" इति समाख्ययाभिव्यज्यते अत्र कर्कारुकादिवीजचूर्णापेक्षयाम्बुक्षीरं चतुर्गुणं घृतन्तु पादार्द्धं दत्त्वोत्कारिकावत् पक्तव्यम् । ततः किञ्चित्तैलेन संमिश्रोपनाहयेदित्युपदेशः । सिद्धैर्वातहरत्वेन प्रसिद्धैः, मुख्यानि वातहर द्रव्यानुविद्धत्वेन प्रधानानीत्यर्थः । वेशवारैः 'निरस्थि पिशितं पिष्टम्" इत्याद्युक्तैः । नाड़ीस्वेदविधिस्तु चि० ३२ अ० द्रष्टव्यः । अथ शृङ्गेणेति विशेषेण वातहर-

श्यामागिरिह्वाञ्जनकीरसेषु द्राक्षारसे सप्तलिकारसे च ।
घृतं पिबेत् क्लीतकसंप्रसिद्धं
पित्तार्व्वुदी तज्जठरी च जन्तुः ॥ २६ ॥
शुद्धस्य जन्तोः कफजेऽर्व्वुदे तु
रक्तेऽवसिक्ते तु ततोऽर्व्वुदं तत् ।
द्रव्याणि यान्यूर्द्ध्वमधश्च दोषान् हरन्ति तैः कल्कघृतैः प्रदिह्यात्॥
कपोतपारावतविड्विमिश्रैः सकांस्यनीलैः शुकलाङ्गलाख्यैः ।
मूत्रैस्तु काकादनिमूलमिश्रैः क्षारप्रदिग्धैरथवा प्रदिह्यात् ॥२७
निष्पावपिण्याककुलत्थकल्कैर्मांसप्रगाढैर्दधिमस्तुयुक्तैः ।
लेपं विदध्यात् क्रिमयो यथात्र मूर्च्छन्ति मूर्च्छन्त्यथ मक्षिकाश्च॥

स्वादुपदिश्यत इति निश्चीयते "सर्व्वाणि सर्व्वैर्व्वा" इति स्मरणात् तथाच जलौकादिव्यवहारोनानुपपन्नः । वातघ्नेति । वातघ्नः सू० ३८ अ०' उक्तो वातसंशमनोवर्गः । शताख्यैः शतसंख्यकैरित्यर्थः । श्लक्ष्णीकृतैश्चिक्कनैः परमसूक्ष्मैरितियावत् । पत्तङ्गं रक्तचन्दनम् । विस्राव्येति विस्राव्य जलौकयेति नेयम् । सोमो जलं ह्रीवेरमिति यावत् श्यामा श्याममूला त्रिवृत् गिरिह्वा गिरिकर्णिका, अञ्जनकी कटुकी, सप्तलिका सातला व्यवहारस्तु 'कालादाना' इति प्रसिद्धस्यैव । क्लीतकसंप्रसिद्धं यष्टीमधुकल्कसिद्धम् । कांस्यनीलं कांस्यमलः, शुकः शिरीषः, मूत्रैर्यथालाभं गव्यादिभिरष्टाभिरेव । काकादनी गुञ्जा, क्षार प्रदिग्धैः सू० ११ अ०' उक्तक्षारानुविद्धैः प्रदिह्यादृण सञ्जननार्थमित्याकूतम् ॥ २२ —२७ ॥

अपि जाते पुनः किं कार्य्यमित्याह निष्पावेति । निष्पावो राजमाषः

अल्पावशिष्टे क्रिमिभिः क्षते च
लिखेत् ततोऽग्निं विदधीत पश्चात् ॥ २८ ॥
यद्दल्पमूलं त्रपुताम्रसीसपट्टैः समावेष्ट्य तदायसैर्वा ॥
क्षाराग्निशस्त्राण्यसकृद्विदध्यात्
प्राणानहिंसन् भिषगप्रमत्तः ॥ २९ ॥
आस्फोतजातीकरवीरपत्रैः कषायमिष्टं व्रणशोधनार्थम्।
शुद्धे च तैलं विदधीत भार्गीविडङ्गपाठात्रिफलाविपक्कम् ॥३०
यदृच्छया चोपगतानि पाकं पाकक्रमेणोपचरेद्विधिज्ञः ॥ ३१ ॥
मेदोऽर्व्वुदं स्विन्नमथो विदार्य्य विशोध्य सीव्येद्गतरक्तमाशु।

'वरवटी' इत्याख्यायते। पिण्याकस्तिलकल्कः 'खइल' इति प्रथते। मूर्च्छन्ति प्रवृद्धा भवन्ति। लिखेत् शस्त्रेणेति शेषः। ततः पश्चादग्निं विदधीत समूलघातमुपहन्तुमित्यभिसन्धिः। शोणितसम्भूतमर्व्वुदं हि शिराधिष्ठानत्वान्निसर्गत एव प्रायेण सूक्ष्ममूलं भवति तदीदानीं प्रक्रान्तं शोणितार्व्वुदं प्रतिकारक्रमतोनिर्दिशन्नाह यदित्यादि। अर्व्वुदेऽस्मिन् क्षारादिकर्म्मणि कर्त्तव्ये प्राक्शोणितगतिनिरोधार्थं त्रप्वादिपत्रैरनावेष्ट्य चेन्मूलबन्धं निबध्यते तर्हि सूत्राकर्षनिकृन्तनात् परिकरबन्धेन शोणितं निर्गच्छत्यातुरमतिपातयितुं न पुन र्यथावद्दग्धाऽपि शोणितस्रुतिमाशङ्कमाना भिषजः क्षारादीनि सकृत् सकृत् पर्य्याप्तमुपयोक्तुमभीप्सन्तीत्युपपन्नं भवति त्रप्वित्यादि। एवञ्च प्राणानित्यादि विशेषणं साम्प्रतमेवेत्युन्नेयम्। त्रप्वादिपदमत्र बन्धाशङ्कितशिराच्छेदप्रतिबन्धिद्रव्योपलक्षणमिति गम्यते पटखण्डादिभिरप्यावेष्टनव्यवहारदर्शनात्। अप्रपाकित्वेन युक्त्या समुन्नीतान्येतानि वातार्व्वुदादीनि कदाचिदकस्मात्

ततो हरिद्रागृहधूमरोध्रपतङ्गचूर्णैः समनःशिलालैः ॥
व्रणं प्रतिसार्य मधुप्रगाढ़ैः करञ्जतैलं विदधीत शुद्धे ॥ ३२ ॥
सशेषदोषाणि हि योऽर्व्वुदानि करोति तान्याशु पुनर्भवन्ति ।

तस्मादशेषानि समुद्धरेत् तु
हन्युः सशेषाणि यथा हि वह्निः ॥ ३३ ॥
संस्वेद्य गण्डं पवनोत्थमादौ
नाड्यानिलघ्नौषधपत्रभङ्गैः ।
अम्लैः समूत्रैर्विविधैः पयोभि-
रुष्णैः सतैलैः पिशितैश्च विद्वान् ॥ ३४ ॥

विस्रावयेत् स्विन्नमतन्द्रितश्च शुद्धं व्रणञ्चाप्युपनाहयेत् तु ।

पच्यन्तेऽपीत्याह यद्दृच्छयेति । सम्प्रति साध्येषु परिशिष्टं मेदोऽर्व्वुदमधिकरोति मेद इति । अथो इति निपातो विशेषणार्थः । स्विन्नं मेदोऽर्व्वुदन्त्विति निष्कर्षः । सशेषेत्यादि यः करोति तस्येति योजना । परिशिष्टमतिरोहितार्थम् ॥ २८—३३ ॥

सम्प्रति शिष्टं गलगण्डप्रतीकारक्रममुपदिदिक्षति संस्वेद्येति । पत्राणां भङ्गाः खण्डानि पत्रभङ्गाः कुट्टितानि पत्रानीति यावत् । नाड्या चि० ३२अ० वक्ष्यमाणनाड्युपयोगेन । पयोऽम्लैरेभिः सतैलैर्वातहरतैलानुविद्धैः उष्णैरग्निसन्तप्तैः पिशितैः स्वेदाभिमतत्वेन वातप्रत्यनीकत्वेन च तनुवस्त्रावनद्धैरानूपादिमांसैः संस्वेद्य स्विन्नं सम्यक्स्वेदेनोपपन्नं तं गण्डमतन्द्रितो विस्रावणकुशलो विद्वान् बहुशो दृष्टकर्म्मत्वेन प्राज्ञो विस्रावयेत् स्रावेण विशोधयेत्, रसोनसूर्य्यावर्त्ताभ्यां वरुणबिल्वकशोभाञ्जनादिभिरेवम्विधैर्व्वान्यैः

शणातसीमूलकशिग्रुकिण्वपियालमज्जानुयुतैस्तिलैस्तु ॥
कालामृताशिग्रुपुनर्नवार्कगजादिनामाकरहाटकुष्ठैः ।
एकैषिकावृश्चकतिल्वकैश्च सुराम्लपिष्टैरसकृद्विदिह्यात् ॥३५॥
तैलं पिवेच्चामृतवल्लिनिम्बहंसाह्वयावृश्चकपिप्पलीभिः ।
सिद्धं वलाभ्याञ्च सदेवदारु हिताय नित्यं गलगण्डरोगे ॥३६॥
स्वेदोपनाहैः कफसम्भवन्तु संस्वेद्य विस्रावणमेव कुर्य्यात् ।
ततोऽजगन्धातिविषाविशल्याविषाणिकाकुष्ठशुकाह्वयाभिः ।
पलाशभस्मोदकपेषिताभिर्दिह्यात् सगुञ्जाभिरशीतलाभिः ॥

स्फोटानुत्पाद्य मनाक् हरिद्राभस्ममिश्रेण शङ्खभस्मना तुत्थकादिभिर्व्वा प्रतिसार्य्य कञ्चीपनसकदम्बपत्रादिभिराच्छाद्य वस्त्रपट्टेन वध्नीति शेषः। अथ चेत् सावशेषे व्रणास्ते रोढुं निरास्रावा भवेयुस्तर्हि का गतिरित्याह शुद्धमिति। व्रणं स्फोटोत्पन्नं व्रणजातं शुद्धं 'चि० १ अ०' उक्तनिरास्रावत्वादिशुद्धव्रणलिङ्गेनानुगतं दृष्ट्वोपनाहयेत् शणेत्यादिना अनन्तरोक्तेन भेषजेन पुनर्विस्रावयितुमित्यभिसन्धिः। शणेत्यादि। किण्वं सुरावीजं व्यवहारस्तु सुरासिक्थकस्यैव। काला कृष्णात्रिवृत्। गजादिनामा गजपिप्पली "डावुभाभ्यामन्यतरस्याम्" इति '४। १। १३ पा० सू०' डाप्। करहाटो मदनः, एकैषिका अरुणमूलात्रिवृत्, वृश्चकः कुटजः, तिल्वको लोध्रः। अत्रोपनाहयोरेतयोरुपदेशे सत्यपि वयन्तु तुत्थकाद्युपयोगेनैव विस्रावयिषामः। अमृतवल्ली गुडूची हंसाह्वया हंसपादीनामौषधिः 'गोयालिया' इत्यभिधीयते। तैलमिदं कल्कसाध्यमित्यवधेयम्। कफजगण्डमधिकरोति स्वेदेत्यादिना। स्वेदार्थाः 'चि० ३२ अ०' वक्ष्यमाणा उपनाहाः स्वेदोपनाहाः। विस्रावणप्रकारन्तु प्राग्वदेव द्रष्टव्यः। विशल्या दन्ती, विषाणिका कर्कटशृङ्गी,

दशाङ्गसंखैर्लवणैश्च युक्तं तैलं पिबेन्मागधिकादिसिद्धम् ।
प्रच्छर्द्दनं मूर्द्धविरेचनञ्च धूमश्च वैरेचनिको हितस्तु ॥ ३७ ॥
पाकक्रमो वापि सदा विधेयो वैद्येन पाकं गतयोः कथञ्चित् ।
कटुत्रिकक्षौद्रयुताः समूत्रा भक्ष्या यवान्नानि रसाश्च मौद्गाः॥३८
सशृङ्गवेराः सपटोलनिम्बा हिताय देया गलगण्डरोगे ॥ ३९ ॥
मेदःसमुत्थे तु यथोपदिष्टां विध्येच्छिरां स्निग्धतनोर्नरस्य ।
श्यामासुधालोहपुरीषदन्तीरसाञ्जनैश्चापि हितः प्रदेहः ॥
मूत्रेण वालोड्य हिताय सारं प्रातः पिबेच्छालमहीरुहाणाम् ॥
शस्त्रेण वापाट्य विदार्य्य चैनं मेदः समुद्धृत्य हिताय सीव्येत् ।
मज्जाज्यमेदोमधुभिर्द्दहेद्दा दग्धे च सर्पिर्मधु चावचार्य्यम् ॥
कासीसतुत्थे च ततोऽत्र देये चूर्णीकृते रोचनया समेते ।
तैलेन चाभ्यज्य हिताय दद्यात् सारोद्भवं गोमयजञ्च भस्म ॥
हितञ्च नित्यं त्रिफलाकषायो गाढ़ञ्च बन्धो यवभोजनञ्च ॥४०

इति सुश्रुतसंहितायां चिकित्सितस्थाने
ग्रन्थ्यपच्यर्व्वुदगलगण्डचिकित्सितं
नामाष्टादशोऽध्यायः ॥ १८ ॥

शुकाह्वया शुकनासा श्योनाक इत्यनर्थान्तरम् । मागधिकादिः सू० ३८अ० उक्तः पिप्पल्यादिः । पाकपरवर्त्तीक्रमः पाकक्रम, पाटनादिरिति यावत् ।

सारोऽप्येवं 'सू० ३८ अ०' उक्त सालसारादि समुच्यम्। परिशिष्टं निगद व्याख्यातम् ॥ ३४—४० ॥

इति श्रीहाराणचन्द्रचक्रवर्त्तिविरचिते सुश्रुतार्थसन्दीपने सुश्रुतभाष्ये चिकित्सितस्थाने ग्रन्थ्यपच्यर्बुदगलगण्डचिकित्सितं नामाष्टादशोऽध्यायः।

एकोनविंशोऽध्यायः।

अथातो वृद्ध्युपदंशश्लीपदानां चिकित्सितं व्याख्यास्यामः ॥१

अन्त्रवृद्ध्या विना षड्या वृद्धयस्तासु वर्ज्जयेत्।
अश्वादियानं व्यायामं मैथुनं वेगनिग्रहम् ॥
अत्यासनं चङ्क्रमणमुपवासं गुरूणि च ॥ २ ॥

क्रमागतं वृद्ध्यादिचिकित्सितमधिकरोति अथात इत्यादिना ॥ १ ॥

अतेत्यादि वृद्धीनां मध्येऽन्त्रवृद्धिर्हि सर्व्वं प्रतीकारक्रममतिक्रामतीति निरदिक्षत् "तामन्त्रवृद्धि मसाध्यामाचक्षते" इति, निर्द्देक्ष्यते च "अप्राप्त फल कोषायां वातवृद्धिक्रमोहितः" इति तदिह प्राप्तफलकोषा मन्त्रवृद्धिं प्रति न किञ्चिद्वक्तव्यमस्तीत्यभिसन्धायाह अन्त्रवृद्ध्या विनेत्यवधेयम्, तथाचान्त्रवृद्धि-शब्दोऽयमविशेषेणोपदिष्टोऽप्यप्राप्तफलकोषत्वेनावश्यं विशेषणीयः साधारण शब्दविशेषात् "यदुपक्रमे सन्दिग्धं तच्छेषान्निर्णीयते" इति हि न्यायः। न तावदेतावता नाप्राप्तफलकोषावस्थाया मन्त्रवृद्धावप्यश्वादियानादीनां प्रतिषिद्ध-

तत्रादितो वातहृद्भी स्नेहैस्तं स्निग्धमातुरम् ।
स्विन्नञ्चैनं यथान्यायं पाययेत विरेचनम् ।
कोशाम्रतिल्वकैरण्ड-फलतैलानि वा नरम् ॥
सक्षीरं वा पिबेन्मासं तैलमैरण्डसम्भवम् ॥
ततः कालेऽनिलघ्नानां क्वाथैः कल्कैश्च बुद्धिमान् ।
निरूहयेन्निरूढञ्च भुक्तवन्तं रसौदनम् ॥
यष्टीमधुकसिद्धेन ततस्तैलेन योजयेत् ।
स्नेहोपनाहौ कुर्य्याच्च प्रदेहांश्चानिलापहान् ॥
विदग्धां पाचयित्वा वा सेवनीं परिवर्ज्जयेत् ।
भिन्द्यात् ततः प्रभिन्नायां यथोक्तं क्रममाचरेत् ॥ ३ ॥

त्वेनोपलम्भात् षड़ित्यनुपपन्नम्, अत्रामरूपावस्थोपात्तं प्राधान्यमाश्रित्योपदेशात् तथाच न कश्चिद्दोषः। आसनमतिक्रम्य वर्त्तनमत्यासनं दण्डायमानवादिकमित्येतत् । त्रिभिरवयवैर्वृतमेववृत्तं मिश्रितस्नेहत्रितयमिति स्वतन्त्रसिद्धान्तः। विरेचनप्रकारं विवृणोति कोशेति। विदग्धामित्यादि। वाशब्दादविदग्धाञ्चेत्यर्थः। तत्र विदग्धां सू० ३६ चि० १अ० अभिसमोक्ष्योत् कारिकादिभिः पाचयेदविदग्धाञ्च क्षारेणेत्युपदेशः। तत्र क्षारपाचनक्रमस्त्वसुकरः सुचिरं गुह्यां प्रविष्टश्चेति विशदं निवेदयिष्यामः। तद्यथा प्रथमन्तावदृकृतो वृद्धावेकस्मिन् पार्श्वे, उभयत श्चोभयोः पार्श्वयोः कनिष्ठाग्रमितं मुष्कप्रदेशं काकोडुम्बरादिजैःकर्कशैः पत्रैर्विघृष्य शस्त्रेण वा विलिख्य त्रीणि दिनानि क्षारं पातयेत् ततः क्षारभक्षितत्वेन प्रसुप्तेऽस्मिन् देशे हंसपक्षनाडीपरिणाहां पृथुमुखीं लौहशलाकां शनैः शनैर्भ्रामयन् प्रवेशयेत्

पित्तजायामपक्वायां पित्तग्रन्थिक्रमो हितः ।
पक्वां वा भेदयेच्छिन्नां शोधयेत् क्षौद्रसर्पिषा ।
शुद्धायाश्च भिषग्दद्यात् तैलं कल्कञ्च रोपणम् ॥ ४ ॥
रक्तजायां जलौकोभिः शोणितं निर्हरेद्भिषक् ।
पिबेद्विरेचनं वापि शर्कराक्षौद्रसंयुतम् ।
पित्तग्रन्थिक्रमं कुर्य्यादामे पक्वे च सर्व्वदा ॥ ५ ॥

यावन्नातुरो वेदनामनुभवेत् शोणितं वा नागच्छेत् अनुभूतायां वेदनायां शोणिते वागते पुनः क्षारं निपात्य यथावसरं कच्चीनालं प्रवेश्य कच्चीपत्रेणैवा-च्छाद्य वस्त्रपट्टेनावेष्ट्य बध्नीयात् सर्व्वमेवं दैनन्दिनं कुर्य्यात् यावद् भित्वान्तरा-वरणत्वेनान्त्रद्रकं सवेगं नागच्छेद्, आगते चोदके प्राग्वत् कच्चीनालं प्रवेश्य जयन्तीपत्राण्यग्निसन्तप्ते पिठरे समभङ्गुलोत्सेधं विन्यस्य वस्त्रावच्छन्नेन पाणिना प्रपीड्य 'रुटी' इति प्रसिद्धं पिष्टकमिव कृत्वा कदलीपत्रोपरिविन्य-स्तेन तेन सर्व्वतो वृषणमावेष्ट्य वस्त्रपट्टेन बध्नीयात् मुञ्चेच्च द्व्यहात्त्र्यहाद्वा यावदारोग्यदर्शनात् । उपद्रवञ्च यथास्वं प्रतिकुर्व्वीत । आम्नायते हि "सेवनीच्छेदाद्रुजाप्रादुर्भावः" इति शा० ८ अ० तदिदमुक्तं सेवनीं परि-वर्ज्जयेदित्यनुसन्धेयम् । परिवर्ज्जयेच्छस्त्रेण न स्पृशेदित्यर्थः । छिन्नणीयाम-मनतिक्रम्येति यथोक्तम् । विधिरयं मध्यबलमातुरमेव लक्षयतीति गम्यते "अन्त्रजां मूत्रजां हित्वा सर्व्वां वृद्धोभिषग्वरः । कृन्तेत् समूलं वलिनः फले संरक्ष्य यत्नतः" इति तन्त्रान्तरोपस्मारणात् वलिन इति भुम्नि मत्वर्थीयः । प्रचुरबलस्येत्यर्थः ॥ २—३ ॥

पित्तेत्यादि । इहापि भेदनप्रकारः प्राग्वदेव द्रष्टव्यः । रोपणं तैलं कल्कञ्च मिश्रकमभिसमीक्ष्य कल्पनीयम् । एतेन शेषं व्याख्यातप्रायम् ।

वृद्धिं कफात्मिकामुष्णैर्मूत्रपिष्टैः प्रलेपयेत् ।
पीतदारुकषायञ्च पिबेन्मूत्रेण संयुतम् ॥
विम्लापनादृते वापि श्लेष्मग्रन्थिक्रमो हितः ॥
पक्वायाञ्च विभिन्नायां तैलं शोधनमिष्यते ।
सुमनारुष्करांकोठसप्तपर्णेषु साधितम् ॥ ६ ॥
मेदःसमुत्थां संस्वेद्य लेपयेत् सुरसादिना ।
शिरोविरेकद्रव्यैर्वा सुखोष्णैर्मूत्रसंयुतैः ॥
स्विन्नाञ्चावेष्ट्य पट्टेन समाश्वास्य तु मानवम् ।
रक्षेत् फले सेवनीञ्च वृद्धिपत्रेण दारयेत् ॥
मेदस्ततः समुद्धृत्य दद्यात् कासीससैन्धवे ।
बध्नीयाञ्च यथोद्दिष्टं शुद्धे तैलञ्च दापयेत् ।
मनःशिलालवणैः सिद्धमरुष्करेषु च ॥ ७ ॥
मूत्रजां स्वेदयित्वा तु वस्त्रपट्टेन वेष्टयेत् ।
सेवन्याः पार्श्वतोऽधस्ताद्विध्येद्व्रीहिमुखेन च ।
अथात्र द्विमुखां नाड़ीं दत्त्वा विस्रावयेद् भिषक् ।

मेद इत्यादि । आवेष्ट्य शैथिल्यमपनेतुं मूले दृढ़तरमाकृष्य बद्ध्वेत्यर्थः । मूत्रेत्यादि । वेष्टयेन्मेदोजमिवेति नियम् । अत्र सेवन्या इत्यादिना वेधानन्तरं नाड़ीप्रणिधानउपदिष्टे सत्यपि नाड़ीसंसक्तेन शस्त्रेण विद्धा नाड़ीं छित्वा शस्त्रमपनीय मूत्रं विसिस्रावयिषन्ति भिषजः सौकर्य्यमभिसमीक्ष्य । कञ्चु-

मूत्रं नाड़ीमथोद्धृत्य स्थगिकाबन्धमाचरेत् ॥
शुद्धायां रोपणं दद्याद्वर्ज्जयेदन्त्रहेतुकीम् ॥ ८ ॥
अप्राप्तफलकोषायां वातवृद्धिक्रमो हितः ॥ ९ ॥
तत्र या वङ्क्षणस्था तां दहेदर्द्धेन्दुवक्त्रया ।
सम्यङ्मार्गाविरोधार्थं कोषप्राप्तान्तु वर्ज्जयेत् ।
त्वचं भित्त्वाङ्गुष्ठमध्ये दहेच्चाङ्गविपर्य्ययात् ॥ १० ॥
अनेनैव विधानेन वृद्धौ वातकफात्मिके ।
प्रदहेत् प्रयतः किन्तु स्नायुच्छेदोऽधिकस्तयोः ॥ ११ ॥
शङ्खोपरि च कर्णान्ते त्यक्त्वा यत्नेन सेवनीम् ।
सत्यासाद्य शिरां विध्येदन्त्रवृद्धिनिवृत्तये ॥ १२ ॥

माचरेदत्रीयस्त्वे नाप्रवृत्तं मूत्रं बन्धनेन प्रपीड्य निःशेषं विस्रावयितुमित्यवगन्तव्यम् । शुद्धायां निर्मूलत्वेन दोषविरहितायामिति तात्पर्य्यम् । रोपणमत्र फलतदावरणयोः संश्लेषणमितिनिश्चीयते असंश्लिष्टत्वे हि तयोरन्तरवकाशमुपस्नेहन्यायेन मूत्रमुपेत्य वृद्धिमेतामभिनिर्व्वर्त्तयतीति । स्यादेतत् रोपणञ्च तत् कतरत् कतरत् कथं वा तत् प्रयोज्यमेवं पृष्टे ब्रूमः, शस्त्रकृतच्छिद्रानुसारिणा पुष्पनेत्रेण मनाक्तुत्थकाशीससमिश्रं मद्यं प्रणीय जयन्तीपत्रपिष्टकेनाच्छाद्य बन्धनमेवं जातीयकं वा यत्किञ्चनेत्युपदिशन्त्याचार्य्याः । सम्प्रति सुदूरमविशेषेणोपदिष्टमन्त्रवृद्धेरसाध्यत्वं स्मृतिपथमानीय विशिनष्टि वर्ज्जयेदिति । सम्यङ्मार्गाविरोधार्थं दहेदित्यन्वयः । अर्द्धेन्दुवक्त्रया लौहशलाकयेति तात्पर्य्यम् । अत्राप्राप्तेत्यादिनार्थाच्चिममर्थं स्फुटीकृत्यावगमयति कोषेति । सेवनीं 'शा० ५ अ०' उपदिष्टाम् ॥ ४—१२ ॥

उपदंशेषु साध्येषु स्निग्धस्विन्नस्य देहिनः ।
शिरां विध्येन्मेढ्रमध्ये पातयेद्वा जलौकसः ॥ १३ ॥
हरेदुभयतश्चापि दोषानत्यर्थमुच्छ्रितान् ।
सद्योऽपहृतदोषस्य रुक्शोफावुपशाम्यतः ॥
यदि वा दुर्ब्बलो जन्तुर्न वा प्राप्तं विरेचनम् ।
निरूहेण हरेत् तस्य दोषानत्यर्थमुच्छ्रितान् ॥ १४ ॥
प्रपौण्डरीकयष्ट्याह्व-वर्षाभूकुष्ठदारुभिः ।
सरलागुरुरास्नाभिर्वातजं संप्रलेपयेत् ॥
निचुलैरण्डबीजानि यवगोधूमशक्तवः ।
एतैश्च वातजं स्निग्धैः सुखोष्णैः सम्प्रलेपयेत् ।
प्रपौण्डरीकपूर्व्वैश्च द्रव्यैः सेकः प्रशस्यते ॥ १५ ॥
गैरिकाञ्जनयष्ट्याह्वसारिवोशीरपद्मकैः ।
सचन्दनोत्पलैः स्निग्धैः पैत्तिकं सम्प्रलेपयेत् ।
पद्मोत्पलमृणालैश्च ससर्ज्जार्ज्जुनवेतसैः ।
सर्पिःस्निग्धैः समधुकैः पैत्तिकं सम्प्रलेपयेत् ॥
सेचयेच्च घृतक्षीरशर्करेक्षुमधूदकैः ।
अथवापि सुशीतेन कषायेण वटादिना ॥ १६ ॥
शालाश्वकर्णार्जकर्ण-धवत्वग्भिः कफोत्थितम् ।

उपदंशेष्वित्यादि, । प्रपुण्डरीकपूर्व्वैरित्यौः प्रपुण्डरीकादिभिः सप्तभिः ।